षेण सामान्यमिति न्यायेन बहूनामप्यलङ्काराणां संयोगः कार्यसाधकत्वादि सामान्यस्य तत्र गेहमन्वेत्य समयानागो विवक्षितस्या
दिसंप्रतिपत्तिविशेषावगत्तौ निनाद्धे प्रतिष्ठितत्वासंभवात् न तु तत्र सामान्यस्य कारणं सौभाग्यप्रयोगतानापित्यादि विशेषस
मर्थनार्थसामान्यस्य च लोकसंप्रतिपत्त्या विशेषावगतौ नैवतु द्वौ प्रतिष्ठितत्वं भवतीति श्लोके न स्मृतं तापेक्षितमपि निवाच्यं
सामान्यस्य लोकसंप्रतिपत्त्यनित्यप्रमाणाभावात् न हि पोपो अमगा श्लाघ्यमानेति व्याप्तिरूपसामान्यस्य लोकसंप्रतिपत्त्यनयापया
महानसादिनानिदर्शनरूपदृष्टान्तानुपादानसंभवमात्रेणासमर्थितव्याप्तिरूपसामान्योपन्यासेपि तद्विशेषरूपदृष्टान्तोपन्यासति

25

शेषयोर्द्वयोरुक्तिरर्थान्तरन्यासः तयोरेकं प्रकृतमपरदप्रकृतं भवति तत्र विशेषप्रकृते तेन सहाप्रकृतसामान्यस्या
मान्यप्रकृते तेन सहाप्रकृतविशेषरूपस्य चार्थस्य समर्थनमर्थान्तरन्यास इत्युक्तं भवति तत्राद्यस्य हितो यादृशमुदाहरणं द्वितीय
स्य द्वितीयः श्लोकः नन्वयं काव्यलिंगान्नातिरिच्यते उदाहरणद्वयेप्यप्रकृतयोः सामान्यविशेषयोरुक्तिः प्रकृतयोर्विशेषसामान्य
योः कथमुपकरोतीति विवेक्तव्यं नहि सर्वथैव प्रकृतानन्वय्यप्रकृताभिधाने प्रत्युतैतेन तावदप्रस्तुतप्रशंसायामिव प्रसक्तनयं
उक्तनयात्प्रकृतयोरपि सामान्यविशेषयोः स्वशब्दोपात्तत्वात् नाप्यनुमानालंकार इव प्रकृतप्रतीतिरुक्तनया नह्यपि हेत्वाश्रिय
त्वधर्मताप्रभावात् नापि दृष्टान्तालंकार इवोपमानतया विलक्ष्यपानदोषः स्वभावबलस्याधारकोपकारः वनन रूमं गध्वमि
रिव हि निद्रानस्तूरः करिणा इत्यादिषु सामान्ये विशेषस्योपमानत्वदर्शनेपि विशेषे सामान्यस्यैकविधमिददर्शनादुपमान
तयान्वये साधर्म्यस्याप्रतीतेश्च तस्मात्प्रकृतसमर्थकतयैवाप्रकृतस्योपयोग इत्यपि वक्तव्यः तत्र स्ववाक्यार्थहेतुकं काव्यलिंगमेव एम
स्यान्नत्वलंकारान्तरं स्याद्यवकाशाशंकितेन अत्र केचित् समर्थनसापेक्षस्यार्थस्य समर्थने काव्यलिंगे निरपेक्षस्यापि प्रतीतिर्वैभ

कंदर्पजयोपयोगित्वात्तस्य सत्त्वं न व्यापिनमयोः परिकरस्य वह्निं तु मन्दुस्थापितं काव्यलिंगमपि प्रतीयमानात्रिवेकविशिष्टेन
पशुनाथपुरस्कृतत्वस्यानेकपदार्थस्य प्रतीयमानकंदर्पदाहकभालत्वनीयलोचनविशिष्टस्य शिवस्य विघ्नसन्निधानस्य च वाक्या
र्थस्य वाक्यस्यैव हेतुभावान्न वह्नितयोर्वाक्ययोर्हेतुभावेनाभ्यां गतीयमानमर्थोक्ति विंनद्दामस्ति यथा सर्वाशुचिनिधानस्येत्याप
दार्थपरिकरोदाहरणे सर्वाशुचिनिधानत्वादिनानेकेन पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वं यथा च वाक्यार्थपरिकरोदाहर
णे पर्याक्तविधयान्नद्वाक्यार्थप्रतीयमानं नाहं ज्यासक्यादिनस्यास्तु नेन्मत्र त्रिलोचन इत्यत्र च प्रतीमानवाक्यस्यैव हेतुभावोप
पादकतया काव्यलिंगस्यागमेव यथा यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिंदीवरमित्यनेन वाक्यार्थहेतुककाव्यलिंगोदाहरणत्व
न्नेत्रसमानकांतीत्यादिकानि इंदीवरशशिहंसविशेषणानि स्वेषां वाक्यार्थानां हेतुभावोपपादकानीति नत्र वाक्यार्थहेतुककाव्यलिंग
पदार्थहेतुककाव्यलिंगमंगमिति नमयोः काव्यलिंगोदाहरणत्वे काचिदनुपपत्तिः उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ह
नूमानब्धिमतरद्दुष्करं किं महात्मनां गुणवद्वस्तुसंसर्गाद्याति स्वल्पोपि गौरवं पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते सामान्यवि

थादेर्विनावह्नतदोदेशेकुलिंगः कविवाग्देवीवक्रुदेशादशनसंवीत्स्याविर्ङ्गिगतः एतन्नामार्णवमध्यशुष्कप्रगाढ्जित्वाभीस
रोजासन्नं प्रस्तोणगमयत्यभिसोकथमसावेकान्तोस्त्यास्येति इत्यत्र प्रसगः प्रपरांकथगोदाख्याकमथ्यइ संसभावनोयाथोपिपा
दक्षस्यार्णवमध्येत्यादिनाधिश्रेषणस्य प्रयासमसंश्लेपाद्योगरुणाइति श्लेषोऽविघटमानार्थघटकार्थस्य वर्णनमिति श्लेषलक्षण
भिति वज्रपदे वेनोक्तं वक्तनत्त्वत्वापि पदार्थहेतुकंकाव्यलिंगमेतत्र भेदकाभावान नत्रु सामिप्राय पदार्थवाक्यार्थवित्तस:
ननुपारिकरात्काव्यलिंगस्य किंभेदकं उच्यते परिकरे पदार्थवाक्यार्थवृत्त्याप्रतीयमानार्थो वा वाच्योपकारकतां भजते काव्य:
लिंगेतु पदार्थवाक्यार्थावेव हेतुभावं भजतः ननु यथापि स्तुरवालोकोऽदिनेत्यादि पदार्थहेतुककाव्यलिंगोदाहरणेप्यश्रेप्य
नत्रिमात्रिस्मादिवाक्यार्थहेतुककाव्यलिंगोदाहरणे च पदार्थवाक्यार्थावेव हेतुभावं भजतः तथापि यशुनाप्युग्रस्छूतेनैपिदा
र्थहेतुकोदाहरणे मच्चित्तेस्ति त्रिलोचन इति वाक्यार्थहेतुकोदाहरणे च प्रतीयमानार्थस्यापि हेतुकोटिप्रवेशो लभ्यते यस्तु: राम
नेतित्यादि वेकित्वामितापगमं विदुषोऽत्रस्य प्रमितिदेशत्वात् त्रिलोचन इति च कंदर्पदहनकर्तृतीयलोचनवक्त्राभिप्रायगर्भ

था वप्रादुर्भावादनुमितमिदं जन्म निभृतात्पुरारेव क्कापि स्मरणमपि मे वं न प्रमाणतवान न मयस्तुक्तः संप्रत्यहमनतुरये
ध्यतमितमाद्रितोऽशसंनत्रैनदिदमपराधद्वयमपि। अत्र तावदपराधद्वयमपि समर्थनीयमस्योत्तरार्धत्वात्तस्य समर्थनं च पूर्वा
परजन्मनोऽतनमनात्मनो वा कार्यमनात्माश्रिक्रियते। अत्र द्वितीयवाक्यार्थः नतु नैकपदार्थो हेतुः अत्रापि संयतिनमस्तुत्को
द्वितीयवाक्यार्थोऽनेकपदार्थो वा हेतुः क्वचित्परस्परविरुद्धयोः समर्थनीययोरुभयोः क्रमाद्द्वौ हेतुभावं भजतः यथा असोढात
त्कालोल्लसदसहभावस्य तपसः कथानां विस्रंभेष्वथ च रसिकः शैलदुहितुः प्रमोदं वो दिश्यात्कपटवटुवेषापनयने त्वराशै
थिल्याभ्यां युगपदभियुक्तः स्मरहरः अत्रापि वसुगपत्न्योत्रिमल्लस्य वेषापनयनत्वरातदवर्जनेच्छयोर्विरुद्धयोः क्रमा
त्प्रीज्ञातो ब्रह्मनयसोऽसहिष्णुत्वं तत्संलापकौतुकं चेत्युभावपि हेतुत्वेन निबद्धौ क्वचित्परस्पराविरुद्धयोरुभयोः समर्थनीयय
योरेक एव हेतुः यथा जीयादम्बुधितनयाधररसमास्वादयन्सुरारिरयं अम्बुधिमथनक्लेशकलनं यन्निष्फलं च सफलं च अत्र विफ
लत्वसफलत्वकलनयोर्विरुद्धयोरेकस्याम्बुधितनयाधररसमास्वादो हेतुः इदं काव्यलिङ्गं हेत्वलंकार इति केचिदाजक्तुः हेतोद

27

नोनिकिमश्रुतं। स्वकार्य्ये हृदयं भित्वा निर्गतौ यौ पयोधरौ हृदयस्यानुदयस्य भेदने का कृपा तयोः समर्थनीयस्यार्थस्य का
व्यलिंगं समर्थनं। जितोसि मंदकंदर्प मच्चित्तेस्ति त्रिलोचन अत्रकंदर्पजयोपपादनस्य हृत्स्थरविषयत्वात्समर्थनात्सापेक्षत्व
मच्चित्तेस्ति त्रिलोचन इति स्वांतःकरणे शिवसंनिधानप्रदर्शनेन समर्थनं काव्यलिंगं व्याप्तिपक्षधर्मतादिसापेक्षनैयायिक
लिंगव्यावर्त्तनाय काव्यविशेषणं। इदं वाक्यार्थहेतुकं काव्यलिंगं पदार्थहेतुकं यथा भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्ष
माले शिवं हासोपानपरंपरे गिरिसुताकांतालयालंकृते अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि
मोक्षनामनि महामोहे निधीयामहे अत्र मोक्षस्य मोहत्वसमर्थने सुखालोकोच्छेदिनीति पदार्थो हेतु
ः। क्वचित्पदार्थवाक्यार्थौ परस्परसापेक्षौ हेतुभावं भजतः यथा विज्ञारप्रकाशयंति ते विदुषां सुधीनि साविमर्त्रियान् पशु
नाप्युपास्तेन तमस्तुलनामिति वामरेणाक्रः अत्र वामरस्य पदमयंनीकृतलभारसाम्याभावे विदुषां समुदितयानित्यंतिम
निवाक्यार्थः पशुनाप्युपास्तेनेति पदार्थश्चोभयंमिलितेहेतुः क्वचित्समर्थनीयार्थसमर्थनायैवाक्यार्थपदार्थौ हेतुः। य

राम

गिरिस्थितेन स्वस्य काकतालीयन्यायेनापतितस्य तत्सौकर्याधायकत्वमात्रः मध्योदाहरणे तूत्कण्ठितत्वस्यैव विषयाभिसरणे पु
ष्कलकारणत्वं न्धकारमपेक्षते अन्यारूढे हि नारीणाम्काले ततोऽन्यतोऽप्यवश्यनियताया दैवादापतनात्त्वन्धकारेण न सौकर्यमा
त्रहेतुत्वमिति एवं द्वितीयेऽपि योज्यम्। प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः जैत्रनेत्रानुगौ कर्णोत्पलाभ्यामधःकृतौ। यथा वा मम
रूपकान्तिमहरस्तु विषयलदत्तु प्रविष्टहृदये मिति त्वयि मत्स्मरादिव निरस्तदयः श्रुतसंनिवेशो निरवद्युं नोमदनः एवं बलव
ति प्रतिपक्षे प्रतिकर्तुमशक्तस्य तदीयबाधनं प्रत्यनीकमिति श्लिष्टेनासामान्यनिपक्षेपराक्रमः प्रत्यनीकमिति केचित्प्रतिकन्या
येन फलति यथा मधुव्रतौघः कुपितः स्वकोपमधुसम्पातपतिमीलनेन विंबसमाक्रम्य बलात्तद्योषितोः कलङ्कमङ्के ध्रुवमान
नोति। कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहां अत्र सरस्यनेन पद्यानि येन जितानी
ति विवक्षितं तन्मयावसोऽपि येन निर्जितस्तेन पद्मानि जितानीति किं प्रवक्तव्यमिति दण्डापूपिकान्यायेन पद्मजयरूपस्यार्थस्य सिद्धिः
काव्यार्थापत्तिः तान्त्रिकार्थापत्तिव्यावर्तनाय काव्येति विशेषणं यथा वाधरोऽयमधीराक्ष्या बन्धुजीवप्रभाहरः अन्यजीवप्रभां हन्त हर

तद्देवरूपादिकमपि तत्साधनत्वेनावमराति यथा वा प्रदानप्रछन्नं गृहमुपगते संभ्रमविधिर्निरुत्सेको लक्ष्म्यामनभिभ
वगंधाः परकथाः प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः श्रुतेत्यंतासक्तिः पुरुषमभिजातप्रथयति। क्रमिकैकगतानां
तु गुंफः कारकदीपकं गछत्यागछति पुनः पांथः पश्यति पृछति यथा वा निद्राति स्नाति भुंक्ते चलति कचभरान् शोषयत्यंतरास्ते दी
व्यत्यक्षैर्नवायं गदितुमवसरो भूय आयाहि याहि इत्थं दंडैः प्रभूणामसकृदधिकृतैर्वारितान्द्वारि दीनानस्मान्पश्याब्धिकन्ये सरसि
रुहदलवामंतमरगैरपांगैः अत्राद्योदाहरणे तस्य पांथस्य कर्तृकारकस्य गमनादिष्वन्वयः द्वितीये त्वध्याहृतस्य प्रभोः कर्तृकारक
स्य निद्रादिष्वन्वयः एकस्यानेकवाक्येष्वन्वयेन दीपकछायापत्त्या कारकदीपकं प्रथमसमुच्चयप्रतिद्वंद्वीदं समाधिः कार्यसौ
कर्यं कारणांतरसन्निधेः उत्कंठितां च तरुणीं जगामास्तं च भानुमान् यथा वा मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः उपका
रादिष्ट्येदमुदीर्णं घनगर्जितं केनचिदारब्धस्य कार्यस्य कारणांतरसंनिधानाद्यत्सौकर्यं तत्समाधानात्समाधिः द्वितीयसमुच्चय राम
प्रतिद्वंद्वायं समाधिः तत्र बहूनां प्रत्येकं समर्थानां खलेकपोतिकान्यायेन युगपत्साधनार्थमवतारः अत्र त्वेकेन कार्ये समा

तंक्लिष्टैर्भवेन सघः शिरांसि वा पादान्वा नमयंतु महीभुजः । अत्र संधिविग्रहप्रमाणमात्रयोः शिरक्षापनमनयोर्यौगपद्य
स्थितयोर्यौगपद्यस्यकर्त्तुमशक्यो विकल्पः । यथा वा पतन्त्याधिरनेवाधिन्तेति चकलापिनः । अपकार्त्तिः कृतानेवाजुःस्वास्या
नेकश्चिति । म्रियस्वागमनं वेत्र मरणमाशंसनीयं मरणेनुनाम्रियस्व ममागमसंभवइति तयोराशंसायां विकल्पः । बहूनां यौ
गपद्यभाजां गुंफः समुच्चयः नश्यंति पश्चान्नश्यंति नश्यंति वसवद्विषः । अविरोधेन संभावितयौगपद्यानां गुंफनं समुच्च
यः । यथा वा विप्रास्ताहृदये त्वयाविनिहितं प्रेमाभिधानं नवं शल्यं यद्विदधाति साविधुरिता साधो मदाकर्ण्यतां शोते शुभ्रति
नामति प्रलपति प्रम्लायति प्रेरयति भ्राम्यत्युल्लुठति प्रणश्यति गलत्युन्मूर्छति त्रुट्यति । अत्र कामो विक्रियाणां किंचित्का
लभेदसंभवेपि शतपत्रपत्रशतभेदन्यायेन यौगपद्यं विवहितातिशयपोननाय विवक्षितमिति लक्षणानुगतिः । अहंप्रा
थमिकाभाजामेककार्यान्वयेपि संकलं रूपं वयोविबाधनं चमदयमप्राय त्रैकः कार्यसिद्धिहेतुत्वेन प्रक्रांतस्तत्रान्ये
पि च यदहमहमिकया खलेकपोतिकान्यायेन तत्सिद्धिं कुर्वंति सोपि समुच्चयः । यथा मदेऽस्याभिजात्यमेकसमयं कारणं

२९

यो प्रापच्छ्रित्वा वसुधामशेषां छायासु विश्रम्य ततस्तरूणाम् प्रोड्डीयते संप्रति तिग्मभानौ शैत्यं शनैरन्तरयामयासीत् अत्रौ
त्यस्योत्तरोत्तरमाधारसंकोचात्संकोचपर्यायः विकाशपर्यायो यथा विंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत अधुना मृगशावा
क्षि हृदयेप्येष दृश्यते अत्र रागस्य पूर्वाधारपरित्यागेनाधारान्तरसंक्रमणमिति विकाशपर्यायः एकस्मिन्यद्यनेकं वा पर्यायः
सोपि संमतः अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि यथा वा पुराभूदस्माकं प्रथममविभिन्ना तनुरियं ततो नु त्वं प्रेयान्वयम
पि हताशाः प्रियतमाः इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं हतानां प्राणानां कुलिशकठिनानां फलमिदम् अत्र दं
पत्योः प्रथममभेदः ततः प्रेयसीप्रियतमभावः ततो भार्यापतिभावः इत्याधेयपर्यायः परिवृत्तिर्विनिमयो न्यूनाभ्यधिक
योर्मिथः जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियम् यथा वा तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यते
धुना येन जर्जरकलेवरव्ययात्क्रीतमिन्दुकिरणोज्ज्वलं यशः परिसंख्या निषिध्यैकमेकस्मिन् वस्तुयन्त्रणम् स्नेहक्षयः
प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् यथा वा विलंघयन्ति श्रुतिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि बिभर्ति यस्यामपि
वक्रिमाणमेको महाकालजटार्धचन्द्रः आद्योदाहरणे निषेधः शाब्दः द्वितीये त्वार्थः विरोधे तुल्यबलयोर्विकल्पः

श्लाघ्यगुणोत्कर्षः अश्लाघ्यगुणोत्कर्षो यथा तृणाल्लघुतरस्तूलस्तूलादपि च याचकः वायुना किं न नीतोसौ मामयं प्रार्थये
दिति उभयरूपो यथा गिरिर्महान् गिरेरब्धिर्महानब्धेर्नभो महत् नभसोपि महद्ब्रह्म ततोप्याशा महीयसी तत्र जलपर्यन्तं महत्त्वं श्ला
घ्यगुणः ब्रह्मान्तार्थाशायामश्लाघ्यगुणः यथासंख्यं क्रमेणैवं क्रमिकाणां समन्वयः शत्रुं मित्रं विपत्तिं च जय रंजय भंजय य
थावा शरणं किं प्रपन्नानि विषवन्मारयन्ति च न त्यज्यन्ते न भुज्यन्ते कृपणेन धनानि यत् अमुं क्रमालंकार इति व्याज
रुः पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा अत्रैकस्याः कामिनीवदनप्रभायाः क्र
मेण पद्मचन्द्ररूपानेकाधारसंश्रयणं पर्यायः यद्यपि पद्मसंश्रयणं कण्ठतो नोक्तं तथापि मुक्त्वेति परित्यागोक्त्या प्राक् संश्र
यणाक्षेपेण पर्यायनिर्वाहः अत एव श्रोणीबन्धस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लो
चनाभ्याम् धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्त्रं त्वद्गात्राणां गुणविनिमयः कल्पितो यौवनेन इत्यत्र पर्यायं काव्यप्र
काशकार उदाजहार सर्वत्र शारदः पर्यायो यथा नन्वाश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा
प्रागर्णवस्य हृदये वृषलक्ष्मणोथ कण्ठेधुना वससि वाचि पुनः खलानाम् सर्वोप्ययं शुद्धः पर्यायः संकोचपर्यायो य

30

कु·नं
४५

रविशेषणाभावो वा गृहीतमुक्तरीतिः तत्राद्यप्रकार उदाहृतः द्वितीयो यथा दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते यत्रामुष्य
सुधीभवन्ति किरणा राशेः स यासामभूत् यस्तत्पित्तमुषः सुधोस्य हविर्यस्तस्य जीवातवे वोढा यद्गुणमेषमन्मथरिपोस्ताः पान्तु वो
मूर्त्तयः दीपकैकावलीयोगान्मालादीपकमिष्यते स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः अत्र स्थितिरिति पदमेकं स्मरेण तस्या
हृदये स्थितिः कृता तेन तस्या हृदयेन त्वयि स्थितिः कृतेत्येवं वाक्यद्वयान्वयि अतो दीपकं गृहीतमुक्तरीतिसद्भावादेकावली चेति
दीपकैकावलीयोगः यथा वा [redacted] संग्रामांगणमागतेन भवता चापे सम
मारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितम् कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं तेन त्वं भवता च कीर्त्ति
रतुला कीर्त्या च लोकत्रयम् अत्र येन येन सहसा यद्यत्समासादितमिति संक्षेपवाक्यस्थितमेकं समासादितपदं कोदण्डेन
शरा इत्यादिषु सर्वेष्वपि विवरणवाक्येषु तदुचितलिंगवचनविपरिणामेनान्वेति इति दीपकं शरादीनामुत्तरोत्तरविशेषणभावा
देकावली चेति दीपकैकावलीयोगः उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते मधुरं मधु तस्माच्च सुधा तस्याः कवेर्वचः य
था वा अन्तर्विष्णोस्त्रिलोकी निवसति फणिनामीश्वरे सोपि शेते सिंधोः सोप्येकदेशे तमपि चुलुकयां कुंभयोनिश्चकार
धत्ते षद्योतलीलामयमपि नभसि श्रीनृसिंह क्षितीन्द्र त्वत्कीर्त्तेः कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं विभाति अयंश्ला

राम
४५

नं क्रियते चेत्स व्याघातः यद्वा यत्साधनतया केनचिदुपात्तं तदन्येन तत्प्रतिद्वंद्विना विरुद्धसाधनं क्रियते चेत्सोपि व्याघातः तत्राद्य
उदाहृतः द्वितीयो यथा दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः सौकर्येण निब
द्धापि क्रिया कार्यविरोधिनी इत्यावेद्यालङ्कृतिमप्यपरे व्याजह्रुः एवं ते कार्यविशेषनिष्पादकतया केनचित् संभाव्यमानादुपाद
नेन कार्यविरोधिनी क्रिया सौकर्येण समर्थ्यते सोपि व्याघातः कार्यविरुद्धक्रियायां सौकर्यं कारणस्य सुतरां तदानुगुण्यं यथा जे
याज्ञोनुस्वेन राज्ञा युवराजस्य सर्प एव स्थापने यत्कारणत्वेन संभावितं बालत्वं मन्तुनतद्विरुद्धस्य सहनस्य तस्यैव कारणतया प्रागु
दराजेन परित्यागस्यायुक्ततं शापता समर्थ्यते यथा वा लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया दातापि विसृजत्यर्थं तयैव न
नु शंकया अत्र पूर्वोत्तरार्द्धे पक्षप्रतिपक्षनिरूपणयोर्वचनेष्विति लक्षणानुगतिः गुंफः कारणमाला स्याद्यथाप्राक्प्रान्तका
रणैः नयेन श्रीः श्रियास्त्यागस्त्यागेपि विपुलं यशः उत्तरोत्तरकारणभूतपूर्वपूर्वैः पूर्वपूर्वकारणभूतोत्तरोत्तरैर्वा वस्तुभिः
कृतो गुंफः कारणमाला आद्योदाहृता द्वितीया यथा भवन्ति नरकाः पापात्पापं दारिद्र्यसंभवम् दारिद्र्यमप्रदानेन
तस्माद्दानपरो भवेत् गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता नेत्रे कर्णान्तविश्रान्ते कर्णौ दोस्तम्भदोलितौ दोस्तम्भौ
जानुपर्यन्तप्रलंबनमनोहरौ जानुनी रत्नमुकुराकारे तस्या हिमभुजः उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः पूर्वस्योत्तरोत्त

पिस्र्यैर्दीपस्तास्तमभ्भिन्दन्तितत्कराः यथावा कमलमनंभसिकमलेकुवलयेतानिकनकलतिकायाम् साचसुकुमारसु
कुं. नं. भगेत्युत्पातपरंपराकेयम् अत्राद्येसूर्यस्यप्रसिद्धाधारस्याभावेपितत्कराणामवस्थितिरुक्ता द्वितीयेसलिलस्यप्रसिद्ध
४४ धारस्याभावेपिकमलकुवलययोरन्यत्रावस्थितिरुक्ता क्वचित्प्रसिद्धाधाररहितानांसाधारान्तरनिर्देशंविनैवाप्रलयमवस्थि
तिर्वर्णिता यथा दिवमप्युपयातानामाकल्पमनल्पगुणगणायेषाम् रमयन्तिजगन्तिगिरः कथमिहकवयोनतेवन्द्याः
अत्रकवीनामभावेपितद्गिरामाधारनिर्देशंविनैवाकल्पमवस्थितिरुक्ता द्वितीयः सोपियद्येकंवस्त्वनेकत्रवर्ण्यते अन्तर्बहि
पुरःपश्चात्सर्वदिक्ष्वपिसैवमे यथावा हृदयान्नापयातोसिदिक्षुसर्वासुदृश्यसे वत्सरामगतोसीतिसंतापेनानुमीयसे
किंचिदारंभतोऽशक्यवस्त्वन्तरकृतिश्चसः त्वांपश्यतामयालब्धंकल्पवृक्षनिरीक्षणम् यथावा स्फुरदद्भुतरूपमुत्प्रतापज्व राम
लनंत्वांसृजतानवद्यविद्यम् विधिनाससृजेनवोमनोभूर्भुविसत्यंसविताबृहस्पतिश्च अत्राद्येराजदर्शनारम्भेणकल्पवृक्ष ४४
दर्शनरूपाशक्यवस्त्वन्तरकृतिर्द्वितीयेराजसृष्ट्यारंभेणमनोभवादिसृष्टिरूपाशक्यवस्त्वन्तरकृतिः स्याद्व्याघातोन्य
थाकारितथाकारिक्रियेतचेत् यैर्जगत्प्रीयतेहंतितैरेवकुसुमायुधः जगत्साधनत्वेनलोकेवगतंतत्केनचिद्विरुद्धसाध

त्वमितिचाधारयोःप्रशंसाक्रियतेतिवाच्यमुक्त्वैवसिद्धवत्कृतयोःशब्दब्रह्मभुवनोदरयोर्गुणयशोराश्यधिकरणत्वेनाधिक्यं
कल्पयित्वैवप्रशंसाक्रियतइतितत्प्रशंसाप्रस्तुतगुणयशोराशिप्रशंसायामेवपर्यवस्यति अल्पन्तुसूक्ष्मादाधेयाद्यदाधा
रस्यसूक्ष्मता मणिमालोर्मिकातेद्यकरेजपवटायते अत्रमणिमालामयोर्मिकातावदंगुलिमात्रपरिमितत्वात्सूक्ष्मासापि
विरहिण्याकरेकंकणवत्प्रवेशितातस्मिन्जपमालावद्भंवतइत्युक्त्याततोपिकरस्यविरहकार्श्यादतिसूक्ष्मतादर्शिता य
थावा यन्मध्यदेशादपितेसूक्ष्मंलोलाक्षिदृश्यते मृणालसूत्रमपितेनैवमातिस्तनान्तरे अन्योन्यंनामयत्रस्यादुप
कारःपरस्परम् त्रियामाशशिनाभातिशशीभातित्रियामया यथावा यथोर्ध्वाक्षःपिबत्यंबुपथिकोविरलांगुलिः
तथाप्रपापालिकापिधारांवितनुतेतनुम् अत्रप्रपापालिकायाःपथिकेनस्वासक्त्यापानीयदानव्याजेनचिरकालंस्व
मुखावलोकनमभिलषंत्याविरलांगुलिकरणतश्चिरंपानीयपानानुवृत्तिसंपादनेनोपकारःकृतः तथाप्रपापालिक
कयापिस्वमुखावलोकनमभिलषतःपथिकस्यधारातनूकरणतश्चिरंपानीयदानेनोपकारःकृतः अत्रोभयो
र्व्यापाराभ्यांस्वस्वोपकारसंभवेपिपरस्परोपकारेणनिवर्त्तते विशेषःख्यातमाधारंविनाप्याधेयवर्णनम् गते

32

नखलुकर्तव्यमितिपित्रासमीरितः सदेवशास्यं कृतवान्पितुराज्ञानलंघिमी: अत्रपितुराज्ञानलंघितेत्यत्रविरोधालंकाराभिव्यक्त्य
र्थंनखल्वित्यत्रपदद्वयविभागात्मकरूपान्तरस्यापिविवक्षायाः सत्वेपिनखलुनात्तीतिनखल्वित्येकपदत्वेनवस्तुसदर्थान्त
रपररूपांतरमादायसमालंकारोप्यस्त्येवश्लेषलक्ष्यासद्दिष्टावास्तिप्रतीतिमात्रेणापिगतमुदाहरणम् यथा सत्यंनपः सुग
त्येयलत्त्वांवृषुरविजतीक्षंसत् अनुभवतिसुगतिमनुंत्वत्पदजन्मनिस्समस्तकमनीयं विचित्रंतत्रयत्नश्चेद्विपरीतः फलेच्छया·
नमंतिसंतस्त्रैलोक्यादपिलघुंसमुन्नतिम् यथावा मलिनयितुंखलवदनंविमलयतिजगंतिदेवकीर्तिस्ते मिगाल्हादंक
र्तुमित्रापकुलंतिप्रतापस्ते अधिकंपृथुलाधाराद्आधेयाधिक्यवर्णनं गङ्गाम्भांसिजलेयत्रतत्रमांतिनतेगुणाः अत्रयत्र
महाजलौघेनंतानिमग्नाण्यानिगुरुदायमानानीत्याधारस्यापिविशालत्वंप्रदर्श्यतत्रनमान्तीत्याधेयानांगुणानामाधिक्यं
वर्णितं यथावा युगान्तकालप्रतिसंहृतात्मनोजगंतियस्यांसविकाशमासत तनौममुस्तत्रनकैटभद्विषस्तपोधनाभ्याग
मसंभवामुदः पृथ्व्याधेयाद्यदाधाराधिक्यंतदपितन्मतम् कियद्वाग्ब्रह्मयत्रैतेविश्राम्यन्तिगुणास्तव अत्रैतदितिप्रत्यस
ददमहावैभवत्वेनोक्तानांगुणानांविश्राम्यन्तीत्यसंबाधावस्थानोक्त्याआधारस्यवाग्ब्रह्मणआधिक्यंवर्णितम् यथावा
अहोविशालंभूपालभुवनत्रितयोदरं मातिमातुमशक्योपियशोराशिर्यदत्रते यद्यप्यगोदाहरणेद्येकियद्वाग्ब्रह्मअहोविशा

हृत्वा हत्वा कृतभुजा हन्त हस्तावलंबो वा ल्येशम्भोर्निर्दिलमहसा वक्रमैत्री निरूढः प्रोढो राहोरपि भ्रुकुटिकैरंतरङ्गीकृतो यः सो
यन्न कुस्तपति किरणौ मामिति प्रापमेतत् पूर्वंग्र कारणस्वभावानुरूपं कार्यस्य अयत्त्यागं तु कतरदीयदुष्टसंसर्गानुरूपत्वमि
तिभेदः विनानिष्टमत्पसिद्धिर्यदर्थकर्तृमुद्यतः शुक्लो वारणान्ना भोर्यस्यान्न ते वारणार्थिनः इदं सममनिष्टस्याप्यवाप्ति
श्चेति अपि संगृहीतस्य त्रिविधस्यापि विषमस्य प्रतिद्वंद्वि इष्टावाप्तेरनिष्टस्याप्रसंगाच्च अवगजार्पितया राजानमनुस
रंतं दौवारिकैर्वार्यमाणं प्रति नर्मवचनमुदाहरणम् यथा अनिवारणमनिष्टमापन्नमित्यनुदाहरणत्वमाशङ्कनीयम् रा
जद्वारि स्खलनं निवारणं संभावितमिति तदंगीकृत्य प्रवृत्तस्य विषमालंकारोदाहरणे विधातर्कितोत्कटानिष्टवास्सभावा
ते किंच यत्रोत्कटानिष्टसत्वेपि श्लेषमहिम्नेष्टार्थप्रतीतिस्तत्रापि समालंकारोऽप्रतिहतएव यथा उच्चैर्गजैरटनमर्थय
माने एव त्वामाश्रयन्निह चिराडुषितो स्मि राजन् उच्चाटनं त्वमपि लंभयसे तदेवमामद्य नैव विफला महतां हि सेवा अत्र व्या
जस्तुतौ यद्यपि स्तुत्या निन्दाभिव्यक्तिविवक्षायां विषमालंकारस्तथापि प्राथमिकस्तुतिरूपवाच्यकक्षायां समालंकारो
ने निवार्यते एवमिष्टार्थावाप्तिसत्वेपि श्लेषवशादसतोनिष्टार्थस्य प्रतीतिस्तत्राप्यस्यालंकारस्य न क्षतिः यथा शास्त्रं

33

चन्द्रप्रसादनार्थं चन्द्रस्य पूर्णरूपं च परिकल्प्यैतावतापि प्रयत्नेन पौर्णमास्यामेव भगवन्मुखसाम्य पश्चादपि जायते न सार्वकालि
कीतिदर्शितम् क्वचिद्दिष्टानवाप्तावपि तदवाप्तिभ्रमनिबन्धनविच्छित्तिविशेषो यथा वल्लालक्षोणिपाल त्वदहितनगरे
संचरंती किराती कीर्णान्यादाय रत्नान्युरुतरखदिराङ्गारशंकाकुलाङ्गी क्षिप्त्वा श्रीखण्डखण्डं तदुपरि मुकुलीभूतनेत्रा
धमंती श्वासामोदप्रसक्तैर्मधुकरपटलैर्धूमशंकां करोति अत्र भ्रमभूताग्निसंपादनोद्योगात् तत्संपादनालाभे तेन भ्र
भ्रमो धूमभ्रमोपन्यासेन निबद्धः समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः स्वानुरूपं कृतं स— हारेण कुचमंडलम् अथ मवि
षमप्रतिद्वन्द्वीदं समं यथा वा कोमुदीव तुहिनांशुमण्डलं त्वं जाह्नवीव शशिखण्डमण्डनम् यश्पकीर्त्तिरनुरूपमाश्रिता त्वां विभाति
नरसिंह भूपते यथा वा चित्रं चित्रं वत वत महच्चित्रमेतद्धि चित्रं जातो दैवादुचितरचनासंविधाता विधाता यन्निंबानां
परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलनकलाकोविदः काकलोकः पूर्वे स्तुतिपर्यवसायी इदं तु निन्दापर्य
वसायीति भेदः सारूप्यमपि कार्यस्य कारणेन समं विदुः नीचप्रवणता लक्ष्मीर्जलजायास्तवोचिता इदं द्वितीयवि
षमप्रतिद्वंद्विसमं दवदहनादुत्पन्नो धूमो घनतामुपेत्य वर्षैस्तम् यच्छमयति तद्युक्तं सोपि हि दवमेव विनिहन्ति यथा वा आरो

रव्यः परपत्नमौत्थं मे विपाकं वा विधेरमुम् तस्मिन्नेव लयं गतेति इत्यानायकेस्वाछंद्यं दर्शितम्· यथा वा नपुंसकमिति ज्ञात्वा
प्रियायै प्रेषितं मनः तत्तु तत्रैव रमते हताः पाणिनिना वयम् एतानि सर्वथैवेष्टानवाप्त्युदाहरणानि· किंचिदिष्टावाप्तिपूर्व
कं तदनवाप्तिर्यथा मदीयवरदराजस्तवे भानुर्निशासु भवदंघ्रिमयूखशोभालोभात्स्वताप्यकिरणोत्करमाऽप्रभातम् तत्रोडु
तेष्वतवहास्क्षणतालुसरागेतापं भजत्यनुदिनं सहिमन्दतापः यथा वा त्वद्वक्त्रसाम्यमयमंबुजकोशमुद्राभंगानततस्पुमसिचेक
रोपकृत्या लब्ध्वापि पर्वणि विधुः क्रमहीयमानः शंसत्यनीत्युपचितां श्रियमाशु नाशम् अत्राद्यश्लोके सूर्यकिरणा
नां रात्रिष्वग्नौ प्रवेशनमागमसिद्धम्· सूर्यस्य निजकिरणेषु भगवतश्चरणारुणिमप्रेक्षयानत्कृतं तेषामग्नौपरिकल्प्य
तेषामुदयकालऽप्यरुणिमानं च तप्तलोहनाराचानामिवाग्निसंतापनप्रयुक्तारुणिमानुवृत्तिं परिकल्प्य सूर्यस्य मह
तापि यत्नेन तात्कालिकेष्टावाप्तिरेव जायते न सर्वकालिकेष्टावाप्तिरिति दर्शितम् द्वितीयश्लोके चन्द्रस्य भगवन्मुखलक्ष्मी
मीहमानस्य सुहृत्त्वेन मित्रशब्दश्लेषवशात्सूर्यं परिकल्प्य तत्किरणस्य कमलमुकुलविलासकस्य चन्द्रानुप्रवेशं चसुह
त्याणो भगवन्मुखलक्ष्मीनिधानगृहकोशमुद्रामोचनपूर्वकं ततो गृहीतभगवन्मुखलक्ष्मीकस्य तया भगवन्मुखलक्ष्म्या

कु· नं दमर्पयितुमिच्छसि वापिकायाम् कालः कलिर्जगदिदं न कृतज्ञमज्ञे स्थित्वा हरिष्यति तवैव मुखस्य लक्ष्मीम्· अत्र प
४१ द्मातपत्रलिप्सया पद्मबीजावापं कृतवत्यास्तल्लाभोस्त्वेव किन्तु मुखशोभाहरणरूपोत्कटानिष्टप्रतिलंभः केव
लेष्टानवाप्तिर्यथा खिन्नोसि मुंच शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः भरभुग्नविततबाहुषु गोपेषु हसन्हरि
र्जयति· अत्र यद्यपि शैलस्योपरि पतनरूपानिष्टावाप्तिप्रसक्ता तथापि भगवत्कराम्बुजस्पर्शमहिम्ना सा न जातेति
शैलधारणरूपेष्टानवाप्तिमात्रं यथा वा लोके कलंकमपहातुमयं मृगाङ्को जातो मुखं तव पुनस्तिलकच्छलेन· त
त्रापि कल्पयसि तन्वि कलंकरेखां नार्यः समाश्रितजने हि कलंकयन्ति अत्रानर्थपरिहाररूपेष्टानवाप्तिः यथा
वा शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोयम् कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो बीज
प्ररोहजननीं दहनः करोति अत्र परानिष्टप्रापणरूपेष्टानवाप्तिः स्वतोनिष्टस्यापि मुनिशापस्य महापुरुषार्थपु
त्रलाभावहं भावगर्भतया दशरथेनेष्टत्वेन स्वीकृतत्वात् यत्र केनचित्स्वेष्टसिध्यर्थं प्रेषितेनान्येन नियोक्तुरिष्टमु राम
पेक्ष्य स्वस्यैवेष्टं साध्यते तत्रापीष्टानवाप्तिरूपमेव विषमम् यथा तं प्रति प्रेषितासि दूती तस्मिन्नेव लयं गता स ४१

स्यानिष्टस्यापिप्रतिलंभश्चेद्विषमं· यथाभक्षप्रे—पासर्पपेटिकांदृष्ट्वाप्रविष्टस्यमूषकस्यनकेवलंभक्ष्याला
भः किन्तुस्वरूपहानिरपीति· यथावा· गोपालःनिरुध्यमान्त्वंवत्सुरक्षीरयाञ्चया पीतोमातुःस्तनक्षीमप्य
लभ्यंत्वयाकृतम् इदमर्थावाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तावनिष्टप्रतिलंभेचोदाहरणं अनर्थपरिहाररू
पेष्टार्थसमुद्यमात्तुभयं यथा दिविश्रितवतश्चन्द्रंसैंहिकेयभयाद्भुवि शशस्यपश्यतन्वह्निःसाश्रयस्ततोभय
म् अत्रनकेवलंशशस्यस्वानर्थपरिहारानवाप्तिः किन्तुस्वाश्रयस्याप्यनर्थावाप्तिश्चेतिदर्शितम्· परानिष्टरूपे वाप्ति५
ष्टार्थसमुद्यमात्तुभयंयथा दिधक्षन्मारुतेर्वालंतंमारीप्यदशाननः आत्मीयस्यपुरस्यैवसद्योदहनमन्वभू
त्· पुरस्यैवेत्येवकारेणपरानिष्टप्राप्त्यभावोदर्शितः अनिष्टस्याप्यवाप्तिश्चेतिश्लोके इष्टानवाप्तेरपिअर्थ
संगृहीतत्वेनेष्टानवाप्तिश्चेतिप्रत्येकमपिविषमपदेनान्वयः ततश्चकेवलानिष्टप्रतिलंभःकेवलेष्टानवाप्ति
श्चेत्यन्यदपिविषमद्वयंलक्षितंभवति· तत्रकेवलानिष्टप्रतिलंभोयथा पत्रातपत्ररसिकेसरसीरुहस्यकिंके

यमपारिजातत्वंद्दि विकृतंभित्येऽ संगतिः पुरागोत्राया उद्धारे प्रवृत्तेन वराहरूपिणा तद्विरुद्धं गोत्राणां दलनं खुरकुट्टनैः क्षतमिति
द्वितीया· द्विविधापि श्लेषोत्थिता· यथावा· त्वत्खड्गखंडितसपत्नविलासिनीनां भूषाभवन्त्यभिनवाभुवनैकवीर· नेत्रेषुकंक
णमथोरुषुपत्रवल्लीचोलेन्द्रसिंह तिलकंकरपल्लवेषु· मोहंजगत्त्रयभुवामपनेतुमेतदादायरूपमखिलेश्वर देहभाजाम्· निःसी
मकांतिरसनीरधिनामुनैवमोहंप्रवर्द्धयसिमुग्धविलासिनीनाम्· अत्राद्योदाहरणेकंकणादीनामन्यत्रकरणीयत्वंप्र
सिद्धमितिनोपन्यस्तं· भवतिनाभावनारूपाऽन्यत्रकृतिराक्षिप्यतइतिलक्षणानुगतिः·· विषमंवर्ण्यतेयत्रघटनाननुरूप
योः· क्वेयंशिरीषमृद्वङ्गीक्वतावन्मदनज्वरः· अत्रातिमृदुत्वेनातिदुःसहत्वेनचाननुरूपयोरंगनामदनज्वरयोर्घटना· यथा
वा अभिलषसियदिन्दोवक्त्रलक्ष्मींमृगाक्ष्याः पुनरपिसकृदब्धौमज्जसंक्षालयांकं· सुविमलमथविंबंपारिजातप्रसूनैःसुर
भयवदनोचेत्त्वंक्वतस्यामुखंक्व· पूर्वत्रवस्तुसतीघटना अत्रचन्द्रवदनलक्ष्म्योःसंभाविताघटनेतिभेदः· विरूपकार्यस्योत्पत्तिर
परंविषममतं· कीर्तिंप्रसूतेधवलांश्यामातवकृपाणिका· अत्रकारणगुणप्रक्रमविरुद्धाश्यामाधवलोत्पत्तिः· कार्यकार
णयोर्निर्वर्त्यनिवर्तकत्वेपंचमीविभावना· विलक्षणगुणशालित्वेऽप्ययंविषमइतिभेदः· अनिष्टस्याप्यवाप्तिश्चतदिष्टार्थसमु राम
द्यमात्· भक्ष्याशयाहिमंजूषांदृष्ट्वाखुस्तेनभक्षितः· इष्टार्थमुद्दिश्यकिंचित्कर्मारभ्यतेतस्मान्नकेवलमिष्टस्यानवाप्तिःकिन्तुतत

कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना· यथाः पयोधिरभवत्करकल्पतरोस्तव· यथावा· जाता लता हि शैले जातु लतायां न जायते
शैलः· संप्रति तद्विपरीतं कनलतायां गिरिद्वयं जातम्· कार्याजनि विशेषोक्तिः सति पुष्कलकारणे· हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि·
यथावा· अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः· अहो दैवगतिश्चित्रा तथापि न समागमः·· असंभवोर्थनिष्पत्तेरसंभाव्यत्ववर्णनम्· को वेद गो
पशिशुकः· शैलमुत्पाटयेदिति· यथावा· अयं वारामेको निलय इति रत्नाकर इति श्रितोस्माभिस्तृष्णातरलितमनोभिर्ज्जलनिधिः· क एवं जा
नीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः·· विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः·· विषं जलधरैः पीतं मूर्छि
ता पथिकाङ्गना· यथाः कार्यहेत्वोर्भिन्नदेशत्वं विरुद्धं तयोस्तन्निबध्यमानमसंगत्यलंकारः· यथा विषपानमूर्छयोर्भिन्नदेशत्वं· यथावा·
अहो खलभुजङ्गस्य विपरीतो वधक्रमः· अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते· क्वचिदसंगत्यसमाधाननिबन्धने न चारुतातिशयः·
यथा· अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयां· श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतामवाप्य· विरुद्धमिति
विशेषणाद्यत्र कार्यहेत्वोर्भिन्नदेशत्वं न विरुद्धं तत्र नासंगतिः· यथा· भ्रूचापवल्लीं सुमुखी यावन्नयति वक्रताम्· तावत्कटाक्षविशि
खैर्भिद्यते हृदयं मम· अन्यत्रकरणीयस्य ततोन्यत्र कृतिश्च सा· अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा· अपारिजातां वसुधां चि
कीर्षन् द्यां तथाकृथाः· गोत्रोद्धारप्रवृत्तोपि गोत्रोद्वेगं पुराकरोः· अत्र कस्यांप्रति शक्रस्योपालम्भवने भुवि चिकीर्षितं तया तत्र करणी

लीमषट्पदा · वल्लर्यां पुष्पाभावेपि भृङ्गालिङ्गनं निबद्धं · अत्र वरतनुकबरीसंक्रान्तसौरभनरपतिनखसंसर्गरूपं हेत्वन्तरं विशेषणमुखेन दर्शितमिति विरोधपरिहारः · हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सामता · अस्त्रैरतीक्ष्णाकठिनैजगज्जयति मन्मथः · अत्र जगज्जेयसाध्ये हेतूनां अस्त्राणामसमग्रत्वं तीक्ष्णत्वादिगुणवैकल्य · यथावा · उद्यानमारुतोद्धूतचूतचंपकरेणवः उदस्रयन्ति पान्थानामस्पृशन्तो विलोचने · अत्र वाष्पोद्गमहेतूनां रेणूनामसमग्रत्वं स्पर्शनक्रियावैकल्यं · इमां विशेषोक्तिरिति दण्डी व्याजहार · यतः प्रथमोदाहरणे मन्मथस्य माहात्म्यातिशयरूपो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपनत्वातिशयरूपश्च विशेषः स्थापित इति · अस्माभिस्तु तीक्ष्णत्वादिवैकल्यमपिकारणवैकल्यमिति विभावना दर्शिता · कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबन्धके · नरेन्द्रानेव ते राजन्दशत्यसिभुजङ्गमः · · अत्र नरेन्द्रा विषवैद्याः सर्पदंशप्रतिबन्धकमंत्रौषधिशालिनः श्लेषेण गृहीता इति सत्येव प्रतिबन्धके कार्योत्पत्तिः · · यथावा · चित्रं तपति राजेन्द्र प्रतापतपनस्तव · अनातपत्रमुत्सृज्य सातपत्रं द्विषज्जनम् · अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना · शंखाद्वीणानिनादोयमुदेति महदद्भुतम् · अत्र शंखत्वेकामिनीकण्ठस्तन्त्रीनिनादत्वेन तद्गीतं चाध्यवसीयते इत्यकारणात्कार्यजन्म · विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना · शीतांशुकिरणास्तन्वीं हन्त संतापयन्ति ताम् · अत्र तापनिवर्त्तकतया तापविरुद्धैरिन्दुकिरणैस्तापजनिरुक्ता · यथावा · उदिते कुमारसूर्ये कुवलयमुल्लसति भाति नक्षत्रम् · मुकुलीभवन्ति चित्रं परराजकुमारपाणिपद्मानि · यथावा · अविवेकि कुचद्वन्द्वं हन्तु नाम जगत्त्रयम् · श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणम् · पूर्वोदाहरणयोः कारणविरोधित्वं स्वाभाविकमिह श्रुतिप्रणयित्वस्वरूपागन्तुकगुणप्रयुक्तमिति भेदः ·

सरूपः संघटनाकालोचितकैतववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन्निदानीमेवागत्य नायिकोज्जीवनीयेति विशेषमाक्षिपति॰ यथावा॰
नरेन्द्रमौले न वयं राजसंदेशहारिणः· जगत्कुटुंबिनस्ते घनशत्रुः कश्चिदिष्यते॰ अत्र संदेशहारिणो मुक्तौ न वयं संदेशहारिण इति निषेधोऽनुपपन्नः
संधिकालोचितकैतववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन् सर्वजगतीपालकस्य तव न कश्चिदपि शत्रुभावेनावलोकनीयः किन्तु सर्वेऽपि राजानो
ऽन्यभावेन संरक्षणीया इति विशेषमाक्षिपति॰ आक्षेपोन्यो विधौ व्यक्ते प्रतिषेधे तिरोहिते· गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्जनिर्मम॰ अ
त्र गच्छेति विधिर्व्यक्तः मा गा इति निषेधस्तिरोहितः कान्तोद्देशपदेशान्निजजन्मप्रार्थनया स्वस्या मरणसूचनेन गर्भीकृतः· यथावा· न चिरं म
मतापाय तव यात्रा भविष्यति· यदि यास्यसि यातव्यमलमाशङ्कयापि ते· अत्रापि न चिरं मम तापायेति स्वस्या मरणसूचनेन गमननिषेधो
गर्भितः· आभासत्वे विरोधस्य विरोधाभास इष्यते· विनापि तन्वि हारेण वक्षोजौ तव हारिणौ· अत्र हाररहितावपि हारिणौ हृद्याविति श्ले
षमूलको विरोधाभासः· यथावा· प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता· अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्
चारदृगप्यवर्तत॰ अत्र विरोधसमाधानो ऽश्लेषशिरस्को विरोधाभास इति पूर्वस्माद्भेदः· विभना विनापि स्यात्कारणं कार्यजन्म चेत्· अप्य
लाक्षारसासिक्तरक्तं त्वच्चरणद्वयम्· अत्र लाक्षारससेककारणाभावेऽपि रक्तिमा कथितः· स्वाभाविकत्वेन विरोधपरिहारः· यथावा· अपी
तक्षीवकादंबमसंमृष्टामलाम्बरम्· अप्रसादितशुद्धाम्बु जगदासीन्मनोहरम्॰ अत्र पानादिप्रसिद्धहेत्वभावेऽपि क्षीवत्वादि निबद्धं विभाव्यमान
शरत्समयहेतुकत्वेन विरोधपरिहारः· यथावा· वरतनुकबरीविधायिना सुरभिनखेन नरेन्द्रपाणिना· अवचितकुसुमापि वल्लरी समजनि वृन्तनि

धसाविनिहितस्तन्वीमिमां तन्वता · अत्राप्रस्तुतायास्तरुण्याः सृष्टिनिन्दाव्याजेन तन्निन्दाव्याजेन च तत्सौन्दर्यप्रशंसा प्रशंसनीयत्वेन क
विवक्षितायाः स्वकवितायाः सृष्टिनिन्दाव्याजेन तन्निन्दाव्याजेन च शब्दार्थचमत्कारातिशयप्रशंसायां पर्यवस्यति · अस्य श्लोकस्य वाच्या
र्थविषये यद्यपि नात्यन्तं सामंजस्यं · न हीमे विकल्पा वीतरागस्य तिकल्पयितुं शक्यन्ते रसाननुगुणत्वाद्वीतरागहृदयस्यैवंविधविषयेषु प्रवृत्तेश्च ना
पि रागिणा इति युज्यते · तदीयविकल्पेषु वराकीतिरूपणनालिंगितस्य हन्तेत्यमंगलोपहतस्य वचसोनुचितत्वात् · तुल्यमरणाभावादित्यस्या
त्यन्तमनुचितत्वाच्च · स्वात्मनि तदनुरूपत्वासंभावनायामपि रागित्वे हि पशुप्रायता स्यात् · तथापि विवक्षितप्रस्तुतार्थपरतायां न किंचिदसामं
जस्यं · अत एवास्य श्लोकस्याप्रस्तुतप्रशंसापरत्वमुक्तं प्राचीनैः वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपन्नेति · आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचा
रणात् · चन्द्र संदर्शयात्मानमथवास्ति प्रियामुखम् · अत्र प्रार्थितस्य चन्द्रस्य प्रियामुखसत्वेन कैमर्थ्यं विचार्याथवेत्यादिसूचितः प्रतिषेध आ
क्षेपः · यथा वा · साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः · यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणीभवन्ति · गृ
ह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम् · रत्नेषु लुप्तेषु बहुष्वमर्त्यैर रत्नाकर एव सिन्धुः · अत्रापि प्रथमश्लोकेन प्रार्थि
तस्य काव्यार्थचौरे रक्षितव्यत्वस्य स्वोल्लिखितवैचित्र्याणां समुद्गतरत्नजालवदक्षयत्वं विचिन्त्य प्रतिषेध आक्षेपः · निषेधाभासमाक्षेपं
बुधाः केचन मन्वते · नाहं दूती तनोस्तापस्तस्याः कालानलोपमः · केचिदलंकारसर्वस्वकारादय इत्थमाहुः न निषेधमात्रमाक्षेपः किन्तु यो
निषेधो बाधितः सन्नर्थान्तरपर्यवसितः कंचिद्विशेषमाक्षिपति स आक्षेपः · यथा हृत्वाउक्तो नाहं दूतीति निषेधो बाधितत्वादाभा

धरसौभाग्यातिशयस्फूर्तिर्व्यज्यते· निन्दाया निन्दया व्यक्तिर्व्याजनिन्देतिगीयते· विधेस्सन्निन्द्योयस्तेप्रागेकमेवाहरच्छिरः· अत्रहरनिन्दयावि
षमविपाकंसंसारंप्रवर्त्तयतोविधेर्निन्दाभिव्यंग्याव्याजनिन्दा· यथावा· विधिरेवविशेषगर्हणीयःकरटस्त्वंरटकस्तवापराधः· सहकारतरौच
कारयोसौसहवासंसरलेनकोकिलेन· अनस्तुत्या अन्यस्तुत्यभिव्यक्तिरितिपंचमप्रकारव्याजस्तुतिप्रतिद्वंदीभूतेयंव्याजनिन्दा· ननुयत्रा
न्यस्तुत्यान्यस्तुतिरन्यनिन्दयान्यनिन्दाचप्रतीयतेतत्रव्याजस्तुतिव्याजनिन्दालंकारयोरभ्युपगमेस्तुतिनिन्दारूपाप्रस्तुतप्रशंसोदाहर
णेष्वप्रस्तुतप्रशंसानवक्तव्या· तेषामपिव्याजस्तुतिव्याजनिन्दाभ्यांक्रोडीकारसंभवादितिचेत्· उच्यतेयत्राप्रस्तुतवृत्तान्तात्स्तुति
निन्दारूपात्तत्स्वरूपःप्रस्तुतवृत्तान्तःप्रतीयते· अन्तश्छिद्राणिभूयांसिकंटकाबहवोबहिरित्यादौनतुलब्धावकाशासारूप्यनिबन्ध
नाऽप्रस्तुतप्रशंसाऽत्रापिवर्त्तमानाननिवारयितुंशक्या· अन्यस्तुत्यान्यस्तुतिरन्यनिन्दयान्यनिन्देत्येवंव्याजस्तुतिव्याजनिन्देअ
पिसंभवतश्चेत्कामंतेअपिसंभवेतांनतस्याःपरित्यागः· यद्यपिविधिरेवविशेषगर्हणीयइतिश्लोकेविंनिन्दयातन्मूलककाकनि धि ५
न्दयाचाविशेषज्ञस्यप्रभोस्तेनचविद्वत्समतयास्थापितस्यमूर्खस्यचनिन्दापिप्रतीयतइतिसारूप्यनिबन्धनाऽप्रस्तुतप्रशंसाप्य
स्ति· तथापिसैवव्याजनिन्दामूलेतिप्रथमोपस्थितासापितत्रदुर्वारा· एवंचव्याजनिन्दामूलकव्याजनिन्दारूपेयमप्रस्तुतप्रशंसे
तिचमत्कारातिशयः· एवमेवव्याजस्तुतिमूलकव्याजस्तुतिरूपाप्रस्तुतप्रशंसादृश्यते· यथा· लावण्यद्रविणव्ययोनगणितःक्लेशो
महानर्जितःस्वच्छन्दचरतोजनस्यहृदयेचिन्ताज्वरोनिर्मितः· एषापिस्वगुणानुरूपरमणाभावाद्वराकीहताकोऽर्थश्चेतसिवे

कु·नं
३७

निन्द्राभिव्यक्तिर्यथा॰ यद्वक्रंमुहुरीक्षसेनधनिनांब्रूषेनचाटून्मृषानैषांगर्ववचःशृणोषिनचतान्प्रत्याशयाधावसि· कालेबालतृणानिखादसिपरंनिद्रासिनिद्रागमेतन्मेब्रूहिकुरङ्गकुत्रभवताकिंनामतप्तंतपः· अत्रहरिणस्तुत्याराजसेवानिर्विण्णस्यात्मनोनिन्द्राव्यज्यते· अयमप्रस्तुतप्रशंसाविशेषइत्यलङ्कारसर्वस्वकारः· तेनहिसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणानंतरंवैधर्म्येणापिदृश्यते· यथा· धन्याःखलुवनेवाताःकह्लारास्पर्शशीतलाः· राममिन्दीवरश्यामंयेस्पृशन्त्यनिवारिताः· अत्रवाताधन्याइत्यप्रस्तुतार्थाद्हमधन्यइतिवैधर्म्येणप्रस्तुतोर्थःप्रतीयतेइतिव्युत्पादितम्· इयमेवाप्रस्तुतप्रशंसानकार्यकारणनिबन्धनेतिदण्डी· यदाह· अप्रस्तुतप्रशंसास्यादप्रकाण्डेतुयास्तुतिः· सुखंजीवन्तिहरिणावनेष्वपरसेविनः· अर्थैरयत्नसुलभैर्जलदर्भाङ्कुरादिभिः· सेयमप्रस्तुतैवात्रमृगवृत्तिःप्रशस्यते· राजानुवर्त्तनक्लेशनिर्विण्णेनमनस्विनेति· वस्तुतस्त्वत्रव्याजस्तुतिरित्यप्युक्तंस्तुत्यानिन्दाभिव्यक्तिरित्यप्रस्तुतप्रशंसातोवैचित्र्यविषयविशेषसद्भावात्· अन्यथाप्रसिद्धव्याजस्तुत्युदाहरणेष्वप्यप्रस्तुताभ्यांनिंदास्तुतिभ्यांप्रस्तुतस्तुतिनिन्देगम्येतेइत्येतावताव्याजस्तुतिमात्रमप्रस्तुतप्रशंसास्यात्· एवंचानयाप्रक्रिययायत्रान्यगतस्तुतिविवक्षयान्यस्यस्तुतिःक्रियतेतत्रापिव्याजस्तुतिरेवान्यस्तुतिव्याजेनतदन्यस्तुतिरित्यर्थावगमसद्भावात्· यथा· शिखरिणिक्वनुनामकियच्चिरंकिमभिधानमसावकरोत्तपः· तरुणियेनतवाधरपाटलंदशतिबिंबफलंशुकशावकः· अत्रशुकशावकस्तुत्यानायिका

राम
३७

ष्टसाधनमितिभेदः· उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यांस्तुतिनिन्दयोः· ·कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं· साधुदूति पुनः साधुकर्त्तव्यं किमतः परम्· यन्मदर्थे विलूनासि दन्तैरपि नखैरपि· निन्दयास्तुतेः स्तुत्या निन्दाया वावगमनं व्याजस्तुतिः कः स्वधुनीत्युदाहरणे विवेको नास्तीति निन्दाव्याजेन गंगास्तुऽतिवदेवमहापातकिनोपि स्वर्गं नयतीति व्याजरूपया निन्दया तत्प्रभावातिशयस्तुतिः साधुदूतीत्युदाहरणे मदर्थमियं तं क्लेशमनुभूतवत्यसीति व्याजरूपया स्तुत्या मदर्थं न गतासि किंतु रन्तुमेव गतासि धिक्त्वां दूतिकाधर्मविरुद्धकारिणीमिति निन्दावगम्यते· यथा वा· कस्ते शौर्यमदो योद्धुं त्वय्येकं सप्तिमास्थिते· सप्तसप्तिसमारूढा भवन्ति परिपन्थिनः· ·अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतं देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति· गंगासागरमंबरं शशिकलानागाधिपः क्ष्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनम्॰ अत्राद्योदाहरणे सप्तसप्तिपदगतश्लेषमूलनिन्दाव्याजेन स्तुतिर्गम्यते· द्वितीयोदाहरणे सर्वज्ञः सर्वेश्वरोसीति राज्ञः स्तुत्या व्याजरूपया मदीयवैदुष्यादि दारिद्र्यादि सर्वं जानन्नपि वसुप्रदानेन रक्षितुं शक्तोपि मह्यं किमपि नो ददासीति निन्दा व्यज्यते· सर्वमिदं निन्दास्तुत्योरेकविषयत्व उदाहरणम्॰ भिन्नविषयत्वे निन्दया स्तुत्यभिव्यक्ति यथा· कस्त्वं वानर रामराजभवने लेखार्थसंवाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलङ्कापुरः बद्धो राक्षससुनुनेति वहुशः संताडितस्तर्जितः सव्रीडात्तपराभवो वनमृगः कुत्रेति न ज्ञायते· अत्र हनुमन्निन्दया इतरवानरस्तुत्यभिव्यक्तिः· ·स्तुत्या

कु·नं·
३८

याभिहितेनकारणंव्यंग्यंसम्यक्प्रदर्शितंतत्रलक्षणंलक्षणामचह्निस्वगतसायोजितं वाच्यादन्येनप्रकारेणव्यंग्येनोपलक्षितं
सद्यदभिधीयतेतत्पर्यायेणप्रकारान्तरेणव्यंग्येनोपलक्षितमुक्तमिति सर्वोप्ययंश्लेषः किमर्थमितितेनविभ्रमःदर्शितानिह्नि
गम्यस्यैवरूपान्तरेणाभिधानेवक्तृन्मुदाहरणानिचक्राभिधानस्वसभाज्ञयैवेतिप्राचीनोदाहरणमपिस्वरूपेणागम्यस्य
भगवतोरूपान्तरेणाभिधानसंभवात्तुयोजमेव यत्तुराहुशिरश्छेदावगमनंतत्रप्रागुक्तरीत्याप्रस्तुताङ्कुरएवप्रस्तुतेनराहोः
शिरोमात्रावशेषेणालिंगनवन्ध्यत्वापादनरूपेवाच्येभगवतोरूपान्तरेउपपादितेभगवद्रूपेणावगमनंपर्यायोक्तस्यविषयः
पर्यायोक्तंतदप्याहुर्यद्व्याजेनेष्टसाधनम्· यामिचूतलतांद्रष्टुंयुवाभ्यामास्यतामिह· अत्रनायिकांनायकेनसंगमय्यचूत
लतादर्शनव्याजेननिर्गच्छन्त्यासख्यात्मस्वाछन्द्यसंपादनरूपेष्टसाधनंपर्यायोक्तं· यथावा·देहिमत्कन्दुकंराधेपरिधान
निगूहितं·इतिविस्रंसयन्नीवींतस्याःकृष्णोमुदेस्तुवः·पूर्वत्रपरेष्टसाधनमत्रकन्दुकसद्भावशोधनार्थंनीवीविस्रंसनव्याजेनस्वे

राम
३८

नीत्यादि नन्वत्र कार्यस्य व्यवस्थितौ वेदत्वाद्याकारेणावगम्याऽऽववेदादयो व्यासप्रङ्गरवविन्नेयत्वाद्याकारेणाभिहिता

परं तु देवतासार्वभौमत्वस्फुटीकरणाय विशेषणविशेष्यभावव्यत्यासेन प्रतिपादिताः अलंकारसर्वस्वकृतापि पर्यायोक्तस्य

संप्रदायगतमिदमदमेव लक्षणमंगीकृतं गम्यस्यापि भंग्यंतरेणाभिधानं पर्यायोक्तमिति चक्राभिघातप्रसभाज्ञयैवच

कार यो राहुवधूजनस्य आलिंगनोद्दामविलासवंध्यं रतोत्सवं चुंबनमात्रशेषमिति प्राचीनं तदुदाहरणमन्यथापो

न्नितं राहुवधूगतेन विशिष्टेन रतोत्सवेन राहुशिरश्छेदः कारणरूपो गम्यत इति एवं च गम्यस्यैवाभिधानमिति लक्ष

णानुपपत्तिमाशंक्य गम्यस्यैवाभिधानायोगात्कार्यादिद्वारेणैवाभिधानं लक्षणे विवक्षितमिति लक्षणमपि क्लिष्टग

म्यायोजितं. लोचनकृतापि पर्यायोक्तं यदन्येन प्रकारेणाभिधीयत इतीदमेव लक्षणं स्वीकृत्य तदुदाहरणेव कार्येणश

फु. नं.
३५

पर्यायोक्तं तु गम्यस्य वचोभंग्यन्तराश्रयं नमस्तस्मैकृतौयेनमुधाराहुवधूकुचौ यदेवगम्यंविवक्षितंतस्यैवभंग्यन्तरेणविवक्षि
तरूपादपिवान्तरेणरूपान्तरेणाभिधानंपर्यायोक्तं उत्तरार्द्धमुदाहरणं अत्रभगवान्वासुदेवःस्वासाधारणरूपेणगम्यःरा
हुवधूकुचवैयर्थ्यकारकत्वेनरूपान्तरेणसएवाभिहितः यथावा लोकंपश्यतियस्यांघ्रिःसयस्यांघ्रिंनपश्यति ताभ्यामप्यपरि
च्छेद्याविद्याविश्वगुरोस्तव अत्रगौतमःपतंजलिश्चात्मासाधारणरूपाभ्यांगम्यौरूपान्तरेणाभिहितौ यथावा निवेद्यतांहंत
समापयंतौशिरीषकोशम्रदिमाभिमानं पादौकियद्दूरमिमौप्रयासेनिधित्सतेतुच्छदयंमनस्ते अत्रकियद्दूरंगमि
ष्यतिगम्यएवार्थोरूपान्तरेणाभिहितः यथावा वंदेदेवंजलधिशरधिंदेवतासार्वभौमंव्यासप्रष्ठाभुवनविदितायस्यवा
हाधिवाहाःभूषापेटीभुवनमधरंपुष्करंपुष्पवाटीशाटीपालाःशतमखमुखाश्चंदनद्रुर्मनोभूःअत्रयस्यवेदावाहाभुजंगमाभूषण

राम
३५

ण्योर्वदनसौंदर्यलहरीपरीवाहत्वोत्प्रेक्षणेन परिपूर्णत्वञ्च गम्यपरीवाहकारणीभूतालस्यानेऽमांती वदनसौंदर्यसमृद्धिः प्रतीय
ते साचिवर्णनीयत्वेन प्रस्तुतैव यथा वा भृंगासंगिमृणालकांडमयते भंगाविशेषांस्तवं नासामौक्तिकमिंद्रनीलसरणिं श्वासाः
न्तिलाग्राहते दन्ते यं हिमवालुकापि कुचयोर्धत्ते क्षणं दीपतां न स्नायः पतितांउवल्करतले धारांउसंलीयते स्वन्नतापिकाया विर
हासहत्वातिशयप्रकटनाय संतापवत्त्वकार्याणि मृणालमालिन्यादीन्यपि वर्णनीयत्वेन विवक्षितानीति तन्मुखेन संतापो वग
म्यः यत्र कार्यमुखेन कारणस्यावगतिरपि निबद्धा नत्रायमलंकारः किंत्वनुमानमेव यथा परिम्लानं पीनस्तनजघनसंगा
दुभयतस्तनोर्मध्यस्यांतः परिमिलनमप्राप्य हरितं इदं व्यस्तन्यासं प्रशिथिलभुजाक्षेपवलनैः कृशांग्याः संतापं वदति नलि
नीपत्रशयनं न तु प्रस्तुतकार्याभिधानमुखेन कारणगम्यत्वमपि प्रस्तुतानां कुरविषयस्थेन किं तर्हि पर्यायोक्तमित्याकांक्षायामाह

र्थव्यक्तिर्ध्वनिरेवेति वक्तत्वस्य यमलंकारो न ध्वनिरिति व्यवस्थापितं चित्रमिमांसायां तन्नीपोदाहरणस्य व्यंग्यस्यालंकारत्वेन कस्या
पि विवादः उक्तं हि ध्वनिकृता शब्दार्थशक्त्याक्षिप्तोपि व्यंग्योर्थः कविना पुनः यत्राविष्क्रियते स्वोक्त्या सैवान्यालंकृतिर्ध्वनेरिति ए
तेन सारूप्यनिबंधनानुदाहरणानि संबंधांतरनिबंधनान्यपि कथंचिद्वाच्यव्यंग्ययोः अस्फुटत्वलंभने नोदाहरणीयानीति
दिङ्मात्रमुदाह्रियते रात्रिः शिवा काचन संनिधत्ते विलोचने जागरणमग्रमन्ने समानधर्मोभयोः सकाशे सखा भविष्यसखि रे
णकश्चित् अत्र शिवसारूप्यमिव तदेकदेशतया तद्वाच्यं भाललोचनमपि शिवरात्रिमाहात्म्यप्रभवत्वेन वर्णनीयमिति
तन्मुखेन कृत्स्नं शिवसारूप्यं गम्यं यथा वा वहंती सिंदूरं प्रबलकबरीभारतिमिरद्विषां वृंदैर्वंदीकृतमिव नवीनार्ककिरणं
तनोतु क्षेमं नस्तव वदनसौंदर्यलहरी परीवाहस्रोतःसरणिरिव सीमंतसरणिः अत्र वर्णनीयत्वेन प्रस्तुतायाः सीमंतसर

मत्तानरजसंकलिकामकाले व्यर्थं करर्थं यत्नविं नवमल्लिकायाः अत्रापि ध्यानमध्येव रंनं भृगं प्रस्तुपालंभ इति वाच्यार्थस्यापि
प्रस्तुतत्वं इदं च प्रौढांगनासु विद्यमानासु बालिकां रतये ह्लेषायामिकामिति निश्चत्य तिकस्याश्चिद्विदग्धायाः वचनमिति तं प्रस्तु:
पालंभो द्योत्यते यथा वा कोशद्वन्द्वमियं दधाति नलिनी कादंबचंचुक्षतं धत्ते चूतलता नवं किसलयं पुंस्कोकिलास्वादितं इत्या
कर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेलान्तेन तिरोदधे स्तनतटं बिंबाधरं पाणिना अत्रेयमिनलिनीव्यक्तिविशेष
निर्देशेन दीर्घिकायास्तटइत्यनेन वाच्यार्थस्य प्रस्तुतत्वं स्पष्टं प्रस्तुतांतरद्योतनं तु स्वयमेव कविना विवृतमनुनराद्रें आद्यो
दाहरणयोरन्यापदेशध्वनिमाह लोचनकारः अप्रस्तुतप्रशंसायां वाच्यार्थोऽप्रस्तुतत्वादवर्णनीय इति तत्राभिधायामपर्य
वसितायां तेन[illegible]स्तुतार्थव्यक्तिरलंकारः इह तु वाच्यस्य प्रस्तुतत्वेन तत्राभिधायां पर्यवसितायामर्थसौंदर्यबलादभिमता

42

स्तुतांकुरोऽलंकारः उत्तरार्धमुदाहरणं इह प्रियतमेन साकमुद्याने विहरंती काचिद्भृंगं अन्येवाहेति वाच्यार्थस्य प्रस्तुतत्वं नवानामं
त्रणीयामंत्रणेन वाच्यासंभवादप्रस्तुतमेव वाच्यमिहस्वरूपप्रस्तुतावगतये निर्दिष्टमिति वाच्यं मौग्ध्यादिना भृंगादावप्यामंत्रण
स्य लोके दर्शनात् यथा कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते वामे
नात्र वटस्तमध्वगजनः सर्वात्मना सेवते न छायापि परोपकारकरिणी मार्गस्थितस्यापि मे इत्यत्र चेतनाचेतनप्रश्नोत्तरवर्णनप
गामंत्रणस्यात्यंतमसंभावितत्वाभावात् एवं प्रस्तुतेन वाच्येन भृंगोपालंभरूपेण पत्न्याः कुलवध्वाः सौंदर्याभिमानशालिन्याः क्रू
रजनपरिहृतिदुष्प्रापायां परवनितायां विटसर्वस्वापहरणसंकल्पदुरासदायां वेश्यायां वा कटकसंकुलकेतकीकल्पायां
प्रवर्तमानं प्रियतमं प्रत्युपालंभो द्योत्यते यथा वा अन्यासु तावदुपमर्दसहासु भृंग लोलं विनोदय मनः सुमनोलतासु बाला

णिसंवंधांतरमाश्रयणीयं एवमुपमानोपमेयभावमाश्रित्य तत्र कविकल्पितकार्यकारणभावनिवंधनेऽप्रस्तुतप्रशंसे दर्शिते
ततोन्यत्रापि दृश्यते यथा कालिंदि व्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि कस्माच्छत्रोर्मे नर्मदाहं त्वमपि वदसि मे नाम कस्मा
त्सपत्न्याः मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समजनि कुपितः कुंतलक्षोणिपालः अ
त्र किमासां समजनीति मालवीनां तथा रोदनस्य निमित्ते पृष्टे तत्प्रियमरणरूपं निमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति
तत्कारणमभिहितमिति कारणनिवंधना मालवान्प्रतिप्रस्थितेन कुंतलेश्वरेण किं ते निर्जिता इति पृष्टे तद्वधानंतरभाविजल
निधिनर्मदाप्रश्नोत्तररूपं कार्यमभिहितमिति अत्रैव कार्यनिवंधनापि पूर्वस्यां प्रश्नः शाब्द अस्यामार्थ इति भेदः प्रस्तुतेन प्रस्तुत
स्य द्योतने प्रस्तुतांकुरः किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया यत्र प्रस्तुतेन वर्ण्यमानेनाभिमतमन्यत्प्रस्तुतं द्योत्यते तत्र

र्यन्तिघायनिरीक्षणकार्यत्वमपिनापक्षेप्यमालतीकठोरत्वेविवक्षितं प्रतियोगिविशेषापेक्षकठोरत्वस्य मृदकार्यत्वान्न किं
तुनतुद्रेरेव इदमपि त्वदंगमार्दवे दृष्टे इत्युदाहरणेन यथैवस्पष्टं अर्थस्यकार्यत्वइव कुड्यैः कार्यत्वेपि कार्यनिवंधनत्वं नही
यत इति तादृशान्यपि कार्यनिवंधनाप्रस्तुतप्रशंसायामुदाहृतानि प्राचीनैः वस्तुतस्तु तदतिरेकेपि न दोषः नह्यप्रस्तुतप्रशं
सायां प्रस्तुताप्रस्तुतयोः पंचविध एव संबंध इति नियंतुं शक्यते संबंधांतरेष्वपि तद्दर्शनात् यथा तापत्रयौषधवरस्यत
वलितस्य निःश्वासमंदमरुता वितुषीकृतस्य एतेकडंकरचया इव विप्रकीर्णजैवातृकस्य किरणा जगति भ्रमंति अत्र
त्यप्रस्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपदिव्यौषधधान्यविशेषकडंकरचयत्वोत्प्रेक्षणेन भगवन्मंदस्मितस्य
तत्सारतारूपः कोप्युत्कर्षः प्रतीयते नचधान्यकडंकरचययोः कार्यकारणभावादिसंबंधोस्ति अतः सहोत्पत्त्यादिकम

नवनीतपदं प्रयुक्ताः अत्र भगवत्यादांउजमालम नोयद्रूपायां दिव्यसरिन्निर्मलजलकरसादिवल्ग्यानां नयामहसमुद्रं प्रविष्टा
नां नखकान्तिलेशकणिकानां परिणमनया संभाव्यमानेन समुद्रनवनीतपदवाच्येन चन्द्रेण कार्येण तन्नखकान्त्युत्कर्षः प्रतीय
ते यथा वा अस्याश्चेत्कृति सौकुमार्यमधुनाहं सस्यगवैरलं संलापो यदि साध्यतां परम्भैर्वाचंयमत्वं परं अङ्गानाममकठोर
ता यदि दृष्टप्रायैव सा मालतीकान्तिश्चेत्कमला किमत्र वदु नाकाषायमालम्बतां अत्र नायिकागत्यादिवर्णनीयत्वेन प्रस्तु
ते उहंसादिगर्वशान्त्यादिरूपाणि औचित्येन संभाव्यमानानि कार्याणि क्रमेणाभिहितानि एतानि च पूर्वोदाहरणे इव नचम
कार्याणि किन्तु तन्निरीक्षणकार्याणि लक्ष्माणि रम्यां यदि चेन्नसि स्याद्दसशापं पर्वतराजपुत्र्याः तत्केशपाशं प्रसमीक्ष्य कुर्यु
र्वालप्रियत्वं शिथिलं चमर्यः इत्याद्युदाहरणं तदेतच्चैव स्पष्टं अङ्गानाममकठोरते नितम्बीयपादे तु वर्णनीयाङ्गसौकुमा

वैकृतिक्षिद्रुमित्तिनदत्तरोधेनतेषांदेहक्षयकालस्यामावास्यारूपस्योपस्थितौसूर्यमंडलप्राप्तेः प्राकृप्रत्यक्षसिद्धंपुण्यत्वेननिरू
पितस्यलावण्यस्यप्रहाणंनिमित्तीकृत्यतस्यचंद्रमारूप्यस्वरूपोपचरितत्वसौहार्दवतिभगवन्मुखेन्यसनप्रन्नेक्षितं यद्यपित्रुह
द्रुह्रुत्वेनावन्नत्वस्यपुण्यसंक्रमणंभवतितथाप्यत्रक्रुरूदिस्थेकवचनेनभगवन्मुखमेवचंद्रस्यगृहमुक्तंतत्रखांतराणेवंद्रमादृ
श्यगंधास्पदानीतिभगवन्मुखस्येतरदृक्तेभ्योव्यतिरेकोदर्शितः ततश्चतस्मिन्नेवसर्वेषांचंद्राणांस्वस्वयावल्लावण्यविन्यसनोत्प्रेक्षणे
नप्राग्वर्णितः प्रस्तुतोऽर्थः स्पष्टमेवप्रतीयते यद्यपिश्रुतौसूर्यमंडलप्राप्त्यनंतरभाविविरजानदीतिक्रमणानंतरमेवब्रह्मसुकृत
संक्रमणंश्रूयतेतथापिशरीरकपालोद्भेदनस्यार्थवशात् प्राग्भावःस्थापितइतितदनुसारेणाविन्यस्यमिहिरंयांतीत्युक्तं कार्यनिबंध
ना यथा तापत्वदंघ्रिनखध्यावनतोपलप्रासलत्वांतिलेशकणिकाजलधिंप्रविष्टाः ताएवतस्यमथनेनयत्नीभवंस्तोनूनंसमुद्र

निर्माणार्थसारांशहरणेन तत्कार्यरूपो वर्णनीयतया प्रस्तुतो दमयंतीवदनगतो लोकोत्तरसौंदर्यविशेषः प्रतीयते यथा वा
मदीयेतरदराजलवे श्राक्षिन्यन्नमन्ननसुनयः पदं ते देहक्षयोपनतदिव्यपदाभिमुख्याः लावण्यनिचयं सुहृदि त्वदास्ये
विन्यस्य यांति मिहिरं प्रति मासभिन्नाः अत्राप्राकरणिकचंद्रगततयोत्प्रेक्ष्यमाणेन लावण्यपुण्यनिचयविन्यासेन कारणेन त
त्कार्यमनंतकोटिचंद्रलावण्यशालित्वमनन्यसुखसाधारणं भगवन्मुखे वर्णनीयतया प्रस्तुतं प्रतीयते तथाहि चंद्रस्यावन्तं
त्रलिंगाद्वृद्धिक्षयाभ्यां भेदाध्यवसायद्वारा प्रतिमासभिन्नात्वेन वर्णितः तेनातीताश्चंद्रा अनंतकोटय इति लब्धं कालस्यानादि
त्वात् सर्वेषां चैतेषामाकाशसमाश्रयणं श्लेषमहिम्ना भगवच्चरणसमाश्रयणं तेनाध्यवसितं भगवच्चरणप्रपन्नानां च देह
क्षयोपस्थितौ परमपदप्राप्त्याभिमुख्यं तदानीमेव स्वसुहृद्वर्गे त्वदीयसुकृतस्तोमनिवेशनं ततः सूर्यमंडलप्राप्तिश्चेत्यनेन स्त

कु·नं
३०

दासितुमयुक्तमितिवक्तव्येऽर्थे प्रस्तुते तत्तुल्यायनार्थं सामान्यमभिहितं यथावा सौहार्दस्वर्णरेखाणामुच्चावचभिदाजुषांप
रोक्षमितिकोप्यस्तिपरीक्षानिकषोपलः अत्रयदित्वंप्रत्यक्षइवपरोक्षेपिसमंहितमाचरसितदात्वंसुजनस्सुहृदितिविशेषेवक्त
व्यत्वेनप्रस्तुतेसामान्यमभिहितंविशेषनिबंधनायथा अंकाधिरोपितमृगश्चंद्रमामृगलांछनः केसरीनिष्ठुरक्षिप्तमृगयूथो
मृगाधिपः अत्रहतसंप्रतिबलभद्रवाक्येमार्दवदूषणपरेपूर्वप्रस्तावानुसारेणक्रूरएवख्यातिभाग्भवतिनतुमृदुरितिसामा
न्येवक्तव्येतत्तुल्यायनार्थमप्रस्तुतोविशेषोभिहितः एवंबृहत्कथादिषुसामान्यतः केचिदर्थप्रस्तुतेतद्विवरणार्थमप्रस्तु
तकथाविशेषोदाहरणोक्तिमेवाप्रस्तुतप्रशंसाद्रष्टव्या कारणनिबंधनायथा हृतसारमिवेंदुमंडलंदमयंतीवदनायवे
धसा कृतमध्यबिलंविलोक्यतेधृतगंभीरखनीखनीलिम अत्रप्राकरणिकेंदुमंडलगततयोत्प्रेक्ष्यमाणेनदमयंतीवदन

राम
३०

कस्य प्रशंसा प्रशंसनीयत्वेन प्रक्रान्तेन तत्सरूपेष्वडेभ्यो याचनाक्लिष्टे मानिनि पर्यवस्यति यथा वा आबद्धकृत्रिमसटाज-
टिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वाः मत्तेभकुम्भतटपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य:
अत्र शुनकस्य निंदा निंदनीयत्वेन प्रक्रान्तेन तत्सरूपे कृत्रिमवेषव्यवहारमात्रेण विद्वज्जनमभिनयति वैधेये पर्यवस्यति
यथा वा अंतश्छिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य माभूवन् भंगुरा गुणाः अत्र कमलनालवृत्तांतकीर्त-
नं तत्स्वरूपे बहिः खलेभुजाग्रतुभ्रान्तभृत्यादिभिरंतः कलहं कुर्वाणे पुरुषे पर्यवस्यति एवंच लक्षणयोः प्रशंसाशब्दः स्तुति-
निंदास्वरूपाख्यानसाधारणकीर्तनमात्रपरो द्रष्टव्यः सामान्यनिबंधना यथा विधाय वैरं सामर्षे नरो रौ य उदासते प्रक्षि-
प्योदर्चिषं कक्षे शेरते तेऽभिमारुतं अत्र आगेवतायर्षेपि शिशुपाले रुक्मिणीहरणादिना वैरं दृढीकृतवताक्षमेण न तक्लिष्ठु

46

षइति तत्रसभंगश्लेषः शब्दालंकारः अभंगश्लेषस्त्वर्थालंकारइतिकेचित् उभयमपिशब्दालंकारइत्यन्ये उभयमप्यर्थालंका
रइतित्वाभिप्रायः एतद्विवेचनंतुचित्रमीमांसायांद्रष्टव्यं अप्रस्तुतप्रशंसास्यात्सायत्रप्रस्तुताश्रया एकः कृतीशकुंतेषुयो:
न्यंशक्रान्नयाचते यत्राप्रस्तुतवृत्तांतवर्णनंप्रस्तुतावगतिपर्यवसायि तत्राप्रस्तुतप्रशंसालंकारः अप्रस्तुतवृत्तांतवर्णनेन
प्रस्तुतावगतिश्चप्रस्तुताप्रस्तुतसंबंधेसतिभवति संबंधश्चसारूप्यं सामान्यविशेषभावः कार्यकारणभावोवाभवति तत्र:
सामान्यविशेषभावे सामान्याद्विशेषस्यविशेषात्सामान्यस्यावगतौद्वैविध्यं कार्यकारणभावेपिकार्यात्कारणस्यकारणाद्वा
कार्यस्यावगतौद्वैविध्यं सारूप्येत्वेकोभेदइत्यस्याःपंचप्रकाराः यदाहुः कार्येनिमित्तेसामान्येविशेषेप्रस्तुतेसति तद
न्यस्यवचस्तुल्येतुल्यस्येतिचपंचधेति तत्रसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं एकः कृतीति अत्राप्रस्तुतस्यचात

रन्वयः विभक्तिभेदात् नच विभक्तिभेदे पि तदन्वयापेक्षं साधर्म्यमिह निवद्धमस्ति यतः एतस्मिन्नधिकपद्यः श्रियंवह
न्त्यः संक्षोभं पवनभुवा जवेन नीताः वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यं दधति गिरां महासरस्यः इत्यत्रैवाक्षिप्तश्लेषो
भवेत् सममित्येतत्क्रियाविशेषणं सहार्थत्वेनाप्युपपन्नं वधूक्लिष्टविशेषणार्थान्वयात् प्राग्भागगतनीतं साम्यार्पणालं
वने तस्मादर्थसौंदर्यवलादेव तदन्वयात् संधानमिति गूढश्लेषः तदनुतद्वलादेव समपाठस्य साधर्म्यार्थत्वकल्पनं
इति वाच्यस्यैवोपमालंकारस्यांगमयं श्लेष इत्यलमतिप्रपंचेन तत्सिद्धं श्लेषद्वैविध्यं एवं श्लेषः प्रकारांतरेणपि द्विवि
धः संपन्नः उदाहरणगतेत्र कीलालवाहिनीत्यादिश्लेषे तु परस्परं विलक्षणं पदभंगमनपेक्ष्य नानार्थक्रोडीकारादभंग
श्लेषः सर्वदो माधवो यो गंगां हरिणाहितसक्तिनेत्यादिषु परस्परविलक्षणं पदभंगमपेक्ष्य नानार्थक्रोडीकारात्सभंगश्ले

रेत् नैतावतातस्य व्यंग्यत्वं शक्यान्नतिपाद्यमाने सर्वथैव व्यक्त्यनपेक्षणात् पर्यवसिते प्रकृतार्थाभिधाने पश्चात्स्फुरति चेत्का
मं गूढश्लेषो भवतु अश्लिवान्यत्र गूढश्लेषः यथा अयमतिजरवाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततम
सुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्त्ति मंदमग्निमधुरर्यमोपलादर्शितश्वयथु वाभवत्तमः दृष्टयस्ति
मिरजं सिषेविरे दोषमोषधिपतेरसन्निधौ अत्र हि समासोक्त्युदाहरणयोः प्राकरणिकेऽर्थे प्रकरणवशाज्झटिति
बुद्धिस्थे विशेषणसाम्यादप्रकृतोपि विटवेश्यावृत्तांतादिः प्रतीयते न च समासोक्तेरंगं श्लेष इति सर्वेषामभिमतमतश्चै
वमन्यत्रापि श्लेषे गूढे ध्वनित्वबुद्धिर्नकार्या यथा रम्या इति प्राप्तवतीः पताका रागं विविक्ता इति वर्द्धयंतीः यस्यामसेवंत
नमद्वलीकाः समं वधूभिर्वलभीर्युवानः अत्र द्वितीयांतादिविशेषणसमर्पितार्थांतराणां न शब्दसामर्थ्येन वधूभिः

लमेक्षधारणांविभुः नीलानामाकुलीभावंलक्ष्यैर्न्नदिशिलीमुखैः सरसीवनवल्लानांकमलानांनदीक्षणे असाउदयमारूढःकां
तिमान्रक्तमंडलः राजाहरतिलोकस्यहृदयंमृदुभिःकरैः अत्राद्येसोतव्यत्वेनप्रकृतयोः रमकृतयोः श्लेषः द्वितीयेउप
मानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः तृतीयेराज्ञिवर्णनप्रस्तावेप्रकृतस्यप्रत्यग्रोदितचंद्रस्याप्रकृतस्यनवाभिधि
कृन्दपनेश्वश्लेषः यदत्रप्रकृताप्रकृतश्लेषोदाहरणेप्रदर्शितंमूलध्वनिमित्तंतिप्रांवलम्ब्यकृताप्रकृताभिधानमू-
लकस्योपमादेरलंकारस्यव्यंग्यत्वाभिप्रायंनतत्प्रकृतार्थस्येवव्यंग्यत्वाभिप्रायं अप्रकृतार्थस्यापिशक्त्याप्रति
पादकस्याभिधेयत्वावश्यंभावेनव्यञ्जनानपेक्षत्वात् यद्यपिप्रकृतार्थेप्रकरणबलाज्झटितिबुद्धिस्थेसत्येवपश्चान्प्रव
निग्राह्यध्वनादिवाचिनांराजकरादिपदानां अन्योन्यसन्निधानबलाद्विषयग्राह्यंनरोन्मेषप्रथमंप्रकृतार्थः स्फु

कु.नं.
३७

ष्टपदानसामर्थ्याभिप्रायगर्भं यथा वा फणीन्द्रस्तेगुणान्वक्तुं लिखितुं हैहयाधिपः द्रष्टुमाखंडलः साक्षात्काहमेषक्तनेगुणाः।
फणीन्द्रइत्यादिविशेष्यपदानिसहस्रमुखत्वाद्यभिप्रायगर्भाणि नानार्थसंश्रयः श्लेषोवर्ण्यावर्ण्योभयाश्रितः सर्वदोमाधव
:पायात्सयोगंगामदीधरत् श्लक्ष्णेनत्वन्मुखंतुल्यंहरिणाहितसक्तिना उद्वरम्भरिकीलालः शुशुभेवाहिनीपतिः अ
नेकार्थशब्दविन्यासश्लेषः सचत्रिविधः प्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च सर्वदेत्यादिनाक्रमेणोदाहर
णानि तत्रसर्वदोमाधवइतिश्लोकेनमस्यत्वेनप्रकृतयोर्हरिहरयोःकीर्त्तनंप्रकृतश्लेषः अब्जंकमलमब्जंशंखंद्वयोरुपमान
मात्रत्वेनाप्रकृतयोःकीर्त्तनमित्यप्रकृतश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च तत्रसमीनौघस्यप्रयाणोत्सवन्द्रुधिरस्यसे
नापतेरेतवर्णनंप्रकृतमितिप्रकृताप्रकृतश्लेषः यथा वा त्वानः काकोदरोयेनद्रोग्धापिकरुणात्मना पूतनामारणख्यातः

राम
३७

पत्तेः अतियज्ञेननिजांयदिदेवताउभयतश्चवनेपुषनेष्यद्वंक्षितिभृन्नैवसदैवतकावयंउनवतानवनाकिमहि दुहाअत्र
पुरुहूतपूजोत्सवानंदादीन्निति भगवतःकृष्णस्यवाक्येगोवर्द्धनगिरिरेवास्माकंरक्षकत्वेनदैवतमितिसएवपूजनीयोः
नारक्षकःपुरुहूतइत्येवंपरंवनवनेतिगोवर्धनगिरेर्विशेषणंकाननवत्वान्निर्झरादिमत्वाच्चपुष्पफलतृणजलादि
भिरारण्यकानामस्माकंअस्मद्धनानांचगवामप्ययमेवरक्षकइत्यभिप्रायगर्भः एवमत्रैकस्यापिसाभिप्रायविशेषण
विन्यासस्यविच्छित्तिविशेषवशादलंकारत्वसिद्धावप्यत्रापिसुधांशुकलितोत्तंसइत्यादौतस्यान्यलाभेननिवार्यतेअः
पिच एकपादार्थहेतुकंकाव्यलिंगमलंकारइतिसर्वसंमतं तद्वदेकस्यापिविशेषणस्यसाभिप्रायस्यालंकारत्वंयुक्तमेव
साभिप्रायेविशेष्येतुभवेत्परिकराङ्कुरः चतुर्णांपुरुषार्थानांदातादेवश्चतुर्भुजः अत्रचतुर्भुजइतिविशेष्यंपुरुषार्थचतु

४३

कु·नं·
२८

पिप्रथमोदाहरणेसर्वाणिविशेषणान्येकाभिप्रायगर्भाणि पदार्थरूपाणिच द्वितीयोदाहरणेभिन्नाभिप्रायगर्भाणि वाक्यार्थ
रूपाणिचेतिभेदः नैतद्व्यंग्यार्थसद्भावेपिनध्वनिव्यपदेशः हरस्यतापहरणेमन्मथस्यकैमुत्यन्यायेनसर्वधन्विधैर्यहरणे
शरीररक्षणार्थंपापमाचरतांमूढत्वे स्वस्यवर्णनीयराजगुणकथनाशक्तत्वेनवाच्यस्यैवोपस्कारकत्वादनरावव्यंग्यार्थ
स्यवाच्यपरिकरत्वात्परिकरइतिनामास्यालंकारस्यकेचित्तु निष्प्रयोजनविशेषणापादानेऽपुष्टार्थदोषस्योक्तत्वात्स
प्रयोजनत्वंविशेषणस्यदोषाभावमात्रंनकश्चिदलंकारएव निष्ठतादृशानेकविशेषणोपन्यासःपरंवैचित्र्यविशेषा:
त्परिकरइत्यलंकारमध्येपरिगणितइत्याहुः वस्तुतस्त्वनेकविशेषणोपन्यासएवपरिकरइतिननियमः श्लेषयमका
दिवदपुष्टार्थत्वदोषाभावेनतत्रैकस्यापिविशेषणस्यसाभिप्रायस्यविन्यासेविच्छित्तिविशेषस्यसद्भावात्परिकरत्वोपः

राम
२९

यं यथा वा तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽ
न्ये अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुधइत्यर्थलभ्यात्मर्थविशेषणं चासारायुधत्वाभिप्रायगर्भं यथा वा स
र्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः शरीरकस्यापि कृते मूढाः पापानि कुर्वते अत्र शरीरविशेषणानि तस्य हेयत्वे
नासंरक्षणीयत्वाभिप्रायगर्भाणि यथा वा व्यास्यं नैकतया स्थितं श्रुतिगणं जन्मी न वल्मीकतो नाभौ नाभवमच्युतस्य
सुमहद्भाष्यं च नाभाषिषि चित्रार्थां न बृहत्कथामचकथं सुत्राम्णि नासं गुरुर्देव त्वद्गुणवृन्दवर्णनमहं कर्तुं कथं शक्नु
यां अत्र श्रुतिगणं न व्यास्थमित्यादीनि विशेषणानि तत्तन्व्यासाद्यसाधारणकार्यकरणप्रतिषेधमुखेन नाहं व्या
सादिरित्याद्यभिप्रायगर्भाणि न चाद्योदाहरणयोरेकैकं विशेषणं समनन्तरयोः अत्रैकं बहूनि विशेषणानि तत्रा

कु.नं.
२५

नातत्संबंधिनिकामुकादौअभिव्यक्तेषुनतत्तदीयत्वानुसंधानंनतत्रभवति यथास्वरूपतोदृष्टेनराजाश्वादिनातत्संबंधिनिराजा
दौस्मारितेसतितुनरश्वादौतदीयत्वानुसंधानंनतद्वदितिविशेषणसाम्येनवाच्योपस्कारकस्याप्रस्तुतव्यंजनस्याप्यपेक्षा अतए
वश्लिष्टविशेषणयामिवसाधारणविशेषणयामप्यप्रस्तुतव्यवहारसमारोपइत्येवप्राचीनानांप्रवादः कंदुकेव्यावलात्तुवभा
रत्वादिविशिष्टवनितासेव्यत्वस्यकामुकसंबंधित्वेनैवसमारोपणीयत्वान्नस्वरूपतः कंदुकेपितस्यसत्वेनासमारोपणीयत्वा:
न् किंचसारूप्यनिबंधनत्वेनोदाहृतानांसमासोक्तावप्रस्तुतवृत्तांतस्याशब्दार्थस्याप्रस्तुतवृत्तांतरूपेणैवगम्यतानेनरू
पेणतत्रसमारोपसिद्धेरन्यत्रापितथैवयुक्तमितिउक्तमेवप्राचीनानांलक्षणमितिविभावनीयं अलंकारः परिकरः सा
भिप्रायेविशेषणे स[illegible]ांशुकलितोत्तंसस्तापंहरतुवः शिवः अत्रसुधांशुकलितोत्तंसइतिविशेषणंतापहरणसामर्थ्याभिप्रा

राम
२५

तथैवागमस्येपि जाग्रदौ नास्ति ब्रह्मत्ववृत्तांतस्यान्वययोग्यता एवं च समप्रधानयोः प्रकृताप्रकृतवृत्तांयोरन्यतरस्यावश्यमारो
पेऽभ्युपगंतव्येऽत्र तएव ब्रह्मत्वेऽब्रह्मत्वस्यारोपश्चारूताहेतुरिति युक्तं तन्नैवं सति विशेषणसाम्याद्ब्रह्मत्वस्य गम्यत्वे समासोक्तिः
विशेषणानां सामस्त्येन पत्रब्रह्मत्ववर्णिनां अब्रह्मत्वस्यागम्यत्वं सा समासोक्तिरिति चेन्न इत्यादिनिप्राचीनानां समासोक्तिलक्षणानि न
संगच्छेरन् ब्रह्मत्वे श्लिष्टसाधारणादिरूपविशेषणसमर्पितानुरागपूर्वकवदनचुंबनाद्यब्रह्मत्ववृत्तांतसमारोपमात्रस्य चा
रुताहेतुत्वाभ्युपगमेन विशेषणसाम्यरूपकामुकाद्यब्रह्मत्वधर्मिव्यंजनानपेक्षणादिति चेन्न उच्यते स्वरूपतोऽब्रह्मत्ववृत्तां
तस्यारोपो न चारुताहेतुः किंत्वब्रह्मत्वकामुकादिसंबंधित्वेनावगम्यमानस्य तस्यारोपः तथाभूतस्यैव रसानुगुणत्वात् न च
तावदवगमने विशेषणपदानां सामर्थ्यमस्ति अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वदनचुंबनादि

क्षणानुगुणाद्युत्तरपदार्थप्रधानमयूरव्यंसकादिसमासव्यवस्थितौ उत्तरपदार्थभूतनयनान्वयानुरोधात्स्वयोदेऽनुक्रमपि द्रष्टु
पुरुषत्वरूपणं गम्यरूपगम्यते नत्वेह तथा निरीक्षणवत् त्वय्यागते किमिति वेपत एष सिंधुरिति श्लोके सेतुकृत्वादिवद्ब्रह्म
तासाधारणलक्षणं तदुपात्तोऽस्ति नापि क्लिष्टसाधारणादिविशेषणसमर्पितयोः ब्रह्मताब्रह्मतलक्षणं तयोरब्रह्मतलक्षणं तस्य विभु
त्वयनवत्प्राधान्यमस्ति येन तदनुरोधात्वं सेतुमंथकृदित्यत्रेव पयोद इत्यत्रेव वा ब्रह्मतेऽब्रह्मतसमारोपमभ्युपगच्छेम तस्मा
द्विशेषणसमर्पिताब्रह्मतव्यवहारसमारोपमात्रमिह चारुताहेतुः यद्यपि ब्रह्मताब्रह्मतलक्षणं तयोरिह क्लिष्टसाधारणवि:
शेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्येणैव साक्षादन्वयादस्ति समप्राधान्यं तथाप्यब्रह्मतलक्षणं तान्व
यानुरोधात् ब्रह्मतेऽब्रह्मतरूपसमारोपोंगीकरणीयः तथाहि यथा ब्रह्मत विशेष्येनास्य ब्रह्मतलनां तस्यान्वययोग्यता

तान्तदिदमित्युट्टङ्कयति अप्रस्तुतवर्णने प्रस्तुते तत्सारूप्यात्स्फुटं विच्छिन्नसंतानादिवृत्तस्य समृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तान्तः प्रतीयते अप्रस्तुतविशेषणसाम्यात्सारूप्याद्वा यदप्रस्तुतवर्णनं तस्य प्रस्तावनं तत्र प्रस्तुते विशेष्ये तत्समारोपार्थं सर्वथैव प्रस्तुतानन्वयिनः कविसंरम्भगोचरत्वायोगात् तत्तन्मूलसमासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुताहेतुः न तु रूपक इव प्रस्तुतेऽप्रस्तुतरूपसमारोपोऽप्यस्ति मुखं चन्द्र इत्यत्र मुखे चन्द्रत्वारोपहेतुचन्द्रशब्दसमभिव्याहारवदुक्तेश्चुम्बति चन्द्रमा इत्यादिसमासोक्त्युदाहरणे चन्द्रादेर्जारत्वाद्यारोपहेतोस्तद्वाचकपदसमभिव्याहारस्याभावात् निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः धारानिपातैः सह किं तु वान्तश्चन्द्रोऽयमित्यार्ततरं ररास इत्याद्येकदेशविवर्तिरूपकोदाहरणे च प्रस्तुतेऽप्रस्तुतरूपसमारोपगमकस्याप्यभावात् तत्र विद्युन्नयनैरित्यत्र निरी

ड्रीति अत्रचंद्रस्यप्रवीच्यारंभसंबंधलक्षणेउदयेवर्ण्यमानेमुखशब्दस्यप्रारंभवदनसाधारण्याद्रक्तशब्दस्यारुणकामुकसाधार:
ण्याच्चुंबतीत्यस्यप्रस्तुतार्थेसंबंधमात्रपरस्यशक्यार्थांतरसाधारण्यात्चंद्रमःशब्दगतपुंल्लिंगेनऐंद्रीगतस्त्रीलिंगेनतत्प्रतिपाद्यें
द्रसंबंधित्वेनचोपस्थितादप्रस्तुतपरवनितासक्तपुरुषवृत्तांतःप्रतीयते यथावा व्यावल्गत्कुचभारमाकुलकचंव्यालोलहाराव।
लिप्रेंखत्कुंडलशोभिगंडयुगलंप्रस्वेदिवक्त्रांबुजं शश्वद्दत्तकरप्रहारमधिकश्वासंरसादेतयायस्मात्कंदुकसादरंसुभगयासं
सेव्यसेतन्कृते अत्रकंदुकवृत्तांतेवर्ण्यमानेव्यावल्गत्कुचभारमित्यादिक्रियाविशेषणसाम्याद्विपरीतरतासक्तनायिकावृत्तां:
तःप्रतीयते पूर्वत्रविशेषणानिश्लिष्टानि इहसाधारणानीतिभेदःसारूप्यादपिसमासोक्तिर्दृश्यते यथापुरायत्रस्रोतःपु
लिनमधुनातत्रसरितांविपर्यासंयातोघनविरलभावःक्षितिरुहांबहोर्दृष्टंकालादपरमिवमन्येवनमिदंनिवेशःशैला

णेरिमादौ न सहोक्तिरलंकारः विनोक्तिश्चेद्विनाकिंचित्प्रस्तुतं हीनमुच्यते विद्याहृद्यापि सावद्या विना विनयसंपदं यथा वा यश्च
रामं न पश्येत्तु यं च रामो न पश्यति निंदितः स भवेल्लोके स्वात्माप्येनं विगर्हयेत् अत्र रामदर्शनं विना निंदितत्वं विनाशब्दमंतरेणा
पि प्रदर्शितं तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते विना खलैर्विभात्येषा राजेंद्र भवतः सभा यथा वा आविर्भूते शशिनि
तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा मोहेनांतर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगारोधःपत
नकलुषा गृह्णतीव प्रसादं अत्र तमःप्रभृतीनि विना निशादीनां रम्यत्वं विनाशब्दमंतरेण दर्शितं समासोक्तिः परिस्फूर्तिः प्र
स्तुतेऽप्रस्तुतस्य चेत् अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः अत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाम्यबलादप्रस्तु
तवृत्तांतस्यापि परिस्फूर्तिरत्र समासोक्तिरलंकारः समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तांतयोर्वर्णनात् उदाहरणमयमै

बोधनसंबंधइति व्यतिरेको विशेषश्चेदुपमानोपमेययोः शैलाइवोन्नताः संतः किंतु प्रकृतिकोमलाः अयमुपमेयाधिक्यपर्यवसा
यी व्यतिरेकः यथा वा पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुतेनन्यूनत्वपर्यवसा
यी यथा रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्ताः धन मामपि कांतापादतलाहतिस्त
वमुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः अनुभयपर्यवसायी यथा दृढतरनिबद्धमुष्टेः कोशनिष
ण्णस्य सहजमलिनस्य कृपणस्य कृपाणस्य च केवलमाकारतो भेदः सहोक्तिः सहभावश्चेद्भासते जनरंजनः दिगंतमगमत्तस्य की
र्तिः प्रत्यर्थिभिः सह यथा वा छायासंश्रयते तलं विटपिनां श्रांतेव पांथैः समं मूलं याति सरोजलस्य जडता म्लानेव मीनैः सह आचाम
त्यहिमांशुदीधितिरपस्तप्तेव लोकैः समं निद्रा गर्भगृहं सह प्रविशति क्लांतेव कांताजनैः जनरंजनस्तुसैः अनेन सार्द्धं विहरांबुरा

दयाचलः स्वनिष्ठयारविधारणक्रिययासमागतानांसतामेवंगृहमेधिभिरातिथ्यंकार्यमितिसदर्थंबोधयन्निवद्ध इतिसदर्थनि
दर्शना अत्रकेचिद्वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयमसंभवद्वस्तुसंबंधनिबंधनमिति तृतीयान्तुसंभवद्वस्तुसंबंधनिबं
धनेतिव्यवहरंति· तथाहि आद्यनिदर्शनायांवाक्यार्थयोरैक्यमसंभवत्तयोःसाम्येपर्यवस्यति द्वितीयनिदर्शनायामप्यन्यध
र्मोन्यत्रासंभवन्धर्मिणोःसाम्येपर्यवस्यति तृतीयनिदर्शनायान्तुस्वक्रिययापरान्प्रतिसदसदर्थबोधनंसंभवदेवसमन्तांगं
भीकरोतीतिबोधयन्गृहमेधिनइत्यादौकरीषोग्निरध्यापयतीतिवत्समर्थाचरणेणिचःप्रयोगः ततश्चयथाकारीषोग्निःशी
तापनयनेनवटूनध्ययनसमर्थान्करोति एवंवर्त्तमानःपर्वतःस्वयमुपमानभावेनगृहमेधिनःउक्तबोधनसमर्थान्कर्त्तुं
क्षमते यथायंपर्वतःसमागतंरविंशिरसासंभावयत्येवंगृहमेधीसमागतंसंतन्तुविनपूजयासंभावयेदिति अतःसंभवतिः

कु॰नं
२१

दाहरणं तत्र नश्येदिति बोधयदिति वक्त्यैर्बोधयदित्यस्यगम्यमानत्वादप्रयोगः ततश्च राज्ञां वंद्रेण सहविरुध्यत्वयं नाशक्रि:
याविशिष्टं तमः स्वकीयनाशक्रियया दृष्टांतमप्रतयास्त्रन्योप्येवं राजविरुद्धः स्वेनष्येदित्यनिष्टपर्यवसायितमर्थं बोधयदेवत
न स्वमिति निबंधनादसदर्थनिदर्शना तथोत्तरश्लोके सवितोदयसमये स्ववयस्येषु कमलश्रीमादधानस्तयापपत्तस्याः ध्या
नक्रियया परानुवृत्तिसमृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना यथा वा उल्लंघ्य पद
मवाप्य यो लघुर्लीलयैव स पतेदिति ध्रुवं पौलशेखरगतः एवन्नगणश्चारुमारुतधुतः पतत्यधः अत्र गिरिशेखरगतो वृष्टि
विंदुगणो मंदमारुतमात्रेणापि कंपितः पतन्नलघोरुन्नतपदप्राप्तिः पतनहेतुरित्यसदर्थं बोधयन्निबद्ध इत्यसदर्थनि
बंधना चूडामणिपदे धत्ते यो देवं रविमागतं सतां कार्यातिथेयीति बोधयन्नहमेधिनः अत्र समागतं रविं शिरसा संभावयन्नु

राम
२१४

योर्बिंबप्रतिबिंबभावाभावात् यत्रतुविषयविषयिविशेषणानांपरस्परसादृश्येनबिंबप्रतिबिंबभावोस्ति ज्योत्स्नाभस्मच्छुरणाधव
लाविभ्रतीतारकास्थीन्यंतर्द्धानव्यसनरसिकारात्रिकापालिकीयं द्वीपान्द्वीपंभ्रमतिदधतीचंद्रमुद्राकपालेन्यस्तंसिद्धांजनपरि
मलंलांछनस्यच्छलेनेतिसावयवरूपकोदाहरणं तत्रापिविषयविषयिणोस्तद्विशेषणानांचप्रत्येकमेवैकारोपः नतुज्योत्स्नादि
विशिष्टरात्रिरूपविषयस्यभस्मादिविशिष्टकापालिकीरूपविषयिणस्तुविशिष्टरूपेणैकारोपोस्ति तस्माद्राजसेवामनुष्याणामि
त्यादावपिवाक्यार्थवृत्तिनिदर्शनेतियुक्तं यमांतरेत्विहपदार्थवृत्त्यैवनिदर्शनयाभाव्यं अपरांबोधनंप्राहुः क्रियया ऽसत्सदर्थयोः
नश्येद्राजविरोधीतिक्षीणंचंद्रोदयेतमः उदयन्नेवसवितापद्मेष्वर्पयतेश्रियं विभावयन्समृद्धीनांफलंसुहृदनुग्रहंकस्यचित्किंचि
क्रिययाविशिष्टस्यतत्क्रिययापरान्प्रत्यसतः सतोवार्थस्यबोधनंयन्निबध्यतेतदपरांनिदर्शनामाहुः असदर्थबोधनेउन्नतार्थमु

55

कु.नं.
२०

तीर्षंतनुष्ठतुत्वंतुणार्णवमित्यादौ वाक्यभेदाभावेपि वाक्यार्थवृत्तिरेव निदर्शना विशिष्टयोरैक्यारोपसम्भवाद्वाक्यार्थयोः सदृशयोरि
ति लक्षणवाक्ये वाक्यार्थशब्देन विंबप्रतिविंबभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतधर्मिणोर्विवक्षितत्वात् एवं च राजसेवा
मनुष्याणामसिधारावलेहनं पंचाननपरिष्वंगो व्यालीवदनचुंबनमित्यत्र प्रस्तुताप्रस्तुतवृत्तांतयोरैक्यरूपदोपान्नत्वेपि वाक्यार्थ
वृत्तिनिदर्शनाव्याप्तिः तयोर्विंबप्रतिविंबभावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति अत एव निदर्शनाया रूपकाद्भेदः रूपके ह्य
विशिष्टयोरेव मुखचंद्रादिकयोरैक्यारोपः अंघ्रिर्दंडो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे विधिविष्टरपद्मस्य नालदंडो मुदेस्तु व इति वि
शिष्टरूपकोदाहरणेपि न विंबप्रतिविंबभावापन्नवस्तुविशिष्टता विधातृविष्टरकमलश्लिष्टत्वरूपसाधारणधर्मवत्तासंपादना
र्थमेव तत्र विशेषणोपादानात् यद्यापुः सौम्यनेत्यादिनिदर्शनोदाहरणेषु दानप्रश्नैर्ह्लादीनामानंदकरत्वादिनेवात्रविशेषणं

राम
२१

तादीनां च यज्ञाभ्यामैक्यारोप पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनां त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुजन्मनोः अत्र नेत्रयुगले नीलांबुजगतलीलापदार्थारोपो निदर्शना यथा वा वियोगे गौडनारीणां यो गंडतलपांडिमा अदृश्यत स खर्जूरीमंजरीगर्भरेणुषु पूर्वस्मिन्नुदाहरणे उपमेये उपमानधर्मारोपः इह तूपमाने उपमेयधर्मारोप इति भेदः उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेन तत्समानधर्माक्षेपादौपम्यपर्यवसानं तुल्यं इयं पदार्थवृत्तिनिदर्शना जयदेवेन ललितोपमेति व्याहृता यद्यपि वियोगे गौडनारीणामिति श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतः तथापि विशिष्टयोर्धर्मिणोरैक्यारोपो वाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शनेति व्यवस्थामाश्रित्यास्माभिरयमिहोदाहृतः एवं च त्वयि सति शिवदातर्यस्मदभ्यर्थितानामितरमनुसरंतो दर्शयंतोर्थिमुद्रां चरमचरणपानैर्दुर्ग्रहं दोग्धुकामाः करभमनुसरामः कामधेनौ स्थितायां दोर्भ्यामधिति

भीरतामापातालनिमग्नपीवरतनुर्ज्ञानातिमंथाचलः नन्वत्रोपमानोपमेयवाक्ययोर्ज्ञानमेक एव धर्म इति प्रतिवस्तूपमा उक्ता:
मैवं अत्रैतेन नेमंथाचले ज्ञानस्य वाध्धितत्वेन तत्त्वमानानीत्यनेन सागराधस्तनावधिपर्यन्तसंस्पर्शमात्रस्य विवक्षितत्वादत्रो
दाहरणे परावृत्तिदीपकाद्विशेषः पूर्ववस्तुस्तुताप्रस्तुतविषयत्वकृतोऽवगन्तव्यः वैधर्म्येणाप्ययं दृश्यते कृतं च गर्वाभिमुखं मनस्त्व
या किमन्यदेवं निहताश्च नो द्विषः तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां वाक्यार्थयोः सदृशयोरैक्यारो
पो निदर्शना यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलंकता अत्र दातृगतसौम्यत्वस्योपमेयवाक्यार्थस्य पूर्णेन्दोरकलंकत्वस्यो
पमानवाक्यार्थस्य च यत्तद्भ्यामैक्यारोपः यथा वा अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽब्जमवरोपितं सुचिरमूषरे व
र्षितं श्वपुच्छमवनामितं बधिरकर्णजापः कृतो धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः अत्राबुधजनसेवाया अरण्यरुदि

वीक्षाप्रतिषेधोयमतिक्तापर्यवसितस्त्ववेति धर्म्मैकामतुसंक्षेपं अपीहुतिः प्रस्तुतानामप्रस्तुतानां वा प्रतिवस्तूपमालंप्रस्तुताप्रस्तु
तानामिति विशेषः अयंचपरो विशेषः आवृत्तिदीपकं वैधर्म्म्येण न भवति प्रतिवस्तूपमातु वैधर्म्म्येणापि दृश्यते यथा विद्वानेव वि
जानाति विद्वज्जनपरिश्रमं नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनां यदि संति गुणाः पुंसां विकसंत्येव ते स्वयं नहि कस्तूरिकामोदः
शपथेन विभाव्यते चेद्विंवप्रतिविंवत्वं दृष्टांतस्तदलंकृतिः त्वमेव कीर्त्तिमान् राजन् विधुरेव हि कांतिमान् यत्रोपमानोपमेयवा
क्ययोर्भिन्नावेव धर्म्मौ विंवप्रतिविंवभावेन निर्दिष्टौ तत्र दृष्टांतः त्वमेव कीर्त्तिमानित्यत्र कीर्त्तिकांत्योर्विंवप्रतिविंवभावः यथा वा
कामं नृपाः संति सहस्रशोन्ये राजन्वतीमाहुरनेन भूमिं नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव रात्रिः यथा वा देवीं वा
चमुपासते हि वहवः सारंतु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः अब्धिर्लंघित एव वानरभटैः किंत्वस्य गं

लधाराकामिनांप्रवासहृच्चिंवदनेननिर्जितंनवनिलीयते चंद्रबिंवमंबुधरे अरविंदमपिचसुंदरि निलीयते पाथसांपूरे एवंवाक्
णीनांप्रस्तुताप्रस्तुतोभयविषयत्वाभावेपिद्वीयवक्यापत्तिमात्रेणदीपकव्यपदेशः वाक्ययोरेकसामान्येप्रतिवस्तूपमागताः
तापेनभ्राजतेसूरः शूरश्चापेनराजते यत्रोपमानोपमेयपरवाक्ययोरेकः साधारणोधर्मः पृथङ्.र्दिश्यतेसाप्रतिवस्तूपमाप्रति
वस्तुप्रतिवाक्यमुपमासमानधर्मोस्यामितिव्युत्पत्तेः यथात्रैवभ्राजतेराजतइत्येकएवधर्मउपमानोपमेयवाक्ययोः पृथग्भिन्न
पदाभ्यांनिर्दिष्टः यथावा स्थिराशैलीगुणवतांखलबुद्ध्यानबाध्यते रत्नदीपस्यहिशिखावात्ययापिनवार्यते यथावा नवाम्रन
त्यंदिनपादपंकजेनिवेशितात्माकथमन्यदिच्छति स्थितेरविंदेमकरंदनिर्भरेमधुव्रतोनेक्षुरकंहिवीक्षते अत्रयद्यप्युपमे
यवाक्येऽनिच्छाउपमानवाक्येअवीक्षेतिधर्मभेदः प्रतिभाति तथापिवीक्षणमात्रस्यावर्जनीयस्यप्रतिषेधानर्हत्वादिच्छापूर्वक

स्तुनेवान्वयात् नहि दीपस्य रथ्याप्रासादयोर्युगपदुपकारकत्वेन जामात्रर्थं श्रपितस्य सूपस्यातिथिभ्यः प्रथमपरिवेषणेन च प्रासं
गिकत्वं दृश्यते तुल्ययोगितायां त्वेकं प्रस्तुतमन्यदप्रस्तुतमिति विशेषाग्रहात्सर्वोद्देशेनैव धर्मोक्तिरिति विशेषः अयं चानयोरपरो
विशेषः उभयोरनयोरुपमालंकारस्य गम्यत्वाविशेषेप्यत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थित उपमानोपमेयभा
वस्तत्र तु विशेषाग्रहणादैच्छिकत्वमिति त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी उन्मील
न्ति कदंबानि स्फुटंति कुटजोद्गमाः माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः दीपकस्यानेकोपकारार्थं तया दीपस्थानीयस्य शब्द
स्यार्थस्य वा उभयोर्वा आवृत्तौ त्रिविधमावृत्तिदीपकं क्रमेणाद्यत्रयेणोदाहरणानि यथा वा उत्कंठयति मेघानां माला वर्गं क
लापिनां यूनां चोत्कंठयत्यद्य मानसं मकरध्वजः शमयति जलधरधारारावानकप्नांत्संवं विरोपनमां क्षपयति च वधूलोचनज

कु॰नं
७

वामेवेहविरस्यान्तौत्वंवलैर्जलधिर्जलैरिति मतांतरे यत्रवक्ष्यमाणंदीपकमेव वदंतिवर्ण्यावर्ण्यानांधर्मैकंदीपकंवुधाः मदेनभातिक
लभः प्रतापेनमहीपतिः प्रस्तुताऽप्रस्तुतानामेकधर्मान्वयोदीपकं यथाकलभनरपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः यथावा
मणिःशाणोल्लीढः समरविजयीहेतिनिहतोमदक्षीणोनागः शरदिसरितःश्यानपुलिनाः कलाशेषश्चंद्रः सुरतमृदिताबालवनिता
तनिम्नाशोभंतेगलितविभवाश्चार्थिषुनृपाः अत्रप्रस्तुतानांनृपाणामप्रस्तुतानांचमण्यादीनांशोभैकक्रियान्वयः प्रस्तुतैकनिष्ठः समा
नोधर्मः प्रसंगादन्यत्रोपकरोति प्रासादार्थमारोपितोदीपोरथ्यायामिव दीपसादृश्याद्दीपकं संज्ञायांचेतीवार्थेकन्प्रत्ययः यथापि
सुवर्णपुष्पांपृथिवींचिन्वंतिपुरुषास्त्रयः शूरश्चकृतविद्यश्चयश्चजानातिसेवितुं इत्यत्रप्रस्तुताप्रस्तुतानांयुगपद्धर्मान्वयः प्रतिभाति
मदेनभातिकलभ इत्यत्राप्रस्तुतस्यैवप्रथमंधर्मान्वयः तथापिप्रासंगिकत्वंनहीयते वस्तुगत्याप्रस्तुतोद्देशेनप्रवृत्तस्यैववर्णनस्याप्र

राम
७

प्रम्लानानांकरिकराणांकदलीनांचैकगुणान्वयः हिताहितेवृत्तितौल्यमपरातुल्ययोगिता प्रदीयतेपराभूतिर्मित्रशात्रवयोस्त्व
या अत्रहिताहितयोर्मित्रशात्रवयोरुत्कृष्टभूतिदानस्यपराभवदानस्यचश्लेषेणाभेदाध्यवसायाद्वृत्तितौल्यं यथावा यश्चनि
वंपरशुनायश्चैनंमधुसर्पिषा यश्चैनंगंधमाल्याद्यैःसर्वस्यकटुरेवसः अत्रवृक्षनिलिंबत्सर्वतौल्यध्याहारैर्वाक्यानिपूरणी।
यानि पूर्वोदाहरणस्थानि पर्यवसायि इदंचनिंदापर्यवसायीतिभेदः इयंसरस्वतीकंठाभरणोक्तातुल्ययोगिता गुणोत्कृष्टैः
समीकृत्यवचोन्यातुल्ययोगिता लोकपालोयमःपाशीश्रीदःशक्रोभवानपि।अत्रवर्णनीयोराजाशक्रादिभिर्लोकपालत्वेनसमी
कृतः यथावा संगतानिमृगाक्षीणांतडिद्विलसितान्यपि क्षणद्वयंनतिष्ठंतिघनारब्धान्यपिस्वयं पूर्वत्रस्तुतिरिहनिंदा इयंका।
व्यादर्शेदर्शिना इमांतुल्ययोगितांसिद्धिरितिकेचिद्व्यवजह्रुः यदाहजयदेवः सिद्धिःख्यातेषुचेन्नामकीर्त्यतेतुल्यतोक्तये यु

कु·नं
१६

रोदश्मसरउत्तवीवीसहवराः स्तनाल्लिस्रोप्यतिशयोक्तयः कार्पशैष्प्रश्नत्वायनार्थाः वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता संकुचं
न्ति सरोजानि स्वैरिणीवदनानि च त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते मालतीशशभृल्लेखाकदलीनां कठोरता अत्र प्रस्तुतानां वा गुण मप्रस्तुतानां
क्रियारूपैकधर्मान्वयस्तुल्ययोगिता संकुचंतीति प्रस्तुततुल्ययोगिताया उदाहरणं तत्र प्रस्तुतचंद्रोदयकालिकतया वर्णनी
यानां सरोजानां प्रकाशाभीतस्वैरिणीवदनानां च संकोचरूपैकक्रियान्वयो दर्शितः उत्तरश्लोके नायिकासौकुमार्यवर्णने प्रस्तुते ऽ
वर्णनीयानां मालत्यादीनां कठोरतारूपैकगुणान्वयः यथा वा संजातपत्रप्रकरान्वितानि समुद्वहन्ति स्फुटपाटलत्वं विकस्वरा
ण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वृद्धिमीयुः नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदलीविशेषाः लब्ध्वापि लोके परि
णाहि रूपं जातास्तदूर्वोरुपमानबाह्याः अत्र ग्रीष्मवर्णने तदीयत्वेन प्रस्तुतानां पद्मानां दिनानां चैकक्रियान्वयः उरुवर्णने ऽ

राम
१६

त्वं वर्णितं यथा वा उच्चलति मुंचति कोशं भजति च भजति प्रकंपमरिवर्गः हम्मीरवीर खड्गे त्यजति त्यजति क्ष्मामाशु अत्र खड्गस्याको
शात्यागादिसमकालत्वरिपूणां ध्वनन् त्यागादिर्वर्णितः चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे यास्यामीत्युदिते तन्व्या वल
योभवदूर्मिका अत्र नायकप्रवासस्यसक्तिमात्रेण योषितोतिकार्श्यकार्यमुख्येन दर्शितं यथा वा आदातुं सकृदीक्षितेपि कुसुमे ह
स्ताग्रमालोहितं लाक्षारंजनवार्त्तयापि सहसा रक्तं तलं पादयोः अंगानामनुलेपनस्मरणमप्यंतःखेदावहं हंता धीरदृशः कि
मन्यदलकामोदोपि भारायते यथा वा यामिन यामीति धवे वदति पुरस्तात्क्षणेन तन्वंग्याः गलितानि पुरो वलयान्यपराणि
तथैव दलितानि अत्यंतातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे अग्रे मानो गतः पश्चादनुनीता प्रियेण सा यथा वा कवीन्द्राणामा
सन्प्रथममनन्तरमेवांगणभुवश्चलद्भृंगासंगाकुलकरिमदामोदमधुराः अमी पश्चादेवानुपरिपतिता हन्त नृपतेः कटाक्षाः क्षी

दग्ध्वाधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः संबंधातिशयोक्तिः स्यादयोगे योगकल्पनं सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं यथा वा कतिपयदिवसैः क्षयंप्रयायात्कनकगिरिः कृतवासरावसानः इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे अत्र चक्रवाक्याः सूर्यास्तमयकारकमहामेरुक्षयसंभावनाप्रयुक्तसंतोषासंबंधेपि तत्संबंधो वर्णितः योगेप्ययोगोऽसंबंधातिशयोक्तिरितीर्यते त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे अत्र स्वर्द्रुमेष्वादरसंबंधेपि तदसंबंधो वर्णितः यथा वा अनयोरनवद्यांगि स्तनयोर्जृंभमाणयोः अवकाशो न पर्याप्तस्तव बाहुलतांतरे अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आलिंगंति समं देव ज्यां शराश्च पराश्च ते अत्र मौर्व्यां यदा शरसंधानं तदानीमेव शत्रवः क्षितौ पतंतीति हेतुकार्ययोः सह

र्यस्तापह्नुतिगर्भत्वं इंदुमंडलादावपह्नुतस्याम्बुनादेः स्वकार्यादिभुन्निवेशनात् इदं त्वपर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि संभ
ति तत्स्वरूपोत्प्रेक्षायां यथा जाते तिरागाद्दिदमेव बिंबं बिंबस्य च व्यक्तमितोऽधरत्वं तयोर्विशेषावगमाक्षमाणां नाम्निभ्रमो
भवदनयोर्जनानां अत्र प्रसिद्धफले बिंबं नामपह्नुत्यानिरागेणातिमिनेन दमयन्त्यधरेमुत्प्रेक्षा पर्यस्तापह्नुतिगर्भा. हेतूत्प्रेक्षायां त
द्गर्भत्वं प्राग्लिखिते हेतूत्प्रेक्षोदाहरणद्वये दृश्यते तत्रांधकारे बाध्यहेतुत्वमपह्नुत्यान्यत्र निवेशितं फलोत्प्रेक्षायां यथा रवि
तप्तो गजः पद्मान्नक्रस्तान्बाधितुं ध्रुवं सरो विशति न स्नातुं गजस्नानं हि निष्फलं अत्र गजस्य सरःप्रवेशं प्रति फले स्नाने फल
त्वमपह्नुत्य पद्मबाधने तन्निवेशितं अलमनया प्रसक्तानुप्रसक्त्या प्रकृतमनुसरामः भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनं
अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः अत्र लोकप्रसिद्धगांभीर्याद्यभेदेपि भेदो वर्णितः यथा वा अन्येयं रूपसंपत्तिरन्या वै

कु॰ नं
१४

नयनेनर्कयमनागताकाशेकोपं गलितहरिणः शीतकिरणः अत्र कोपं गलितहरिण इत्युक्त्या प्रसिद्धचंद्राभेदः ततउत्कर्षश्च गर्भि-
तः एवमन्यत्राप्यूहनीयं यत्र प्रकृतिगर्भत्वं सैव सापह्नवा मता त्वत्कीर्त्तिशुभ्रधारा जनैर्भ्रांताः पश्यंति तां विधौ अत्र त्वत्कीर्त्तिमाधु-
र्यमेवामृतमित्यभिप्रायोक्तिः चंद्रमंडलस्थममृतं न भवतीत्यपह्नुतिगर्भा यथा वा मुक्ताविद्रुममंतरा मधुरसः तुच्छं परं धूर्वहं
प्रालेयद्युतिमंडले खलु तयोरेकाप्तिका नार्णवे तद्वोदंचति शंखमूर्ध्नि नघनः पूर्वाचलाभ्यंतरे जानीमानिविकल्पयंतितरमेयेषां
तसाहृदकाये अत्राधररस एव मधुरस इत्यभिप्रायोक्तिः तुच्छरसो न मधुर इत्यपह्नुतिगर्भा अलंकारसर्वस्वकृतास्य रूपोत्प्रेक्षा-
यां सापह्नवत्वमुक्तं गताद्युतीरंतिमिद्यदनेन ससंभ्रमं पौरविलासिनीषु यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभा-
ति शिप्रा इति तत्त्रियानेवभेदः यत्र छद्मापह्नुतिगर्भत्वमुक्तं तत्र फेनततित्वमपह्नुतं तन्नैवाट्टहासत्वोत्प्रेक्षणादि हृतुप

राम
१४

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः पश्यनीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः विषयस्य स्वशब्देनोल्लेखनं विनापि विषयिवाच
केनैवशब्देनयद्ग्रहणं विषयनिगरणं तत्पूर्वकं विषयस्य विषयिरूपतयाध्यवसानमाहार्यनिश्चयः तस्मिन्सति रूपकातिशयोक्तिः यथा
नीलोत्पलशब्दाभ्यां लोचनयोः कटाक्षाणां च निगरणपूर्वकं तद्रूपताध्यवसानं यथा वा वापीकापिस्फुरनागगनेतत्परंसूक्ष्म
पद्यासोपानालीमधिगतवतीकांचनीमैंद्रनीली अग्रेशैलौसुकृतिसुगमौचंदनच्छन्नदेशौ तत्रत्यानांसुलभममृतंसन्निधा
नात्सुधांशोः अत्रवाप्यादिपदैर्नाभिप्रभृतयोनिगीर्णाः अत्रातिशयोक्तौ रूपकविशेषणं रूपकेदर्शितानांविधानामिहापिसंभ
वोस्तीत्यतिदेशेनप्रदर्शनार्थं तेनात्राप्यभेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिरिति द्वैविध्यं तत्रापि आधिक्यन्यूनताविभागश्चैतत्सर्व
मनुसंधेयं यथा वा सुधाबद्धग्रासैरुपवनचकोरैरनुसृतः किरन्ज्योत्स्नामच्छां लवलिफलपाकप्रणयिनी उपप्राकाराग्रं प्रहिणु

कु·नं
९३

नानायिघनैवमिश्राः स्वगोसहस्रेण समं जनानां गावोपि नेत्रापरनामधेयास्तैनेदमांध्यं खलु नांधकारैः अत्र विवस्वता हनं स्वकिरणैः।
सहजनलोचनानां नयनमसदेव रात्रावांध्यं प्रतिहेतुत्वेनोत्प्रेक्ष्यत इत्यसिद्धविषया हेतूत्प्रेक्षा पूरं विधुर्वर्द्धयितुं पयोधेः शंकेयमे
णांकमणीं कियंति पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयनेकियंति अत्र चंद्रेण हेतुनं समुद्रस्य वृंहणं सदेव नदानेनक्लमस्यः
चंद्रकांतद्रावणस्य कोकांगनाबाष्पस्रावणस्य च फलत्वेनोत्प्रेक्ष्यत इति सिद्धविषया फलोत्प्रेक्षा रथस्थितानां परिवर्त्तनाय पुरात
नानामिव वहनानां उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्यां अत्रोत्तरापथस्याश्वपरिवर्त्तनमसदेव फलत्वेनोत्प्रे
क्ष्यत इत्यसिद्धविषया फलोत्प्रेक्षा एताश्चोत्प्रेक्षाः मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि
तादृशः इत्युत्प्रेक्षाव्यंजकत्वेन परिगणितानां शब्दानामप्रयोगेण गम्योत्प्रेक्षा यथा तन्वीर्निर्भ्रमणश्रांताविवेषालसगतिर्मंदगामिनि :

राम
९३

वशहृमस्यापयतीति तथात्वेश्वतद्विशेषणसाफल्यात् अस्त्विवसंभावनायामपीवशब्दः दूरेस्थितश्चन्द्रेवदन्त इव भातीति चितचीवतरंगा
ग्रैः समुद्रः फेनचंदनं तदादाय करैर्दिङ्गुर्लिंपतीव दिगंगनाः अत्र तरंगाग्रैः फेनचंदनस्य ग्रहणं पेषणनयोत्प्रेक्षते समुद्रादुत्थि
तस्य चंद्रस्य प्रथमं समुद्रप्रदेशस्थानां कराणां दिग्व्यापनं च समुद्रोपांतफेनचंदनग्रहणतल्लेपनोत्प्रेक्षते उभयत्रैव क्रमेण समुद्र
प्रांतगतफेनचंदनपुंजीभवनं दिशां धवलीकरणं च निमित्तमिति फेनचंदनग्रहणकिरणव्यापनयोर्विषययोरनुपादानादनुक्तवि
षयेत्वरूपोत्प्रेक्षे येषां तु यानयोः समुद्रचंद्रयोरेव तन्त्वेकपोषणलेपनरूपधर्मोत्प्रेक्षेति मतं तेषां पूर्वोदाहरणे धर्मिणि धर्म्यंत
रतादात्म्योत्प्रेक्षा इह तु धर्मिणि धर्मसंयोगोत्प्रेक्षेति भेदो वगंतव्यः रात्रौ रवेर्दिवा चेंदोरभावादिव स प्रभुः भूमौ प्रतापयशसी सृष्टवा
न्सततोदिते रात्रौ रवेर्दिवा चंद्रस्याभावः सत्यपि प्रतापयशःसर्गे तद्धेतुरिति तस्य तद्धेतुत्वसंभावनासिद्धविषया हेतूत्प्रेक्षा विवस्वता

लत्वेनोत्प्रेक्षासिद्धविषयाफलोत्प्रेक्षा जलजस्यजलेनिमज्जनावस्थितेरुद्वासनतपस्त्वेनाध्यवसितायाःकामिनीचरणसाम्यप्राप्तिर्नफलमितितस्याग
गनकुसुमायमानताया[illegible]घः फलत्वेनोत्प्रेक्षणंअसिद्धविषयाफलोत्प्रेक्षा अनेनैवक्रमेणोदाहरणान्तराणि वालेंदुवक्राण्यविकासभावाद्बभुः
पलाशान्यतिलोहितानि सद्योवसंतेनसमागतानांनखक्षतानीववनस्थलीनां अत्रपलाशकुसुमानांवक्रत्वलौहित्यसंबंधेननिमित्तेनव
संतनायकसमागतवनस्थलीसंबंधिसद्यःकृतनखक्षततादात्म्यसंभावनोक्तविषयास्वरूपोत्प्रेक्षा पूर्वोदाहरणेनिमित्तस्यनधर्मसंबंधोग
म्य इहतूपात्तइतिभेदः नचेवशब्दस्यसादृश्यपरत्वेनप्रसिद्धत्वादुपमैवास्तु लिंपतीवेत्युदाहरणे लेपनकर्तृतमानत्वादस्यक्रियोपस
र्जनत्ववदिहनखक्षतानामप्युपसर्जनत्वस्योपमाबाधकस्याभावात् उच्यते उपमायांयत्रक्वचिन्निष्ठैरपिनखक्षतैःसहवक्रांशकानयाव
संतनायकसमागतवनस्थलीसंबंधित्वस्यविशेषणस्यानपेक्षितत्वादिहतदुपादानंपलाशकुसुमानांनखक्षततादात्म्यसंभावनायामि

व्याप्तत्वेन निमित्तेनान्वयेन वर्षणकर्तृतादात्म्योत्प्रेक्षा चेति उत्प्रेक्षाद्वयमुक्तं विषयभेदात्तमेवं लिंपति वर्षतीत्याख्यातयोः कर्तृवाचकत्वेपि
भावप्रधानमाख्यातमिति निरुक्तेर्धात्वर्थक्रियायाः स्वप्रधानत्वेन तदुपसर्जनत्वेनान्वितस्य कर्तुरुत्प्रेक्षणीयतयाऽन्यत्रान्वयासंभवात्
श्रुतस्य च हेतोस्तस्योपमासाम्युपन्यानतयान्वयो दंडिना निरस्तः कर्ता यद्युपमानं स्यान्न्यग्भूतोसौ क्रियापदे स्वक्रियासाधनव्यग्रो नालमन्य
दपेक्षितुमिति केचित्तु तमोनभसोर्विषययोर्लिप्तकर्तृकत्वेन वर्षणस्वरूपधर्मोत्प्रेक्षेत्याहुः तन्मते स्वरूपोत्प्रेक्षायां धर्मोत्प्रेक्षा चेत्येन द्वै
विध्यं द्रष्टव्यं वस्तुयोः स्वतः सिद्धेरनिमित्तवक्तृतो विशेषणं न हेतुरिति अहेतोस्तस्य हेतुत्वेन संभावनाद्धेतूत्प्रेक्षा विशेषणस्य विषयस्य सत्त्वा
त्सिद्धविषया चंद्रपद्मविरोधे स्वाभाविके नापि कावदनकांतिप्रेप्सा न हेतुरिति तत्र तद्धेतुत्वसंभावनाद्धेतूत्प्रेक्षा वस्तुतस्तदिच्छाया अभावाद
सिद्धविषया मध्यः स्वयमेव कुचौ धरति तनुकनकदामवक्रत्वेनाध्यवसितानायावल्लिकापशालितापावलादिति मध्यकर्तृककुचधृतेस्तत्फल

वेनाफलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षेत्युच्यते॥ अत्राद्या स्वरूपोत्प्रेक्षा उक्तविषयाऽनुक्तविषया चेति द्विविधा प
रे हेतुफलोत्प्रेक्षे सिद्धविषयासिद्धविषया चेति प्रत्येकं द्विविधे एवं चतुर्णामुत्प्रेक्षाणां धूमस्तोमेत्यादीनि क्रमेणोदाहरणानि
रजनीमुखे सर्वत्र विसृत्वरस्य तमसो नैल्यदृष्टिप्रतिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन सद्यःप्रियविघटित
सर्वदेशस्थितकोकांगनांहृदुपगतप्रज्वलिष्यद्विरहानलधूमस्तोमतादात्म्यसंभावनास्वरूपोत्प्रेक्षा । तमसो विषयस्योपा-
दानादुक्तविषया तमोव्यापनस्य नभःप्रभृतिपर्यंतसकलवस्तुसांद्रमलिनीकरणेन निमित्तेन तमःकर्तृकलेपनतादा
त्म्योत्प्रेक्षा नभःकर्तृकांजनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविषयास्वरूपोत्प्रेक्षा उभयत्रापि विषयभूतस्य तमोव्यापनः
स्यानुपादानादनुक्तविषया तत्र तमसो व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा नभसो भूपर्यंतगाढनीलिम

स्तीत्यपूरयत् कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः निर्यांति स्मरनाराचाः कांतादृक्पातकैतवात् अत्रासत्यत्वाभिधायिना कैतवपदे
ननेमे कांताकटाक्षाः किंतु स्मरनाराचा इत्यपह्नवः प्रतीयते यथा वा रिक्तेषु वारिकथया विपिनोदरेषु मध्याह्नजृंभितमहातपतापः
तप्ताः स्कंधांतरोषितनदद्वाग्निशिखाकुलेन जिह्वां प्रसार्य तरवो जलमर्थयंते संभावनास्यादुत्प्रेक्षा वस्तुहेतुफलात्मना
उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धासिद्धास्पदे परे धूमस्तोमं तमः शंके कोकीविरहशुष्मणां लिंपतीव तमोंगानि वर्षतीवांज
नं नभः रक्तं नवांघ्रियुगलं भुवि विक्षेपणात् ध्रुवं त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी मध्यः किं कुचयोर्धृत्यै वद्धः कनक
दामभिः प्रायोब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा सा वस्तुहे
तुफलात्मतागोचरत्वेन त्रिविधा अत्र वस्तुनः कस्यचिद्वस्त्वंतरतादात्म्यसंभावनायामाद्यरूपोत्प्रेक्षोच्यते अहेतोर्हेतुभा-

यदाह न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे इति विस्पष्टसादृश्यान्तत्वाख्यानोपमा मतेति छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे प्रजल्प
न्मत्पदे लग्नः कांतः किं नहि नूपुरः कस्याश्चित्कांचित्प्रतिरहस्योक्तावन्येन श्रुतायामुक्तेस्तात्पर्यान्तरवर्णनेन तथ्यनिह्नवे छेकापह्नुतिः यथा ना
यिकया नर्मसखीं प्रति प्रजल्पन्मत्पदे लग्न इति स्वनायकवृत्तांते कथ्यमाने तदाकर्ण्य कांतः किमिति शंकितवतीमन्यां प्रति नहि नूपुर इ
ति निह्नवः यथा वा सीत्कारंसजनयति व्रणयत्यधरं तनोति रोमांचं नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः इदमर्थयो
जनया तथ्यनिह्नवे उदाहरणं शाब्दयोजनया यथा पद्मे त्वन्नयने स्मरामि सततं भावो भवत्कुंतले नीले मुह्यति किं करोमि महितैः क्री
तोस्मि ते विभ्रमैः इत्युक्त्वा प्रवचो विनुमाव्यास रुषा निर्भर्त्सितो राधया कृष्णस्तत्परमेव तत्सु पदिशन् क्रीडाविटः पातु वः सर्वमिदं विष
यांतरयोजने उदाहरणं विषये कोप्यवस्थाभेदेन योजने यथा वदंती जारवृत्तांतं पत्यौ धूर्ता सखीधिया पतिं बुध्वा सखि ततः प्रबुद्धा

मैववि धंविधंरमाजनता:परंव्यस्यपमत्रमन्वते निपीयमानगर्गिकुरवेननंगीवैं:स्वशान्लिमांभ्रान्तिनिद्र्याहृरिः पूर्वोदाहरणेतूक्तिनास्य
त्रगुतास्तीभेदः ततश्चपूर्वीपह्नुतिवदत्रापिद्वैविध्यमितिद्रष्टव्यं भ्रांतापह्नुतिरन्यस्यशंकायांभ्रांतिवारणे नापंकरोतितोन्कंयं
ज्वरःकिंनसखिस्मरः अत्रतापंकरोतीतिस्मरदृशांतेकथितेनस्वज्वरसाधारण्यादुक्तुधास्मरव्याज्वरःकिमितिपृष्टेनसखिस्मरइ
तितत्वोक्त्याभ्रांतिवारणंकृतं यथावा नागरिकैःसमधिकोल्लतिरिहृतहिषःकोयमुभयतःशुकःनहिनहिकरिकलभोयंघटइदं
त्रोयमस्यनत्रुपुकुः इदंसंभवद्भ्रांतिपूर्विकायांभ्रांतापह्नुतावुदाहरणं कल्पितभ्रांतिपूर्वायथा जटानेयंवेणीकृतनवकलापो
नगरंलगलेकस्तूरीयशिरसिशशिलेखानकुङ्कुमं इयंभ्रान्तिर्नागेप्रियविरहजन्माधवलिमापुरारातिभ्रांत्याकुसुमशरकिंमांव्य
थयसि अत्रकल्पितभ्रांतिर्जटानेयमित्यादिनिषेधमात्रेणोन्नेया पूर्ववत्सूश्राभावात् दंडीत्वत्रतत्वाख्यानोपमेत्युपमाभेदंमेने

न्छायमैक्षन्त्यरे इंदौ पद्दलितेंद्रनीलशकलछायामंदरीदृश्यते नसांद्रं निशिपीतमंधतमसं कुक्षिस्थमालोक्यते अत्रोत्प्रेक्षितधर्म
णा नष्टापह्नवः परपक्षन्योपन्यासादर्थसिद्धः सएवयुक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिनेंदुस्तीव्रोननिष्पंकः सिंधोरौर्वोयमुत्थितः अ:
त्रचंद्रस्वतीव्रत्वनैशत्वयुक्तिभ्यांचंद्रत्वस्यर्पत्वापह्नवोवडवानलत्वारेपार्थः यथावा मंथानभूमिधरमूलशिलासहस्रसंघट्टनव्र
णकिणः स्फुरतींदुमध्ये छायामृगः शशकइत्यतिपामरोक्तिस्तेषांकथंविदपि नत्र नहि प्रसक्तिः अत्रचंद्रमध्ये मंथनकालिकमं
दरशिलासंघट्टनव्रणकिणस्यैवछायादीनांसभवोनास्तीतिछायात्वाद्यपह्नवः पामरवचनत्वोपन्यासेनाविष्कृतः अन्यत्रतस्यारो
पार्थः पर्यस्तापह्नुतिस्तुसः नायंसुधांशुः किंतर्हि सुधांशुः प्रेयसीमुखं यत्रक्वचिद्वस्तुनितद्गतधर्मनिह्नवः अन्यत्रवर्णनीयेवस्तु
नितस्यधर्मस्यारोपार्थः सापर्यस्तापह्नुतिः यथाचंद्रेचंद्रत्वनिषेधोवर्णनीयेवस्तुनिप्रेयसीमुखेतदारोपार्थः यथावा हालाहलो

राम
२

नामपिहृतविलसत्पांशुरस्तादंभसः स्फुरदरविंदवाहहस्ता उदीक्ष्यश्रियमिवकांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्यशौरिः ॥ पू
र्वत्रस्मृतिमदुदाहरणेसदृशस्यैवस्मृतिः अत्रसदृशलक्ष्मीस्मृतिपूर्वकंतत्संबंधिनोजलनिधिमंथनस्यापिस्मृतिरितिभेदः पलाश
कुसुमभ्रांत्याशुकतुंडेपतत्यलिः सोपिजंबूफलभ्रांत्यातमलिंधर्तुमिच्छति अत्रान्योन्यविषयभ्रांतिनिबंधनः पूर्वस्माद्विशेषः जीवनग्र
हणेनम्रागृहीत्वापुनरुत्थिताः किंकनिष्ठाःकिंज्येष्ठाःघटीयंत्रस्यदुर्जनाः पूर्वोदाहरणेसंदेहः प्रसिद्धकोटिकः अयंत्वप्रसिद्धको
टिकइत्यनयोर्भेदः शुद्धापह्नुतिरन्यस्यारोपार्थोधर्मनिह्नवः नायंसुधांशुः किंतर्हिव्योमगंगासरोरुहं वर्णनीयेवस्तुनितत्सदृ
शधर्मारोपफलकस्तदीयधर्मनिह्नवः कविमतिविकासोत्प्रेक्षितधर्मांतरस्यापिवानिह्नवः शुद्धापह्नुतिरियंयथाचंद्रेसुनदीपुंडरीक
त्वारोपफलकस्तदीयधर्मस्यचंद्रत्वस्यापह्नवः यथावा अंकंकेपिशशंकिरेजलनिधेः पंकंपरेमेनिरेसारंगंकतिचिच्चसंजगदिरे

पिकामोपचारवैदग्ध्योननित्यवल्लभः सोयंदिव्यभुवेतिभुवनिसम्भृहे सोल्के ठरूढः बालाभिस्तवाल्लगनरूपेवेषालंकारदर्शनमा
त्रलालसाभिर्यथावस्थितवेषादिभ्रमोदृष्ट इतिबहुधोल्लेखः पूर्वैकामत्वायारोपरूपकसंकीर्णः अयंतुशुद्ध इतिभेदः एकेनबहु
धोल्लेखेप्यसौविषयभेदतः गुरुर्वचस्यर्जुनोयंकीर्त्तौभीष्मः शरासने ग्रहीतृभेदाभावेपिविषयभेदाद्बहुधोल्लेखनादसावुल्लेखः उ:
दाहरणंश्लेषसंकीर्णंवचोविषयेमहत्वाद्गुरिति निबद्धरूपत्तिरित्यायथार्थान्तरस्यापिक्रोडीकरणात् शुद्धोयथा अह्नशांतुवपोःकृशंवि
लग्नेविपुलंवक्षसिविस्तृतंनितंबे अधरेरुणमाविरस्तिचित्तेकरुणाशालिकपालिभागधेयं स्यात्स्मृतिभ्रान्तिसंदेहैस्तदंकालंकृति
त्रयं पंकजंपश्यतःकांतामुखंमेगाहतेमनः अयंभ्रमतनमधुपस्तन्मुखंवेत्तिपंकजं पंकजंवासुधांशुर्वेत्यस्माकंतुननिर्णयः स्मृतिभ्रान्ति
संदेहैः सादृश्यान्निबध्यमानैः स्मृतिमान्भ्रान्तिमान्संदेह इतिस्मृत्यादिपदांकितमलंकारत्रयंभवति तत्रक्रमेणोदाहृतं यथावा दिव्याः

राम

मवत्नमथो विश्वकृद्देवतष्टेस्त्रारोप्यमाणस्त्वान्तरः सौमित्रिमैत्रीरूपतापन्नात्त्रोपकारलक्षणकार्योपयोगान्स्वात्मनागुहस्य
रघुनाथैकशरणापेक्षत्वेन चैतन्नार्थित्वाभावादिति परिणामः बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते स्त्रीभिः कामोर्थिभिः स्वर्द्रुः
कालः शत्रुभिरैक्षि सः यत्र नानाविधधर्मयोग्येकं वस्तु तत्तद्धर्मरूपनिमित्तभेदादनेकेन ग्रहीत्राऽनेकधोल्लिख्यते तत्रोल्लेखः अने
कधोल्लेखने रत्यर्थित्वभयादिकं यथार्हं प्रयोजकं रतिरभिरतिः अर्थित्वं लिप्सा भयं भीतिः स्त्रीभिरित्याद्युदाहरणं ऽ अत्रैकस्यै
व राज्ञः सौन्दर्यवितरणपराक्रमशालीति स्त्रीभिरर्थिभिः शत्रुभिश्च रत्यर्थित्वभयैः कामकल्पतरुकालरूपो दृष्टः यथा वा गज
त्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकं अत्र यस्तथाभीतं भक्तं गजेन्द्रंपात्रायते स्म सो
यमादिपुरुषोत्तम इति वृद्धाभिः संसारभीत्यानन्दमयार्थिनीभिः हल्लीसमण्डलं प्रविशन्दृष्टः यस्तथा चञ्चलत्वेन प्रसिद्धायाः श्रियो

68

चित्रमीमांसायां त्वेवं परिणामः क्रियार्थश्चेद्विषयी विषयात्मना प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा यत्रारोप्यमाणो विष
यी किंचित्कार्योपयोगित्वेन निबध्यमानः स्वतस्तस्य तदुपयोगित्वासंभवात्प्रकृतात्मतापत्तिमपेक्षते तत्र परिणामालंकारः त
त्रोदाहरणं प्रसन्नेनेति अत्र हि अब्जस्य वीक्षणोपयोगित्वं निबध्यते न तु दृशः मयूरव्यंसकादिसमासेनोत्तरपदार्थप्राधान्यात
न त्वोपमितसमासाश्रयणेन दृगब्जमिवेति पूर्वपदार्थप्राधान्यमक्षीणमिति वाच्यं प्रसन्नेनेति सामान्यधर्मप्रयोगादुपमिते व्याघ्रा
दिभिः सामान्याप्रयोगे इति तदप्रयोग एवोपमितसमासानुशासनात् अब्जस्य वीक्षणोपयोगित्वं न स्वात्मना संभवतीत्यतस्त
स्य प्रकृतदृगात्मतापरिणत्यपेक्षणात्परिणामालंकारः यथा वा तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीयस्तस्मै
मैत्री १ सौमित्रिमैत्रीमयमुपकृतवानान्तरं नाविकाय व्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं कृच्छ्रादन्वीयमानः क्षण

प
सत्यंयदंपरःशीतांशुहृज्जेभवतेदर्पःस्यादमृतेनवेदिहृतदप्यस्येवविनाधरे अत्रापरःशीतांशुरित्यनेनवक्त्रेंदोःप्रसिद्धचंद्राभे
दमाविष्कृत्यप्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेनोत्कर्षापकर्षयोरविभावनादनुभयताद्रूप्यरूपकंअचतुर्वदनोब्रह्मा
द्विबाहुरपरोहरिः अभाललोचनःशंभुर्भगवान्बादरायणः अत्रहिब्रह्मादावपरइतिविशेषणात्त्रिक्षापिताद्रूप्यमात्रविवक्षावि
भाविता चतुर्वदनत्वादिवैकल्यवोक्तमितिन्यूनताद्रूप्यरूपकं इदंविशेषोक्त्युदाहरणमितिवामनमतं यदाह एकगुणहाना
वन्यगुणसाम्यदार्ढ्यंविशेषोक्तिरिति किमसुभिर्ग्लपितैर्जडमन्यसेमयिनिमज्जतुभीमसुतामनः ममकिलश्रुतिमाहतदर्थिकां
नलमुखेंदुपरांविबुधःस्मरः अत्रदमयंतीहृतत्वंरोपालंभेप्रसिद्धचंद्रेननिर्वाणकालिकमनःप्रवेशश्रुतिनास्यर्थीविषयः
किंतुनलमुखचंद्रस्यदेवेनतोस्याधिकाप्रतिपादनादधिकताद्रूप्यरूपक रूपकस्यसावयवत्वनिरवयवत्वादिभेदप्रपंचस्तु

अ.न.
६

स्याजः प्रतिपाद्यतंप्रतिकंसकैटभवधयोः पौर्वापर्यप्रश्नव्याजेन तत्तादात्म्यदृढीकरणात्पूर्वावस्थातउत्कर्षापकर्षयोरविभावना
द्वातुभयाभेदरूपकं वेधाद्वेधाभ्रमंचक्रेकांतासुकनकेषुच तासुतेष्वप्यनासक्तः साक्षाद्भर्गोनराकृतिः अत्रसाक्षादितिविशेषणेन
विरक्तस्यप्रसिद्धशिवतादात्म्यमुपदिश्यनराकृतिरितिद्विभुजत्वविवेकत्वप्रतिपादनात्न्यूनाभेदरूपकं त्वय्यागतेकिमितिवेपतए
षसिंधुस्त्वंसेतुमंथकृदतः किमसौविभेति द्वीपांतरेऽपिनहितेस्मवशेवहोघत्वांराजपुंगवनिषेवतसत्वलक्ष्मीः अत्रत्वंसेतुमंथकृ
दितिसेतोरम्नमंथनस्यचकर्तृरूपोत्तमेनवर्णनीयस्यतादात्म्यमुक्तंतथापित्वदागमनेसेतुबंधनायमथनायवेतिसमुद्रेणान
भेतव्यं द्वीपांतराणामपित्वद्वशंवदत्वेनपूर्ववद्द्वीपांतरेजेतव्याभावात्प्राप्तलक्ष्मीकत्वेनमंथनप्रसक्त्यभावाच्चेतिपूर्वावस्थातउत्कर्ष
विभावनादधिकाभेदरूपकं किंपद्मस्यरुचिंनहंतिनयनानंदंविधत्तेनकिंवृद्धिंवाझषकेतनस्यकुरुतेनालोकमात्रेणकिं वक्त्रेंदौतव

रामः
६

प्यरूपकाणि वाधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानि येनदग्धा इति विशेषणेन वर्णनीये राज्ञि प्रसिद्धः
शिवाभेदानुरंजनाच्छिवस्यापूर्वावस्थातो वर्णनीयराजभावावस्थायां न्यूनत्वाधिकत्वयोरवर्णनादनुभयाभेदरूपकमाद्यं द्वि
तीयलोचनप्रहाणेनास्यापूर्वावस्थातो न्यूनतादर्शनान्न्यूनाभेदरूपकं द्वितीयं न्यूनत्ववर्णनमप्यभेदहान्यापादकत्वान्न चमत्का
रकारकारि विषमदृष्टित्वपरित्यागेन जगद्रक्षकत्वोक्त्या शिवस्यापूर्वावस्थातो वर्णनीयराजभावावस्थायामुत्कर्षविभावनादधि
काभेदरूपकं तृतीयं एवमुत्तरोत्तरताद्रूप्यरूपकोदाहरणेष्वपि क्रमेणानुभयन्यूनाधिकभावा ऊह्याः अनेनैव क्रमेणोदाह
रणांतराणि चंद्रज्योत्स्नाविशदपुलिने सैकतेस्मिन्सरय्वा वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् एको वक्ति प्रथमनिहतं
कैटभं कंसमन्यस्तत्त्वं कथय भगवन्को हतस्तत्र पूर्वं अत्र सत्वमित्यनेन कंसकैटभयोर्हंता रघुराजः तत्तादात्म्यं वर्णनीयर

ऊ.न.
५

क्षेपरूपत्वादाक्षेपालंकारमाहुः विषय्यभेदताद्रूप्यरंजनंविषयस्ययत् रूपकंतत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः अयंहिधू
र्जटिः साक्षाद्येनदग्धाःपुरःक्षणात् अयमास्तेविनाशंभुस्तार्तीयीकंविलोचनं शंभुर्विश्वमवत्यद्यस्वीकृत्यसमदृष्टितां अस्या
मुखेंदुनालब्धेनेत्रानंदेकिमिंदुना साध्वीयमपरालक्ष्मीरसुधासागरोदिता अयंकलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते विष
यिः उपमानभूतंपद्मादि विषयस्तूपमेयंवर्णनीयमुखादि विषयिणोरूपेणविषयस्यरंजनंरूपकं अन्यरूपेणरूपव
तः करणात् तच्चक्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्वचिद्भेदेप्रतीयमानएवतदीयधर्मारोपमात्रपर्यवसितं तत्राद्य
रूपकंतावद्द्विविधं अभेदरूपकंताद्रूप्यरूपकमिति द्विविधमपिप्रत्येकंत्रिविधं प्रसिद्धविषय्याधिक्यवर्णनेन तन्न्यूनत्व
वर्णनेनानुभयोक्त्याच एवंहिरूपकंषड्विधं अयंहीत्यादिसार्द्धश्लोकेनाभेदरूपकाणि अस्यामुखेंदुनेत्यादिसार्द्धश्लोकेनताद्रू

राम:
५

स्यात्तावतातस्यतिरस्कारः पूर्वप्रतीपवैपरीत्येनतृतीयंप्रतीपम् यथावा अहमेवगुरुःसुदारुणानामितिहालाहलमास्मतात
दृप्यःननुसंतिभवादृशानिभूयोभुवनेस्मिन्वचनानिदुर्जनानाम् वर्ण्येनान्यस्योपमायाअनिष्पत्तिवचश्चतत् मुधापवादोमु
ग्धाक्षित्वन्मुखाभंकिलांबुजंअत्रवर्ण्येनवर्ण्योपमित्यनिष्पत्तिवचनंपूर्वेभ्यउत्कर्षशालित्वंतुर्थप्रतीपे उदाहरणेमुधापवादइत्यु
क्त्याउपमित्यनिष्पत्तिर्हूटिता यथावा आकर्ण्यसरोजाक्षिवचनीयमिदंभुवि शशांकस्तववक्त्रेणपामरैरुपमीयते प्रतीपमु
पमानस्यकैमर्थ्यमपिमन्वते इत्थंचेद्वदनंतस्याःकिंपद्येनकिमिंदुना उपमेयस्यैवोपमानधूर्वहत्वेनोपमानप्रातिलोम्यात्पं
चमंप्रतीपं यथावा तदोजसस्तद्यशसःस्थिताविमौवृथेतिचित्तेकुरुतेयदायदा तनोतिभानोःपरिवेषकैतवात्तदाविधिःकुं
डलनांविधोरपिकेचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेनतदंतर्भावंमन्यंते अन्येतुपंचमंप्रतीपप्रकारमुपमाना

कु.न.
४

मदधारेवास्यनिर्भरः स्त्ववलि प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् त्वल्लोचनसमंपद्मंत्वद्वक्त्रसदृशोविधुः प्रसिद्धोपमानोप
मेयभावःप्रातिलोम्यात्प्रतीपं यथावा यत्त्वन्नेत्रसमानकान्तिसलिलेमग्नंतदिन्दीवरंमेघैरन्तरितः प्रियेतवमुखच्छायानुकारीश
शी येपित्वद्गमनानुकारिगतयस्तेराजहंसागतास्त्वत्सादृश्यविनोदमात्रमपिमेदैवेननक्षम्यते अन्योपमेयलाभेनवर्ण्य
स्यानादरश्चतत् अलंगर्वेणतेवक्त्रकान्त्याचन्द्रोपितादृशः अत्रोत्कृष्टगुणतयावर्ण्यमानस्यान्यत्रसादृश्यमसहमानस्योप
मेयंकिंचित्प्रदर्श्यतावतस्यतिरस्कारोपिद्वितीयंप्रतीपम् पूर्वस्मादपिविच्छित्तिविशेषशालि यथावा गर्वमसंभाव्यमिमंलोच
नयुगलेनकिंवहसिमुग्धे संतीदृशानिदिशिदिशिसरस्सुननुनीलनलिनानि वर्ण्योपमेयलाभेनतथान्यस्याप्यनादरःकःक्रौ
र्यदर्पस्तेमृत्योत्वत्तुल्याःसंतिहिस्त्रियः अत्रोत्कृष्टगुणतयाक्वचिदुपमानभावमसहमानस्यावर्ण्यस्यवर्ण्यमुपमेयंप्रक

राम:
४

र्यवसाने यथा वा गगनं गगनाकारं सागरः सागरोपमः ॥ रामरावणयोर्युद्धं रामरावणयोरिव पूर्वोदाहरणे श्रीमत्वस्य धर्मस्यो
पादानमस्ति । इह तु गगनादिष्वेव उत्पादेर्धर्मस्यानन्वयालीति विशेषः । पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता । धर्मोर्थ इव पूर्णश्री
रर्थो धर्म इव त्वयि । द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनं तृतीयसदृशव्यवच्छेदार्थं धर्मार्थयोर्हि कस्याचित्वे न विन्मादृश्पेवं
र्णितेन तस्यान्येन सादृश्यमर्थक्षमपि मुखतो वर्ण्यमानं तृतीयसदृशव्यवच्छेदार्थं फलति यथा वा खमिव जलं जलमिव हंसः
वचंद्रश्चंद्र इव हंसः कुमुदाकारास्ताराः ताराकाराणि कुमुदानि पूर्वत्र पूर्णश्रीरिति धर्म उपात्तः । इह तु निर्मलत्वादिधर्मो नोपात्त इ
ति विशेषः । उदाहरणद्वयेपि प्रकृतयोरेवोपमानोपमेयत्वकल्पनं राज्ञि धर्मार्थसमृद्धेः शरदि गगनसलिलादीनैर्मल्यस्य व
र्णनीयत्वात् प्रकृताप्रकृतयोरप्येषा संभवति यथा गिरिरिव गजराजोयं गजराज इवोच्चकैर्विभाति गिरिः । निर्झर इव मदधारा

४२

त्वेनोपमुक्तेनितदर्थः ततश्च काकागमनतालपतनसमागमरूपस्य काककृतताँलोपभोगरूपस्य चोपमानस्योपादाना
त्प्रत्ययार्थोपमायामुपमानलोपः समासार्थोपमायां वाचकोपमानलोपः सर्वोप्ययं लोपः छप्रत्ययविधायकशास्त्रकृतः॥ अ
वितर्कितसंभवमिति साधारणधर्मस्योपादाने प्रत्ययार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवा
चकलोप इति सूक्ष्मदृशावधानव्यमन्येषामुदाहरणांतराणि विस्तरभयान्न लिख्यंते उपमानोपमेयत्वं यदेकस्यैव वस्तुनः
॥ इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः एकस्यैव वस्तुन उपमानोपमेयत्ववर्णनमनन्वयः वर्ण्यमानमपित्वस्यालेन
साधर्म्यं नाचेतीति कुम्भन्ते: अनन्वयिनोप्यर्थस्य प्रतिपादने सदृशांतरव्यवछेदेनोपमेयत्वद्योतनाय इंदुरिंदुरिव श्री
मानित्युक्ते श्रीमत्वेन इंदुरस्य नान्यः सदृशोस्तीति सदृशांतरव्यवछेदो लभ्यते ततश्च स्वेनापि सादृश्यासंभवादनुपमेयत्वेप

नयाकर्पूरंनीतिन्तदुपादानस्यापिसंभवात् कान्त्यास्मरवधूयंतीत्यत्रवाचकोपमेयलोपः अत्रकांत्येतिविशेषणसामर्थ्या
त्स्वात्मानंकामवधूमिवाचरंतीत्यस्यार्थस्यागम्यमानतयास्वात्मनउपमेयस्यसहोपमावाचकेनानुपादानात् सत्वैच्छिकः
स्वात्मानंस्मरवधूयंतीत्युपमेयोपादानस्यापिसंभवात् काकतालीय मित्यत्रकाकतालशब्दौवृत्तिविषयेकाकतालस
मवेतक्रियावर्त्तिनौतेनकाकागमनमिवतालपतनमिवकाकतालमितीवार्थेसमासात्तद्विषयादितिज्ञापकात्समास
:उभयत्रोपमेयत्वस्यकाविद्गमनंतत्रैवरहासितव्याघ्रावस्थानेच तेनरवसन्त्याश्चसमागमः काकतालसमागमस
दृशइतिफलति ततःकाकतालमिवकाकतालीयमितिद्वितीयस्मिन्निवार्थेसमासात्तद्विषयादितिसूत्रेणइवेप्र
तिकृतावित्यधिकारस्थेनछप्रत्ययः। तथाचपतन्नवदलितंतालफलंयत्काकेनोपभुक्तंएवंरहोदर्शनंक्षुमितत्तद्यानत्वो।

कु·न रवक्ष्यंतीत्युक्तात्तन्नीरसोमया यथा मेलनंतत्त्वलाभोमेयश्चनद्रतेः नदैनत्काकतालीयमवितर्कितसंभवम् उपमेयादी
२ नांचतुर्णांमध्येएकस्यद्वयोस्त्रयाणांवाप्रतिपादकशब्दस्याभावेनलुप्तोपमेत्युच्यते साचाष्टधा यथा वाचकलुप्ता धर्मलु
प्ता धर्मवाचकलुप्ता· वाचकोपमेयलुप्ता· उपमानलुप्ता· वाचकोपमानलुप्ता· धर्मोपमानलुप्ता· धर्मोपमानवाचकलुप्ता·
चेति तत्रोपमानलोपरहिताश्चत्वारोभेदास्तडिद्गौरीत्यादिश्लोकेनदर्शिताः तद्वंतोभेदाउत्तरश्लोकेन तडिद्गौरीत्यत्रवाच
कलोपः तडिदिवगौरीत्यर्थेउपमानानिसामान्यवचनैरितिसमासविधायकशास्त्रकृतः इंदुतुल्यास्येत्यत्रधर्मलोपःस्वै
च्छिकः नशास्त्रकृतः कांत्याइंदुतुल्यास्येत्यपिवक्तुंशक्यत्वात् कर्पूरंतीत्यत्रधर्मवाचकलोपः कर्पूरमिवाचरंतीत्यर्थेवि राम:
हितस्यकर्पूरतदानंदात्मकाचारार्थकस्यक्विपः इवशब्देनसहलोपात् अत्रधर्मलोपःस्वेच्छिकः नयनयोरानंदात्मक २

दानात् यथा वा गुणदोषौ बुधो गृह्णन्निंदुक्ष्वेडाविवेश्वरः शिरसा श्लाघते पूर्वं परं कंठे नियच्छति अत्र यद्यप्युपमानोपमेययोर
नैकः साधारणो धर्मः उपमाने ईश्वरे इंदुगरलयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्येंदोः शिरसा श्लाघनं वहनं· उत्तरस्य गरलस्य
कंठे नियमनं स्थापनं· उपमेये तु बुधे गुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनं शिरःकंपेनाभिनंदनं
उत्तरस्य दोषस्य कंठे नियमनं कंठादुपरि वाचानुद्घाटनमिति भेदात्· तथापि इंदुगरलयोर्गुणदोषयोश्च बिंबप्रतिबिंबभावे
नाभेदादुपादानज्ञानादीनां गृह्णन्नित्याद्येकशब्दोपादानेनाभेदाध्यवसायाच्च साधारणधर्मतेति पूर्वस्माद्विशेषः वस्तुतो भिन्न
योरुपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादाने बिंबप्रतिबिंबभाव इत्यालंकारिकसमयः वर्ण्योपमा
नधर्माणामुपमावाचकस्य च एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा तडिद्गौरींदुतुल्यास्या कर्पूरंती दृशोर्मम· कांत्यास्य

श्रीगणेशाय नमः अमरीकबरीभारभ्रमरीमुखरीकृतम् दूरीकरोतु दुरितं गौरीचरणपंकजम् ॥१॥ परस्परतपःसंपत्फलायितपरस्परौ प्रपंचमातापितरौ प्रांचौ जायापती स्तुमः २ उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ३ अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ४ येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः प्रायस्त एवैतेषामितरेषां त्वभिनवा विरच्यंते ५ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः हंसीव कृष्ण ते कीर्त्तिः स्वर्गंगामवगाहते ६ यत्रोपमानोपमेययोः सहृदयहृदयाह्लादकारित्वेन चारु सादृश्यमुद्भूततयोल्लसति व्यंग्यमर्यादां विना प्रकाशते तत्रोपमालंकारः हंसीवेत्युदाहरणम् इयं च पूर्णोपमेत्युच्यते हंसी कीर्त्तिः स्वर्गंगावगाहनं इव शब्दश्चेत्येतेषामुपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामप्युपा

४३५

लक्ष्य लक्षणासंग्रहः (कुवलयानन्द)

।सिद्धान्तलक्षण सरला तत्त्वालोकः

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ सिद्धान्तलहरी सरलतत्त्वालोकः प्रारभ्य
ते॥ मूले नन्वित्यादि शङ्का सिद्धान्तमाह अत्रोच्यत इत्यादि अत्र मयेति पदस्य
अध्याहारः समानविभक्तिक नामार्थयोरभेदेनान्वयस्य व्युत्पन्नत्वादभेदेन व्यात्तौ
निरूढसामानाधिकरण्यस्यान्वयः, तथा च मया. अत्र सामानाधिकरण्याभेदान्वया
त्रिदच्यते. इत्यन्वयस्तत्रास्मच्छब्दार्थे गङ्गेशोपाध्यायस्तृतीयार्थः कृति तस्य समवेतत्व
सम्बन्धेनास्मच्छब्दार्थेऽन्वयः, उच्यत इत्यत्र वच् धात्वर्थो बोधानुकूल व्यापारस्तिङर्थो
विषयः इदं शब्दार्थो जिज्ञासा विषयीभूत पूर्वपक्षसमाप्त्युत्तरकालत्वम् प्रत्ययार्थो वृत्ति
त्वं, अत्र शब्दार्थो जिज्ञासा विषयीभूतो वा, अर्थात् मत्समवेतकृतिजन्यः जिज्ञासावि
षयीभूत पूर्वपक्षसमाप्त्युत्तरकालवृत्तिर्यः प्रतिपत्त्यनुकूल व्यापारस्तादृशव्यापारविषयः

॥१॥ प्रतियोग्यसमानाधि॰ सामानाधिकरण्याभिन्ना व्याप्तिरिति विनाभावीशाब्दबोधः ॥

लि॰ली॰ ननु यत्पदार्थस्य यत्पदार्थे अन्वयस्याकाङ्क्षा तत्र तयोः पदयोरव्यवधानेनोपस्थि ।तवालोकः

तिः कारणम्, अन्यथा सत्यपि योग्यतातात्पर्यादिज्ञाने गिरिर्भुक्तमग्निमान्देवदत्ते

न, घटो न कम्बुग्रीवादिमाञ्छुक्लः पट इत्यत्र शाब्दबोधापत्तिरतः सो नियमः स्वीक

र्त्तव्यम्, तथा च ~~प्रति~~ विवक्षित यत् पदार्थे ~~प्र~~प्रतियोगितावच्छेदकावच्छिन्न.

टी स्याभेदेन प्र[illegible]यते प्रतियोगितावच्छेदकावच्छिन्नत्र पदयोरव्यवधानेनोप

स्थित्यभावात्; यदि च प्रतियोगितावच्छेदकावच्छिन्नेसाध्यभेदो निवेश्यते तर्हि

वह्नित्वावच्छिन्नो प्रतियोगितावच्छेदकावच्छिन्नत्वाद्व्याप्तिरित्यग्रिम ग्रन्थावि ॥१॥

रोधापत्तिः; यदि च ग्रन्थविरोधापत्त्या कार्यकारणभावे सङ्कोचो न कर्तव्य मिति

चेन्न धूमवान्वह्नेरित्यत्र प्रतियोगितावच्छेदकावच्छिन्नो घटे धूमभेदः सत्त्वादिति

व्याप्त्यापत्तेः। काद्वे.सीनास्तिक इत्युक्तौ कांश्रे सौत्त्वावच्छेदेन. नास्तिकत्व.विधे

यस्य स्वाभाविकेन भानं भवति तथा अनवच्छेदकावच्छेदेनान्वयस्य स्वाभावि

कत्वात् प्रकृतेऽपि प्रतियोगितावच्छेदकावच्छिन्नत्वावच्छेदेन साध्यभेदनि

वेशोवाऽरस्तासंभवः इति चेन्न. धूमपटोभयभेदमादाय दोषतादवस्थ्यात् यदि

अथवा प्रतियोगितायां साध्यतावच्छेदकेतरानवच्छिन्नत्वं

च भेद~~प्रतियोगितायां साध्यतावच्छेदकेतरानवच्छिन्नत्वम्~~ प्रतियोगितावच्छे

गत

दकत्वपर्याप्त्या साध्यतावच्छेदकगतत्वम् इति पर्याप्तिघटितं वा निवेश्यते चेन्न

भेदवान्वह्नेरित्यादौ उभयथैव दोषतादवस्थ्यम्. तथा च वह्निधूमोभयवा

न्धूमादित्यादावपि उभयथैवातिव्याप्तेश्च. तद्वारणाय हेतुसमानाधिकरणाभाव.

(१) प्रतीकस्यापि पर्याप्तिक ह्रासतीकारे दोषः तादवस्थ्यमतो द्वितीयपक्षः

(२) साध्यतावच्छेदकतादितरोभयाभावविशि
ष्टत्वनिवेशे घटपटोभयभेदमादाय न दो
षोऽतो द्वितीयस्थलम्

॥२॥ प्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकोभयावृत्तिधर्मा[१]वच्छिन्नप्रतियोगिताकभेदत्वादीयप्रतियोगितावच्छेदकसामानाधिकरण्यस्य साध्यतावच्छेदके निवेशे. स्वरूपेण प्रमेयसाध्यकस्थले प्रतियोगिव्यधिकरणस्याभावाद् प्रमीतिबाध्यत्वेनेति भेदग्राहित्वमशक्यतया. वाच्यत्वाधिकरणावृत्त्यभावप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापको यो निरुक्तभेदः स वाच्यत्वेनान्याकारकत्वादीयप्रतियोगितावच्छेदकसमानाधिकरणप्रमेयत्वे सत्त्वाद् इति न समन्वयः। उभयसाध्यकव्यभिचारिणि. प्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकनिरुक्तभेदस्याप्रसिद्ध्या नातिव्याप्तिः। वह्निमान्धूमादत्र इष्टापत्तिः, अनवच्छेदकानुसरणेऽपि दोषः तादवस्थ्यात् इति चेदुच्यते. ॥२॥

(१) मात्र ग्रहणेन तद्व्यापकत्वग्रहणेऽप्रमीतिभेदग्राहित्वं न शक्यते अन्यथा दोषलोदवस्थाने

तादात्म्येन प्रमेयसाध्यकेऽव्याप्तेः साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यन
धिकरणावृत्तित्वेन वाच्यत्वभेदाप्रसिद्धेः शक्यत्वाद्वा त्वयापि प्रतियोगि
तावच्छेदकावच्छिन्नत्वात् तद्व्यापकनिरुक्तभेदाप्रसिद्धेश्च ॥ नन्वे
व प्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकप्रतियोग्यवृत्तिभेदाप्रसि
द्धौ प्रतियोग्यवृत्तिभेदप्रतियोगिसाध्यसामानाधिकरण्यनिवेशो
पि निरस्तः ॥ यच्च प्रधाननिर्देशात्तया प्रतियोगितावच्छेदकत्वावच्छेदे
न साध्यतावच्छेदकस्य भेदविवक्षणेऽपि प्रमेयाश्रयत्वाद्यात्मकप्र
मेयभेदाप्रसिद्ध्या पुनरव्याप्तितादवस्थ्यम्[१] ॥ यदि च हेत्वधिक
रणावृत्त्यभावप्रतियोगितावच्छेदकत्वव्यापकत्वोक्तः प्रसिद्धः स्याद्[२].

(१) घटपटोभयभेदप्रसिद्धेर्न दोष इति चेत् शक्य
तथापि घटोभयसाध्यकेऽव्याप्तिः वारणाय पर्या
प्त्याः व्यासज्यवृत्तिधर्मानवच्छिन्नत्वनिवेशे तत्र
वारणेऽपि मतान्तरदोषप्रसङ्गे इति.

२ त्वावच्छेदकसं० अभिवेशे. वह्निसंविशिष्ट कीनाऽप्रामाण्यादत्रद्धातिदे
नवह्नित्वविशिष्टाभावमादायाव्याप्तिः तदवच्छेदकताविवि
शिष्टैव सम्वाद्.

च्छेदकसम्बन्धावच्छिन्नत्व. स्व[१]सामानाधिकरण्य स्वानवच्छे[२]दकानव
~~च्छेदकानव~~च्छिन्नत्व स्ववृत्ति[३]त्वैतत्त्रितयसम्बन्धेन. साध्यतावच्छेदक
ताविशिष्टो यो याकारकभेदस्तदीयप्रतियोगितावच्छेदकाश्रयो साध्य यः
तावच्छेदकताश्रयत्वाद्य सामानाधिकरण्य निवेशे. वह्निमान्धूमा
द्, वह्निः धूमाश्रयवान्धूमादित्यत्र न दोषः स्वरूपेण प्रमेयत्वावच्छिन्न
न साध्यतावच्छेदकताविशिष्टा प्रमेयत्वनिष्ठावच्छेदकताया भेद
गृहीत्वैव तद्द्वारा समन्वयः । स्वरूपेण प्रमेयाश्रयवान्धूमादित्यत्रापि
साध्यतावच्छेदकताविशिष्टा प्रमेयनिष्ठावच्छेदकताभेदमादाय न दो
ष इति चेन्न तथा निवेशे अतिगौरवमतस्त्याज्यम् ॥ ॥ ॥ ॥३॥

(१) वह्निमान्धूमादत्र. घटत्वनिष्ठावच्छेदकता
विविशिष्टत्वादव्याप्तिवारणाय निवेशः
(२) वह्निमान्धूमाज्ज्ञानत्वादत्र जातिमदभा
वमादायाव्याप्तिवारणाय निवेशः ॥३॥
(३) प्रमेयाश्रयसाध्ये दोषवारणाय. निवेशः

पूर्वोक्तरीयम सर्वत्रस्वीकारे काव्यप्रबन्धेषु. "नाथेसुधांशुकिरीटहिव्यो
मगङ्गासरोरुहम्" इत्यत्र. नभपदार्थस्य आयपदार्थे अन्वयादेतस्मि
न्नेसुधांशौ. व्योमगङ्गासरोरुहत्वप्रतीत्या. विवक्षितार्थोऽनवबो
धकतया. आसत्यनार कल्पनया. अयं (चन्द्रः) नसुधांशुकिरी.
व्योमगङ्गासरोरुहम् इत्यर्थस्य कल्पनायाहृ प्रत्यादचापिविवक्षि
तलघुलहरीसावोधनाय. आसत्यनार कल्पनेन. साध्येयैव प्रतियो
गितावच्छेदकावच्छिन्नस्याभेदो निवेद्ययामितिचेन्न. काव्या
दौ तथाहृष्टौ प्रयुक्तौ काव्यासत्याक्लिमर्थस्वीकरणीयमितिवे
प्रकारान्तरमुच्यते: "नभपदघटितवाक्येनन् असमभिव्याहृ.

॥४॥ स्थले. यदि यत्पदार्थे विशेष्यत्वयोग्यता स्यात्तदेव विशेष्यं भ
विष्यति नान्यत् यद्योग्योऽसौ. अत्र घटेऽपि विशेष्यत्वयोग्यत्वं
यत्पदार्थेऽपि, उभयत्रैव विशेष्यत्वयोग्यतासत्त्वेऽपि. पूर्वोक्तनि
पर्याप्त्यनुयोगितावच्छेदकत्वं साध्यतावच्छेदकतायां प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदके निवे वच्छिन्न
शोयमिति वाच्यम् ॥ तथासति घटकालीन वन्हिमान्धूमादित्यादौ घटाभावस्यापि नहीरणाघटकतया ॥८॥

४

तत्प्रतियोगितावच्छेदकावच्छिन्न विषयताशून्यत्वस्य साध्यविषयकप्रतीतावसत्त्वेनाव्याप्तेः ॥ ननु त-
थापि तादृशानुयोगितावच्छेदकरूपा[1]वृत्तिप्रकारतावच्छेदकत्वं साध्यतावच्छेदके विवक्षणीयं दो- स्य
[2]षं इति ~~वाच्यम्~~ चेन्न ॥ हेतुसमानाधिकरणघटाभावपटाभावादिनानाभावप्रतियोगितावच्छेदक ता-
तावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपाप्रसिद्ध्याऽसंभवप्रसंगादिति तादृशरूप-
स्य कदाचिदप्रसिद्ध्याव्यभिचारिमात्रेऽतिप्रसंगात् ॥ नच प्रतियोगिव्यधिकरणहेतुसमानाधिक-
रणाभावविशिष्टरूपवृत्तित्व समानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदकूटत्वप्रका-
रतावच्छेदकेत्यादि निवेशान्नासंभवावकाश इति । अभाववैशिष्ट्यञ्च स्वनिरूपितप्रतियोगिताव-
च्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व संबन्धेन रूपवृत्तित्वञ्च स्वा-
वच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन । त्वं प्रकारतेति वा को-

१ पर्वतादिधरणीभूतो बोध्यते प्रतियोगितावच्छेदकतावच्छेदकार्थः ॥ २ इति निवेशेनैव प्रकृतस्थले तादृशं वन्हिसाध्यकस्थले वच्यमाणासांकर्यम् भवति, इति बोध्यम्

त
॥८॥

पिंदोषः॥ ॥टिप्पणी॥ ॥ननु वन्हिर्महानसीयत्वैतद्भूतद्वित्वावच्छेदेन महानसीयवन्ह्यभावप्र
तियोगितावच्छेदकतापर्याप्तिर्वन्हित्वे स्वीक्रियते ननु वन्हिचगतैकत्वावच्छेदेन तथा च साध्यतावच्छेदक
तात्वावच्छिन्नं प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकरूपावच्छेदेन हेतुसमानाधिकरणाभा
वप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यधिकरणत्वाभावस्य विवक्षणादेवा
व्याप्तिवारणसंभवात् न तु तदितरोभयानवच्छिन्नत्वनिवेशोऽस्यार्थ इति चेन्न ॥ पर्याप्तेर्व्याप्यवृत्ति
त्वमताभिप्रायेण तादृशनिवेशकरणात् ॥ भट्टाचार्येण पर्याप्तेरव्याप्यवृत्तित्वमताभिप्रायेण तथा
निवेशकृत इति हृदयम् ॥टी॰॥ न च तादृशकूटनिवेशे महागौरवमस्मन्मते च प्रतियोगिव्यधिकरणहे
तुसमानाधिकरणाभावीयसाध्यतावच्छेदकतदितरोभयानवच्छिन्नप्रतियोगितावच्छेदकत्वं नास्तीति
सामान्याभावनिवेशात् लाघवमिति वाच्यम् ॥ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभं

॥८॥

१

वविशिष्टान्य प्रकारतावच्छेदकेत्यादि निवेशेन गौरवानवकाशात् । वैशिष्ट्यञ्च स्वनिरूपित प्रतियोगितावच्छेद-
कतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्व सम्बन्धेन । तथाच प्रतियोगिव्यधिक-
करण हेतुसमानाधिकरणाभाववान्नेत्याकारक सामान्यभेदस्यैव निवेशान्न काप्यनुपपत्तिरिति चेन्न ॥ ए- व
तादृश परंपराघटित संसर्गत्वानुपगमे तादृश निवेशासंभवादित्यं समान प्रकारक [illegible] समानाधिक-
रणाभाव प्रतियोगितावच्छेदकं साध्यतावच्छेदकमित्याकारक व्यभिचारज्ञानस्य निरुक्त व्याप्तिज्ञानप्र-
तिबन्धकं तया तादृशव्यभिचारज्ञान काले निरुक्त व्याप्तिज्ञान संभवात् अनुमित्यापत्तेश्चेति ध्येयम् ॥
एतेन लाघवाद्धेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक तत्त्वावच्छिन्न पर्याप्त्यनुयोगिताव- प्रतियोगिताक
च्छेदकं यत्साध्यतावच्छेदकं तत्त्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकतद्रूपविशिष्टाव- न
च्छिन्न सामानाधिकरण्यमित्युक्तावेव सामञ्जस्ये साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वादि-

६४ साध्यतावच्छेदक

॥१०॥ वेशनं विफलमित्यपि परास्तम् ॥ ६ ॥ अथ हेतुसमानाधिकरणाभावभिन्नाभावप्रतियोगिसाध्यसामा-
नाधिकरण्यमित्युक्तौ चैव सामञ्जस्येऽनवच्छेदकत्व तत् तादात्म्याभावानवच्छिन्नत्वादि निवेशो व्यर्थ इति ॥
तथाहि वन्हिमान् धूमादित्यादौ तत्तद्व्यक्तित्वावच्छिन्नाभावभिन्नत्वस्य महानसीयवन्ह्यभावभिन्न-
त्वस्य वन्हिसामान्याभावे सत्त्वाल्लक्षणासमन्वय इति चेन्न ॥ धूमवान् वन्हेरित्यादौ यादृशाभावभिन्न-
त्वस्य द्रव्याभावे सत्त्वात् तत्प्रतियोगि धूमसामानाधिकरण्यस्य वन्हिहेतौ सत्त्वादतिव्याप्तेः ॥ न च यादृशाभावप्र-
तियोगितावच्छेदकमित्युक्तौ नेयमतिव्याप्तिरिति वाच्यम् ॥ तादृशाभावभिन्नत्वस्य जातीयान्नास्तीत्यभावे प्र-
त्वेन तत्प्रतियोगितावच्छेदकत्वस्य धूमत्वे सत्त्वादतिव्याप्तेः ॥ न च भिन्नाभावप्रतियोगितानिरूपितावच्छे-
दकतायां निरवच्छिन्नत्वनिवेशादेव नातिव्याप्तिरिति वाच्यम् ॥ कालिकसम्बन्धावच्छिन्नप्रतियोगिताक-
धूमाभावस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावभिन्नतया तत्प्रतियोगितावच्छेदकत्वस्य ॥१२॥
धूमत्वे सत्त्वादतिव्याप्तेः ॥ वाच्यं ज्ञेयत्वादित्यादौ स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्य-

स्वभावस्याप्रसिद्ध्याऽव्याप्तिश्रियाभिन्नाभावीय प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशा-
संभवात ॥ अथ साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशात्कालिकसम्बन्धावच्छिन्नप्र-
तियोगिताकधूमाभावस्यापि प्रतियोगिव्यधिकरणहेतुसमानाधिकरणतया तद्भिन्नत्वविरहात् ना-
तिव्याप्तिः ॥ वाच्यं ज्ञेयत्वादित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाभावस्य भिन्नत-
यालक्षणसमन्वय इति ॥ नच ~~[illegible]~~ तदात्मानुयोगिकसमवायेन आत्मत्ववान् ज्ञानादित्यादौ समवा-
त्वा यसम्बन्धावच्छिन्नप्रतियोगिताकात्माभावे हेत्वधिकरणवृत्तित्वविरहेण भिन्नतया तत्प्रतियोगिता-
वच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादतिव्याप्तिरिति वाच्यम् ॥ तथासत्यात्मत्वस्याव्याप्यवृत्तितया प्र-
तियोगिवैयधिकरण्यघटिताव्याप्यवृत्तिसाध्यकस्थलीयलक्षणेऽव्याप्यवृत्तितावच्छेदकत्वस्य सा-
ध्यतावच्छेदके विवक्षणीयतया तल्लक्षणस्यात्र एव वारणसंभवात् । व्याप्यवृत्तिसाध्यकस्थलीयल-
क्षणे साध्यतावच्छेदके नैतन्[1]निवेशनमतस्तल्लक्षणस्यातिव्याप्तिरित्युच्यते तदा भिन्नाभावे

[1] अव्याप्यवृत्तितावच्छेदकमित्यर्थः

२८

॥११॥ येनकेनापि सम्बन्धेन हेत्वधिकरणावृत्तित्वस्य विवक्षणात् २८ दोषवारणासंभवात् ॥ नचायमात्मा
ज्ञानादित्यादौ भिन्नसाध्याभावे हेत्वधिकरणावृत्तित्वविरहात् ~~अ~~व्याप्तिः ॥ व्यधिकरणसम्बन्धा-
वच्छिन्नसाध्याभावमादायाव्याप्तिवारणे निरुक्तव्यभिचारिण्यतिव्याप्तिर्दुर्वारैवेति वाच्यम् ॥ तथा
सति साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोग्यधिकरणनिरूपितत्वहेत्वधिकरणनिरूपितत्वोभया-
भाववद्धेत्वधिकरणनिरूपितसम्बन्धितावदभावभिन्नाभावप्रतियोगितावच्छेदकत्वस्यैव सा-
ध्यतावच्छेदके विवक्षितत्वात् ॥ तथा च व्यभिचारिणि सर्वत्र व्यभिचारनिरू~~पित~~पकाधिकरणनि-
रूपितसाध्याभावत्वावच्छिन्नसंबन्धितायां तादृशोभयाभावसत्त्वात् साध्याभावे भिन्नतायो-
गाद२८ अतिव्याप्तिवारणात् ॥ सद्धेतौ साध्याभावे भिन्नत्वसत्त्वेनाव्याप्तिर्दुदा स्यादिति ॥ नच महा-
नसीयवन्हिभिन्नवन्हिमान्धूमादित्यादौ प्रत्येकमहानसीय१~~वह्न्य~~भावस्य वन्ह्यभावस्य च भिन्नत्वे ~~भिन्न~~ ॥११॥

१ वन्हिभिन्ना

समूहालम्बन

३ समूहालम्बन

नातिव्याप्तिरिति वाच्यम् ॥ महानसीयवन्हि भिन्नाभावीयप्रतियोगितायाः पूर्वोक्त निरवच्छिन्नाव
च्छेदकतानिरूपितत्व विशेषणा विरहेणातिव्याप्ति¹ विरहात् ॥ नच तथापि विषयितया तार्णव
न्हि साध्यक तार्ण विषयक वन्हि विषयक ज्ञान ~~अतार्ण~~ ~~विषयक~~ वन्हि विषयक ज्ञानान्यतरत्व हेतुक
स्थले प्रत्येकं तार्णाभावे वन्ह्यभावे च प्रतियोग्य सामानाधिकरण्यविरहेण तादृशाभिन्नत्वस्य स-
त्वात् तत्प्रतियोगितावच्छेदकत्वस्य वन्हित्वे तार्णत्वे सत्वादतिव्याप्तिरिति वाच्यम् ॥ तादृशाभाव
प्रतियोगितावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकं यत्साध्यताव-
च्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदक रूपं तद्रूप विशिष्टावच्छिन्नसा
मानाधिकरण्यस्य विवक्षितत्वात् ॥ तथाचैवं वन्ह्यभाव प्रतियोगितावच्छेदकतात्वावच्छिन्नप्र-
तियोगिताक पर्याप्त्यनुयोगितावच्छेदकत्वस्य तादृश साध्यतावच्छेदकगतद्वित्वे विरहा ~~[illegible]~~
न्नातिव्याप्तिरिति ॥ नचैवं गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे प्रमेयवन्हिमान्धूमादि

१ उक्तप्रतियोगितायां निरवच्छिन्नावच्छेदकतानिरूपिताऽभावादित्यर्थः

॥१२॥ त्यादौ तादृशाभाव भिन्नाभाव प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके विरहादव्याप्ती-
त्ति ॥ विषयिता सम्बन्धावच्छिन्न गुरु धर्मावच्छिन्न प्रतियोगिताकाभावस्य प्रतियोगितावच्छे-
दकत्वस्य साध्यतावच्छेदके सत्वात् ॥ नच विषयितायाः वृत्यनियामकतया तत्सम्बन्धावच्छि-
न्न प्रतियोगित्वाप्रसिद्धिरिति वाच्यम् ॥ तादृश भिन्नाभाव प्रतियोगितावच्छेदकं यद्धर्मं वि-
शिष्ट सम्बन्धि[1]निष्ठाभाव प्रतियोगितानवच्छेदकं तत्तद्धर्मावच्छिन्न सामानाधिकरण्यस्य
विवक्षणात् ॥ तादृश भिन्नाभाव प्रतियोगितावच्छेदक वन्हित्वे प्रमेय वन्हित्व विशिष्ट सम्बन्धिनि-
ष्ठाभाव प्रतियोगितानवच्छेदकत्व सत्वात् तादृशागमन ~~संभवात्~~ संभवात् ॥ नचैवं भिन्नाभाव प्र-
तियोगितावच्छेदक वन्हित्वे धूमत्व[2] विशिष्ट सम्बन्धि[1] निष्ठाभाव प्रतियोगिता~~ना~~नवच्छेदकत्व स-
त्वेनातिव्याप्तिः ॥ यदि च भिन्नाभाव प्रतियोगितावच्छेदके यद्धर्म सामानाधिकरण्यस्यापि निवेशा
णारणमित्युच्यते तदा तादृश भिन्नाभाव प्रतियोगितावच्छेदक द्रव्यत्वे धूम[४]सामानाधिकरण्य सत्वेना ४त्व ॥१२॥

12

१ अधिकरण: २ यद्धर्मपदेन गृह्यमाणः

तिव्याप्तिर्दुर्वारैवेति वाच्यम् ।। तथा सति तादृश प्रतियोगितावच्छेदके यद्धर्म व्याप्यत्व निवेशाद तिव्याप्त्यभावात् ।। नच विशिष्ट सत्तावज्जाते रित्यादौ प्रतियोगि व्यधिकरण हेतु समानाधिकरणाभाव भिन्नाभाव प्रतियोगितावच्छेदक सत्तात्वे विशिष्ट सत्तात्व ~~व्यापक~~ व्याप्यत्वस्य विशिष्ट सत्तात्व विशिष्ट सम्बन्धि निष्ठाभाव प्रति योगितानवच्छेदकत्वस्य च द्वयोः सत्त्वादति व्याप्तिः ।। एतेन भिन्नाभाव प्रतियोगितावच्छेदक व्यापक साध्यतावच्छेदक मित्युक्तावपि न निस्तारः ।। सत्तात्व व्यापकत्वस्य विशिष्ट सत्तात्वे सत्त्वादिति वाच्यम् ।। तादृश भिन्नाभाव प्रतियोगितावच्छेदकं यद्धर्मावच्छिन्न व्याप्यतावच्छेदकं तद्धर्मावच्छिन्न सामानाधिकरण्य मिति निवेशात् ।। सत्तात्वे विशिष्ट सत्तात्वावच्छिन्न व्याप्यतावच्छेदकत्व विरहात् ।। नच यद्धर्मावच्छिन्न व्याप्यतावच्छेदकत्वं यद्धर्मावच्छिन्नाभाव वद्वृत्तितानवच्छेदकत्वं । यद्धर्मावच्छिन्नाभावस्य प्रसिद्धिश्च साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगिताकः । तथाच गुरुधर्मः साध्यतावच्छेदकस्थले यद्धर्मावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिः । एवं वाच्यं ज्ञेयत्वा दित्यादौ स्वरूपसम्बन्धावच्छि-

५ यत्सद्व्याप्ति (अभाव) निष्ठावच्छेदकता.तन्निरूपिता

॥१३॥ न्न यद्धर्मावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिप्रसङ्ग इति वाच्यम् ॥ तादृशाभिन्नाभावप्रतियोगितावः-
च्छेदकावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वाद्दो-
षानवकाशात् ॥ अथात्र तादृशव्यापकतावच्छेदकत्वं यदि तादृशप्रतियोगितावच्छेदकतापर्याप्त्य-
धिकरणधर्मावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं तदा वह्निमान् धूमादित्यादौ तादृश-
भिन्नाभावप्रतियोगितावच्छेदकद्रव्यत्वावच्छिन्नाधिकरणत्वस्य जलादौ सत्त्वेन तन्निष्ठाभावप्र-
तियोगितावच्छेदकत्वस्य वह्नित्वे विरहादव्याप्तिः ॥ यदि च तादृशाभावभिन्न यत्किञ्चिदभा-
र्न वप्रतियोगितावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं ॥ तन्निवेशश्च प्रति-
योग्यसमानाधिकरणहेतुसमानाधिकरणाभावभिन्नाभावत्वसमानाधिकरणोभयावृ- 13
या त्ति धर्मनिष्ठावच्छेदकतातन्निरूपितत्वनिरूपितत्वसम्बन्धावच्छिन्न~~भावनिष्ठावच्छेदकतानिरू-~~ प्रतियोगित
~~पित~~ प्रतियोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितधर्म- ॥१३॥
निष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वनिष्ठावच्छेदक-

२ पर्याप्तिनिष्ठावच्छेदकतानिरूपिताधिकरणवृत्तिनिष्ठावच्छेदकतानिरूपिता

॥प्रमेयवन्नाधिकरणधर्मावच्छिन्नाधिकरणतावच्छेदकीभूतोऽभावतदीयप्रतियोगितावच्छेदकता नास्ति.

अधिकरणनिष्ठावच्छेदकतानिरूपितं अवच्छेदकतानिरूपिता अत्यन्ताभाव

तानिरूपिताधिकरणत्वनिष्ठावच्छेदकतानिरूपितं वृत्तित्वनिष्ठावच्छेदकतानिरूपित ~~भेद~~ निष्ठाव-
च्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिता ~~वच्छेदक~~ तात्वनिष्ठावच्छेदकताकप्र- निरूपिता
प्र: तियोगिताक तद्व्यक्तिनिरूपितप्रतियोगितावच्छेदकं तावद् ~~[illegible]~~ प्रतियो- याप्रतियो
~~गितावच्छेदकत्वं~~ नास्तीति प्रतीतिसिद्धाभाव इत्युच्यते तदा प्रमेयधूमवान्वह्नेरित्यादौ प्रमेय गिता
धूमत्वेऽभावप्रतियोगितानवच्छेदकत्वविरहेण यत्किंचिदभावप्रतियोगितावच्छेदकावच्छि- ३ निष्ठाव
न्नाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्वस्य सत्त्वेनातिव्याप्तिः ॥ एवं सामान्यधर्मा- च्छेदकता
वच्छिन्नाधिकरणत्वास्वीकारे वह्निमान् धूमादित्यादावव्याप्तिर्दुष्परिहरैवेति ॥ केचित्तु घटाभा- [illegible]
वभिन्ने पटत्वादित्यादौ घटाभावभेदाभावस्य घटाभावात्मकतया प्रतियोगिव्यधिकरणहेतुसमा- [illegible]
नाधिकरणघटाभावभिन्नत्वस्य साध्याभावे विरहादव्याप्तिरिति । न च हेत्वधिकरणवृत्तितावच्छेदकी- तावच्छे
भूतानुयोगिताभिन्नानुयोगितानिरूपकप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके विवक्षित द्यत्वेना
भाव

॥१४॥ त्वाद् ॥ तथाच घटाभावत्वात्मकानुयोगिताभिन्नत्वस्य साध्याभावत्वाद्यनुयोगितायां सत्त्वान्न दोष
इति वाच्यम् ॥ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाभावभिन्नं वाच्यत्वादित्यादौ वाच्यत्वा
भावे साध्यताघटकस्वरूपसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहेण तादृशानुयोगिताभिन्नत्वस्य
संयोगेन वाच्यत्वाभावत्वरूपाऽनुयोगितायां सत्त्वात् तन्निरूपितप्रतियोगितावच्छेदकत्वस्य साध्यता
वच्छेदके सत्त्वादतिव्याप्तेः ॥ वाच्यत्वाभावत्वाख्यानुयोगित्वस्य साध्याभावात्मकत्वात् ॥ नच तादृ
शानुयोगिताभिन्ना~~नु~~नुयोगिताविशिष्टप्रतियोगितावच्छेदकत्वस्य विवक्षितत्वात् ॥ वैशिष्ट्य
ञ्च स्वानिरूपितत्व स्वानिष्ठाऽनुयोगितानिरूपितत्वोभयसम्बन्धेन । तथाच स्वनिरूपितष्ठसाध्या
भावत्वाख्यानुयोगितानिरूपितत्वविरहेणोभयसम्बन्धेन वाच्यत्वाभावत्वरूपानुयोगितावैशिष्ट्यस्य
साध्यनिष्ठप्रतियोगितायां विरहेणातिव्याप्तिविरहात् । अस्य निवेशस्तु अनुयोगिताविशिष्टानु
योगिताविशिष्टप्रतियोगितावच्छेदक[२]धर्मावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्ननिरूपकता ॥१४॥
काधिकरणत्वाभाववदधिकरणावृत्तितावच्छेदकत्वोभयसम्बन्धेन । स्वं चानुयोगिता ॥

[२] साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यम् । एवमवैशिष्ट्यञ्च स्वतादात्म्यस्वनिरूपितप्रतियोगितावच्छेदक
धर्मावच्छिन्न.

द्वितीयवैशिष्ट्यस्य च पूर्वोक्तोभयसम्बन्धेनेति वाच्यम् ।। भिन्नाऽनुयोगिता या भिन्नानुयोगित्ववद्
पक्षे पूर्वोक्तव्याप्तेरपरिहारात् ।। गुरुत्वरूपेण साध्यतायां पूर्वोक्तक्रमेण पक्षे श्वैत्याहुः ।। परेतु के-
व्याप्तिज्ञानस्य व्यभिचारज्ञानाप्रतिबध्यत्वात् तस्यानुमितिहेतुत्वे व्यभिचारज्ञानकाले ऽनुमित्याप-
त्तिरिति वदंति ।। तच्चिन्त्यम् ।। ७ ।। ननु हेत्वधिकरणवृत्तिता भिन्ना या वृत्तिता तन्निरूपित निरू-
पकत्वसम्बन्धावच्छिन्नप्रतियोगिता निष्ठावच्छेदकता निरूपितावच्छेदकता निष्ठावच्छेदकता
निरूपित निष्ठत्वसम्बन्धावच्छिन्नावच्छेदकतावत् साध्यतावच्छेदकावच्छिन्न सामानाधिकरण्य-
मित्युक्तावेव सामञ्जस्ये तत्तदितरोभयानवच्छिन्नत्व निवेशेनेति ।। तथाच वह्निमान्धूमादित्या-
दौ महानसीयवह्न्यभावत्वावच्छिन्न हेत्वधिकरणवृत्तिता भिन्नत्वस्य वह्निसामान्याभावत्वाव-
च्छिन्नवृत्तितायां सत्वाल्लक्षणसमन्वय इति चेन्न ।। धूमवान्वह्नेरित्यादौ हेत्वधिकरणायोगोलक
वृत्तिता भिन्नत्वस्य जलादि निरूपित धूमाभावत्वावच्छिन्न वृत्तितायां सत्वात्तादृश वृत्तिता निरूपि-
त परपरावच्छेदकत्वस्य धूमत्वे सत्वादतिव्याप्तेः ।। एवमुक्तक्रमेण निरवच्छिन्नत्वस्य जात्यवच्छिन्ना

॥१५॥ भावत्वावच्छिन्नावृत्तितामादाय धूमवान्वह्नेरित्यादौ विषयतासम्बन्धेन तादृशवह्निसाध्यके व्यभिचा
रिण्यतिव्याप्तिनिराकरणाय पर्याप्ति निवेशस्यावश्यकतया गुरुरूपेण साध्यतायां साध्याभावत्वाव-
च्छिन्नवृत्तित्वस्याप्रसिद्ध्याऽव्याप्त्यापत्तेरिति ~~मध्ये~~ ध्येयम् ॥ ८ ॥ प्रतियोगिव्यधिकरणहेतुस
मानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगिताश्रयसामानाधिकरण्यमित्युक्तौ वह्निमान्धू
मादित्यादौ वह्नित्वमात्रावच्छिन्नप्रतियोगितायां तादृशप्रतियोगिताभिन्नत्वस्य सत्त्वेन लक्षणा
समन्वयाद्दलमनवच्छेदकत्वानुसरणेनेत्यादि विशेषणेनेति चेन्न ॥ धूमवान्वह्नेरित्यादौ तादृश
प्रतियोगिताभिन्नद्रव्याभावप्रतियोगिताश्रयत्वस्य धूमादौ सत्त्वेनातिव्याप्तेः ॥ न च तादृश
प्रतियोगिताभिन्नप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वान्नातिव्याप्तिः॥
यदि च तादृशप्रतियोगिताभिन्नजातिमान्नास्ति इत्यभावीयप्रतियोगितावच्छेदकत्वस्य धूम
त्वादावपि सत्त्वेनातिव्याप्तिस्तदवस्थैवेति उच्यते तदा तादृश ~~भिन्न~~ प्रतियोगिताभिन्नप्रतियोगि
तानिरूपितनिरवच्छिन्नावच्छेदकतावत्त्वस्यैव साध्यतावच्छेदके विवक्षितत्वादतिव्याप्तिवार ॥१५॥

रणसंभवादिति चेन्न, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धाव-
च्छिन्नप्रतियोगिताकाभावीयप्रतियोगिताभिन्नत्वस्य कालिकसम्बन्धावच्छिन्नधूमत्वाव-
च्छिन्नप्रतियोगितायां सत्त्वेनातिव्याप्तेः ॥ नच यद्धर्मावच्छिन्नप्रतियोगितावच्छेदेन प्रतियो-
गितायां प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताया भेदोऽस्ति तद्धर्माव-
च्छिन्नसामानाधिकरण्यस्योक्तत्वात् । तथाच धूमत्वावच्छिन्नप्रतियोगितायां न तादृशप्रतियो-
गिताभेद इत्यतिव्याप्त्यनवकाशस्तथाच व्यर्थमेवतत् ॥ अथ व्यापकत्वनिवेशे लाघवात्प्रमेयवह्नि-
मान्धूमादित्यादौ व्याप्तिः । प्रमेयवह्नित्वस्य गुरुतया तदवच्छिन्नप्रतियोगिताप्रसिद्धेः । एतेन
साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणकल्पे प्रतियोगिव्यधिकरणहेतुसमानाधि-
करणाभावप्रतियोगितानेयाकारकप्रतीतिसाक्षिकसामान्यभेदनिवेशे धूमवान्वह्नेरित्यादावव-
तिव्याप्तिवारणासंभवात् यद्धर्मावच्छिन्नप्रतियोगितात्वावच्छेदेनोक्तस्य प्रयोजनविरहेणानि-
वेशाल्लाघवसंभवादित्यपि निरस्तम् ॥ नच विषयित्वसम्बन्धावच्छिन्नप्रमेयवह्नित्वावच्छि

॥१६॥ न्नप्रतियोगित्वस्य प्रसिद्ध्या तादृशप्रतियोगितायां हेतुसमानाधिकरणाभावप्रतियोगिताभि-
न्नत्वस्य सत्त्वात्तदादायैव लक्षणसमन्वयसंभवादिति वाच्यम् ॥ विषयितायाः वृत्त्यनियामक-
तया तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिस्तादवस्थ्यात् । अन्यत्सर्वं पूर्ववद्बोध्य-
म् ननु हेतुसमानाधिकरणाभावप्रतियोगिताभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिक-
रण्यमित्युक्तौ वह्निमान्धूमादित्यादौ तत्तद्व्यक्तित्वावच्छिन्नाभावीयप्रतियोगितायास्तद्
तद्व्यक्तिस्वरूपतया तद्भिन्नत्वस्य वह्नित्वे सत्त्वाल्लक्षणसमन्वयसंभवाद्दलमनवच्छेद
कत्वैयादिविशेषणेनेति चेन्न ॥ प्रतियोगितायास्तत्तदभावीयस्वरूपत्वस्वीकर्तृनये धू-
माभावीयप्रतियोगिताभिन्नत्वस्य धूमाभावादौ सत्त्वेनातिव्याप्तेरिति ध्येयम् ॥ ९ ॥ ननु यद्ध-
र्मावच्छिन्नाधिकरणप्रतियोगित्वाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्ना
नधिकरणं तद्धर्मावच्छिन्नसामानाधिकरण्यमित्युक्तौ वह्नित्वावच्छिन्नाधिकरणतत्तद्व्यक्त्यधिकरण १८
भेदस्य महानसीयवह्नित्वावच्छिन्नाधिकरणभेदस्य च सत्त्वेन लक्षणासमन्वयसंभवात् तत्रादितरोभ ॥१६॥

यानवच्छिन्नत्वेत्यादि विशेषणं व्यर्थमिति चेन्न॥ महानसीयवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नाधिकरणभेदस्य च साध्यतावच्छेदकवह्नित्वावच्छिन्नाधिकरणे विरहादव्याप्तेः॥ प्रतियोगितायाः पर्याप्तिनिवेशे एकत्वादेः पर्याप्त्यस्वीकारे धूमवान्वह्नेरित्यादौ अतिव्याप्तेः॥ एवं महानसीयवह्निभिन्नवह्निमान्धूमादित्यादावतिव्याप्तिवारणाय साध्यतायाः पर्याप्तिनिवेशे वह्निमान्धूमादित्यादावव्याप्तेः। एकत्वादेः पर्याप्त्यभावात्॥ एवं सामान्यधर्मावच्छिन्नाधिकरणमाया ऽप्रसिद्ध्या सुतरामव्याप्तेरिति ध्येयम्॥ १० ॥ ननु स्वप्रतियोगिकत्व स्वसामानाधिकरण्योभयसम्बन्धेन साध्यविशिष्टान्याभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामानाधिकरण्यस्यैव सम्यक्त्वे ऽनवच्छेदकत्वानुसरणं साध्यतावच्छेदकतादात्म्योभयानवच्छिन्नत्वेत्यादि विशेषणं निरर्थकं॥ असम्भववारणाय स्वप्रतियोगिकत्वदलं। व्यभिचारिण्यतिव्याप्तिवारणाय सामानाधिकरण्यदलम्॥ न च यस्य प्रतियोगिकत्वं तस्य सामानाधिकरण्यविरहेण महानसीयवह्न्यभावे साध्यविशिष्टान्यत्वं तस्य सम्भवादव्याप्तिरिति वाच्यम्॥ स्वाश्रयप्रतियोगिकत्व स्वाश्रयसामानाधिकरण्योभयसम्बन्धेन साध्यतावच्छेदकविशि-

ऽत्व-घृान्यूँस्य विवक्षितत्वात् ।।तथाच महानसीयवन्ह्यभावे वन्हित्वाश्रय महानसीयवन्हिप्रतियोगिकत्वस्य
।।१७।। वन्हित्वाश्रय पर्वतीयवन्हिसामानाधिकरण्यस्य च सत्वेन साध्यतावच्छेदक विशिष्टान्यत्व विरहान्न-
दोषः ।।नचात्र कपिसंयोगाभावे साध्यतावच्छेदक विशिष्टान्यत्व विरहेणातस्य लक्षणाघटकत्वात्प्रति-
योग्य सामानाधिकरण्यस्यैवैयर्थ्यापातादिति ।संयोगी सत्वादित्यादौ तद् गुणावृत्तौ वा वह्नित्वनाभा-
वे द्रव्यमात्रसमवेताभावमादायातिव्याप्ति वारणासंभवादिति वाच्यम् ।।प्रमेयवान्वाच्यत्वादित्यादौ
निखिलाभाव उक्तसम्बन्धेन साध्यतावच्छेदक विशिष्टान्यत्व विरहेणाव्याप्ति [illegible] भिया स्वरूपसम्बन्धे
न स्वाश्रयसामानाधिकरण्यमावश्यकं ।।तथाचकपिसंयोगाभाववान्मेयत्वादित्यादौ स्वरूपसम्बन्धे
न स्वाश्रयवृत्तित्व विरहेण साध्यतावच्छेदक ।विशिष्टान्यत्वस्य कपिसंयोगाभावाभावे निरावाध-
तया तमादायाव्याप्तिवारणाय प्रतियोग्य सामानाधिकरण्यस्यावश्यकत्वान्न काप्यनुपपत्तिरिति ।। ।।१७।।
किंच संयोगी सत्वादित्यादौ अतिव्याप्तिवारणोऽपि धूमवान्वन्हेरित्यादौ धूमाभावस्य पर्वतेऽपात्ति-

17

कालावच्छेदेनाव्याप्यवृत्तितया साध्यतावच्छेदक विशिष्टान्यत्व विरहेणातिव्याप्तिवारणादानिरवच्छिन्न स्वरूप सम्बन्धेन स्वाश्रय सामानाधिकरण्यस्यावश्यकतया कपि संयोगेपोद वृक्षत्वादियादावव्याप्तिवारणायतात् ॥ नचात्रापि अयोगोलक वृत्तित्वावच्छिन्नाभावमादायातिव्याप्तिवारणासंभवादिति संयोग सम्बन्धावच्छिन्न प्रतियोगितकस्यायोगोलकवृत्तित्वावच्छिन्नाभावस्यापि उत्पत्ति कालावच्छेदेनाव्याप्य वृत्तितया तादृशाभावे पि साध्यतावच्छेदक विशिष्टा
स्ये न्यत्वै विरहात् ॥ नच तथापि साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वस्य तदानिम~~सम~~नवच्छेदकतया समवाय सम्बन्धावच्छिन्न प्रतियोगितकत्वस्यायोगोलकासमवेतत्वावच्छिन्नाभावस्याव्याप्यवृत्तितया तमादायातिव्याप्तिवारणं संभवतीति वाच्यम् ॥ पर्वतासमवेत पर्वतत्वं चात्वरत्व महानसत्वायोगोलकत्व गोष्ठत्वाद्यन्यतमाभावस्य समवाय सम्बन्धावच्छिन्नप्रतियोगिताकस्य नत्वेरा घटकतया तमादाय वन्हिमान्धूमादित्यादावव्याप्तिवारणाय साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगितामादायोक्तातिव्याप्तिवारणाय निरवच्छिन्न-

॥१८॥ स्वरूपेण स्वाश्रय सामानाधिकरण्य इत्यावच्छिन्नत्वान्न प्रतियोगि व्यधिकरण स्यवैयर्थ्यावका
शा इति न कोप्यनुपपत्तिरिति चेन्न, घटत्वाभाव घटत्वाभावान्यतरवान् द्रव्यत्वादित्यादौ घटत्वात्मकाभा
वस्य घटत्वाभावाभावस्य घटत्वात्मकाभावस्य घटत्वाभावाभावस्य स्वरूप सम्बन्धेनावृत्तितया प्रत्ये
काभावस्य संग्रहेण घटकत्वाद व्याप्ति प्रसंगात् ॥ अनवच्छेदकत्वानुसरणेऽव्याप्ति विरहात् ॥ तादृशान्यत
मकस्य साध्यतावच्छेदकेऽनवच्छेदकत्वे सत्त्वादिति वाच्यम् ॥ ~~अभाव~~अभाववान् मेयत्वादित्यादौ स्व
रूपसम्बन्धेन घटाभावाभावे स्वाश्रय वृत्तित्वविरहेण साध्यतावच्छेदक विशिष्टान्यत्वस्य तत्र स-
त्त्वात्तादृशाभावस्य संग्रहेण घटकतया तदीय प्रतियोगितावच्छेदकत्वस्य घटप्रतियोगिकत्व विशिष्टा
भावत्वे सत्त्वाद व्याप्तिरिति वाच्यम् ॥ स्वरूप समवायान्यतर सम्बन्धेन स्वाश्रय सामानाधिकरण्य
स्य विवक्षितत्वात् । तथा च साध्यतावच्छेदकीभूता घटाभाव प्रतियोगिकत्वस्याभावत्वाश्रयाधिक- भूता
रणीभूत कपालादि निरूपित समवायसम्बन्धावच्छिन्नवृत्तित्वस्य च घटत्वाभावाभा-
वे सत्त्वेन साध्यतावच्छेदक विशिष्टान्यत्व विरहान्न तादृशाभावमादाय तत्राव्याप्तिरिति ॥ ॥१८॥

यदि च गगनाभावभिन्नभावत्वादित्यादौ साध्याभावस्य गगनाभावात्मकतया साध्यतावच्छेदक
विशिष्टान्यत्वविरहेण लक्षणाघटकत्वादभावान्तरमादायातिव्याप्तेः ॥ एवं विशिष्टसत्ताभाववान् जा
तेरित्यादौ सत्ताद्यात्मकसाध्याभावस्य गुणादावपि सत्वेन साध्यतावच्छेदकविशिष्टान्यत्वस्य
तत्र विरहात् तथा च साध्याभावस्य लक्षणाघटकत्वेनाभावान्तरमादायातिव्याप्तिरिति चेत् उच्यते
तदा स्वाश्रयाधिकरणनिरूपितताद्रूशान्यतरसम्बन्धावच्छिन्नवृत्तितावच्छेदकीभूतानुयोगि
तानिरूपितत्वस्वाश्रयनिष्ठत्वोभयसम्बन्धेन साध्यतावच्छेदकविशिष्टान्यत्वस्य प्रतियोगि
तायां विवक्षितत्वात् ॥ तथा च स्वाश्रयाधिकरणायत्ताभावादिनिरूपितवृत्तितावच्छेदकत्व
स्य गगनाभावभेदाभावत्वाख्यानुयोगिताया असत्त्वेन तादृशानुयोगितापदेन धर्तुमशक्य-
त्वात् ॥ गगनाभावत्वानुयोगितानिरूपितत्वस्य साध्यनिष्ठप्रतियोगितायामसत्त्वेन साध्यता-
वच्छेदकविशिष्टान्यत्वस्य सत्त्वात् साध्याभावस्य लक्षणाघटकत्वान्नातिव्याप्तिः। एवमन्यत्रापि
ऊह्यमिति ॥ अथ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावस्य सत्तायां संयोगेनैव स्वीकारा- भावा

॥१९५॥ रन्नत्वन्य सम्बन्धेन ॥ सत्केवलान्वयिग्रन्थे जगदीशेन लिखितम् ॥ तथा च संयोग सम्बन्धा
वच्छिन्न प्रतियोगिताक घटाभाव पटाभावान्यतर~~स्वस~~वान्द्रव्यत्वादित्यादौ संयोग सम्बन्धाव-
च्छिन्न प्रतियोगिताक घटाभावाभाववत्त्वावच्छिन्न वृत्तितायां स्वरूप समवायान्यतर सम्बन्धाव-
च्छिन्नत्वस्य विरहेणोक्तोभय सम्बन्धेन साध्यतावच्छेदक विशिष्टान्यत्व स्य संयोग सम्बन्धा
वच्छिन्न प्रतियोगिताक घटाभाव निष्ठ प्रतियोगितायामेव पटाभाव निष्ठ प्रतियोगितायां
सत्वात्प्रत्येकेन तन्निरूपिताभावस्य भिन्न भिन्नाधिकरणवृत्तित्वात्प्रतियोगिव्यधिकर
णतया च तद्घटकघटकयोस्तन्निरूपित प्रतियोगितावच्छेदकावच्छिन्न भिन्नत्वस्य सा
ध्येऽविरहाद्व्याप्तेरिति चेन्न ॥ स्वप्रतियोगिमत्ताबुद्धि विरोधिता घटक सम्बन्धेन स्वाभ
याधिकरणवृत्तित्वस्य विवक्षितत्वात् तथा च तादृशविरोधिताघटकसंयोगसम्बन्धेन घ-
टाभावाभावस्य भूतलादिवृत्तितया तदीय प्रतियोगितायां साध्यतावच्छेदक विशिष्टान्यत्व ॥१९५॥
स्य विरहेणातन्निरूपकाभावमादाय व्याप्ति विरहादिति । संयोगेन द्रव्य मात्रस्याव्याप्यवृत्ति-

तया प्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वं[1] नये[2] विरोधिताघटकस्वरूपसम्ब
न्धेन पर्वत उत्पत्तिकालावच्छेदेन धूमाभावसत्वात्तथा च साध्यतावच्छेदकविशिष्टान्याव
स्य धूमनिष्ठप्रतियोगितायां विरहेणाभावान्तरमादाय धूमवान्वह्नेरित्यादौ अतिव्याप्तिरिति
वाच्यम् ॥ वृत्तितायामव्याप्यवृत्तितानियामकतावच्छेदकतानिरूपितत्वार्थकत्वे वाच्छिन्नत्वस्य
विवक्षितत्वान्नातिव्याप्तिरिति ~~वा~~च्यम् । अत्रोच्यते प्रमेयवान्वाच्यत्वादित्यादौ ~~अ~~साध्याभावाभावसा
धेतत्साध्याभाववत्त्वनयेऽभाववानात्मत्वादित्यादौ निरुक्तोभयसम्बन्धेन साध्यतावच्छेदकविशिष्टा
न्यप्रतियोगिताकप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तेरिति ॥ तच्चिन्त्यम् ॥ केचित्तु
विशिष्टसत्तावाञ्जातेरित्यादौ अव्याप्त्या स्वाश्रयसामानाधिकरण्यमित्यनेन स्वावच्छिन्नसा
मानाधिकरण्यमित्यपउपंवाच्यतया सामान्यधर्मावच्छिन्नाधिकरणतायाऽस्वीकारे वह्निमान्धू
मादित्यादौ व्याप्तिर्वज्रलेपत्वादिति प्राहुः ॥ अन्ये तु कालिकसम्बन्धावच्छिन्नप्रतियोगिताक
महानसीयवह्न्यभावस्य स्वरूपसम्बन्धेन पर्वतादावसत्त्वेन कालिकसम्बन्धावच्छिन्नप्रति

---

१ प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वमित्यर्थः २ संयोगेन धूमवत्ताबुद्धिं प्रति निरवच्छिन्न
स्वरूपसम्बन्धेन संयोगसम्बन्धावच्छिन्नधूमाभाववत्ताबुद्धिः प्रतिबन्धिकेति मणिकृन्नवादिमते इत्यर्थः

[illegible] योगिताकत्व~~स्य महानसीयवह्न्यभावस्य सम्बन्धेन पर्वतादावसत्त्वेन कालिकसम्बन्धावच्छिन्न~~
त्यानुगमाद् व्याप्तिमत्त्वावच्छिन्नाभावस्य महानसीयवह्न्यभावस्य लक्षणाघटकत्वात्तमादाय नैव
च्छेदकत्वानुसरणं स्यात् तदितरोभयानवच्छिन्नत्व संयोगसम्बन्धक । वान् ॥ न च साध्यतावच्छेद
सम्बन्धावच्छिन्नत्वस्य विवक्षितत्वेनाव्याप्तिवारणसंभवादिति वाच्यम् ॥ वृत्त्यनियामकत्व
सम्बन्धेन साध्यताया साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्या
प्तेरिति ध्येयम् ॥ ११ ॥ ननु साध्याधिकरणवृत्त्यभावीयप्रतियोगिता निरूपिता या साध्यताव
च्छेदकनिष्ठावच्छेदकताकं तदनिरूपितप्रतियोगिताकस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकर
णाभावस्य प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यमित्युक्तावेव
सामञ्जस्ये साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वनिवेशो व्यर्थः ॥ वह्निमान्धूमादित्यादौ
साध्यवद्वृत्तिमहानसीयवह्न्यभावप्रतियोगितानिरूपितवह्नित्वनिष्ठावच्छेदकतानिरूपि ताहृणा
तत्वस्य महानसीय~~वह्न्य~~भावीयवह्निनिष्ठप्रतियोगितायां विरहेण तादृशाभावमादायाव्याप्ति

उक्तत्वेनादोषात् ॥ न चाभाववान्मेयत्वादित्यादौ घटाभावाभावे स्वरूपेण साध्यवद्वृत्तित्वस्य विरहात् ॥ ननु धूमवान् वन्हेरित्यादौ धूमाभावस्याव्याप्यवृत्तितया धूमवति पर्वतादौ उत्पत्तिकालावच्छेदेन तस्य सत्वात् ॥ तथा च साध्यवद्वृत्ति धूमाभावीयप्रतियोगितानिरूपितधूमत्वनिष्ठावच्छेदकत्वानिरूपितत्वस्य धूमनिष्ठप्रतियोगितायां विरहेणाभावान्तरमादायातिव्याप्तिरिति वाच्यम् ॥ निरवच्छिन्नस्वरूपेण साध्यवद्वृत्तित्वस्य विरहेण तादृशसाध्यतावच्छेदकनिष्ठावच्छेदकत्वानिरूपितत्वस्य घटाभावनिष्ठप्रतियोगितायां सत्वात् ॥ तथा च तन्निरूपकप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विरहाद्व्याप्तिरिति वाच्यम् ॥ स्वरूपसमवायान्यतरसंबन्धेन साध्यवद्वृत्तित्वस्योक्तत्वात् ॥ तथा च साध्ये वृत्तिकपालादावन्यतरसम्बन्धेन घटाभावाभावसत्वादव्याप्तिरिति वाच्यम् ॥ विरहात् ॥ न च तथापि गगनाभावभिन्नमभाववत्वादित्यादौ विशिष्टसत्ताभाववान् जातेरित्यादौ गगनाभावात्मकसाध्याभावस्य साध्यवति सत्वेन साध्याभावस्य लक्षणाघटक~~त्वेन~~त्वाद्भावान्तरमादायातिव्याप्तिरिति वाच्यम् ॥ साध्यवन्निरूपितान्यतरसम्बन्धावच्छिन्नवृत्तितावच्छेदकीभूतानुयोगितानिरूपितत्वस्य साध्यतावच्छेदकनि

॥२१॥ ष्ठावच्छेदकतायां विवक्षितत्वात् ॥ तथा च साध्यवद्वृत्तितावच्छेदकीभूतायाः साध्यघटोभयाभावत्वाण्वा
नुयोगितानिरूपितप्रतियोगितानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकत्वानिरूपितत्वस्य साध्य
सामान्याभावे सत्त्वेन तन्निरूपकाभावस्य लक्षणाघटकत्वा~~क्क~~ इति व्याप्त्यभावात् ॥ यदि वा भाव
वान्मेयत्वादित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावत्वस्य स्वरूपसमवायान्यतरस-
म्बन्धेनावृत्तितया लक्षणाघटकत्वेन तमादाय व्याप्तिरुच्यते तदा स्वप्रतियोगि मत्तावृद्धि विरो
धिताघटकसम्बन्धेन साध्यवद्वृत्तित्वस्य विवक्षितत्वात् ॥ पूर्वोक्तरीत्या धूमवान्वह्नेरित्यादौ
वतिव्याप्तिवारणाय निरवच्छिन्नत्वेनापि वृत्तिताया विशेषणीयत्वात् न दोष इति चेन्न ॥ प्र
मेयसाध्यतावच्छेदकस्थले घटत्वपटत्वादेरपि प्रमेयात्मकतया तादृशसाध्यतावच्छेदकनिष्ठाव-
च्छेदकत्वानिरूपितप्रतियोगिताप्रसिद्ध्याऽव्याप्तेः ॥ यदि च साध्यवद्वृत्तितावच्छेदकीभूतानुयोगि-
तानिरूपिताया साध्यतावच्छेदकताव्यापकावच्छेदकतातदनिरूपितत्वस्य प्रतियोगितायां ॥२१॥

निवेशेनाव्याप्तिवारणात् ॥ यदभावीयप्रतियोगितानिरूपितघटत्वनिष्ठावच्छेदकता
यां साध्यतावच्छेदकताव्यापकत्वस्य विरहेण तस्य लक्षणघटकत्वादित्युच्यते तदा
[illegible]यवानवकाशात् ॥ विशिष्टसत्तावाञ्जातेरित्यादावतिव्याप्तिवारणाय साध्यवदवृत्ति
त्वमिपदस्य साध्यतावच्छेदकावच्छिन्ननिरूपकताकाधिकरणतावत्त्वार्थकत्वमेवावश्य-
कं तथा च सामान्यधर्मावच्छिन्नत्वस्यानङ्गीकाराद् वन्हिमान्धूमादित्यादावव्याप्तेश्चे
त्व तिदिक् ॥ १२ ॥ ननु साध्यवदवृत्तित्वं जगदवृत्तिभिन्नत्वोभयाभावस्याप्रतियोगिव्य
धिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसा
मानाधिकरण्यविवक्षणादेव सर्वसामञ्जस्येऽनवच्छेदकत्वानुसरणं तन्नोदितरो
भयानवच्छिन्नत्वेत्यादिविशेषणं व्यर्थम् । वन्हिमान्धूमादित्यादौ महानसीयवन्ह्यभा
वे साध्यवदवृत्तित्वस्य जगदवृत्तिभिन्नत्वस्य च सत्वेन निरुक्तोभयाभावत्वस्य विरह

न्ना

॥२२॥ न्न~~व्याप्तिः~~ तस्य लक्ष्यता~~समन्वय~~घटकत्वं किन्तु गगनाभावादिकमादाय लक्ष्यतास
मन्वयः॥ न च संयोगेन द्रव्यमात्रस्याव्याप्यवृत्तितया संयोगसम्बन्धावच्छिन्नप्रति
योगिताकमहानसीयवह्न्यभावे जगदवृत्तित्वस्य सत्त्वेन। निरुक्तोभयाभावस्याऽ
तत्त्वात्तमादायाव्याप्तेरिति वाच्यम्॥ जगदवृत्तिताघटकवृत्तितायां निरवच्छिन्नस्वरूप
सम्बन्धावच्छिन्नत्वस्य विवक्षितत्वादव्याप्त्यभावात्॥ न च धूमवान्वह्नेरित्यादौ
कसम्ब
न्धे
धूमाभावे जगद~~वृत्तिजगद~~वृत्तिभिन्नत्वस्य कालिकेन साध्यवदवृत्तित्वस्य च स
त्त्वान्निरुक्तोभयाभाववत्त्वविरहात्तस्य लक्ष्यताघटकत्वादतिव्याप्तिरिति वाच्य
म्॥ स्वरूपसम्बन्धेन साध्यवदवृत्तित्वस्य विवक्षितोनादोषात्॥ यदि धूमाभाव
स्याप्युत्पत्तिकालावच्छेदेन साध्यवति पर्वते वर्तमानतयाऽतिव्याप्तिस्तदवस्थै
वेत्युच्यते तदा वृत्तितायां निरवच्छिन्नत्वविशेषणं देयम्॥ तथा च नातिव्याप्ति ॥२२॥

रिति चेन्न घटत्वाभावपटत्वाभावान्यतरवान्द्रव्यत्वादित्यादौ स्वरूपसम्बन्धेन साध्यव-
द्वृत्तित्वस्य घटत्वाभावाभावे विरहेण प्रत्येकाभावस्य जहीणा घटवृत्तया तमादाय साध्या-
प्तेः॥ न चानवच्छेदकत्वानुसरणे नैव तत्राऽव्याप्तिवारणसम्भवाद् घटत्वाभावपटत्वा
भावान्यतरत्वेऽनवच्छेदकत्वस्य सत्त्वादिति वाच्यम्॥ पूर्वोक्तरीत्याऽभाववान्मेयत्वा
दित्यादौ घटाभावाभावमादायाव्याप्तेर्वज्रलेपत्वात्॥ न च तथापि स्वरूपसमवायां-
न्यतरसम्बन्धेन साध्यवद्वृत्तित्वस्योक्तसम्बन्धेन त्वान्नातिव्याप्तिरिति वाच्यम्॥
पूर्ववद्विशिष्टसत्ताभाववाञ्जातेरित्यादौ वातिव्याप्तिः। साध्यवद्वृत्तित्वं परित्यज्य साध्य
वद्वृत्तितावच्छेदकीभूतानुयोगितानिरूपितत्वघटितोभयाभाववत्त्वस्य प्रतियोगि
तायां विवक्षणीयतया संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभाव~~त्व~~ पटाभा
वान्यतरवान्द्रव्यत्वादित्यादौ पूर्वोक्तयुक्त्याऽव्याप्तेरिति स्वप्रतियोगिमत्ताग्राहिविरो

।।२३।। धिताघटकसम्बन्धेण साध्यवद्वृत्तित्वस्य विवक्षिताऽव्याप्तिवारणेऽपि कालिकसम्बन्धाव-
च्छिन्नप्रतियोगिताकमहानसीयवन्ह्यभावस्य तादृशविरोधिताघटकस्वरूपसम्बन्धे-
न पर्वतादावसत्त्वेन लक्षणाघटकतया तमादायाव्याप्तेः ।। एवं वन्हि~~मान्धूमा~~ गगनोभया-
भावे जगद्वृत्तित्वसत्त्वेन तादृशवृत्तिभिन्नत्वविरहेण तादृशोभयाभावस्य लक्षणाघ-
टकतया तन्निरूपितावच्छेदकत्वस्य साध्यतावच्छेदके विरहादव्याप्तेश्च ।। किञ्च वि-
शिष्टसत्ताभाववाञ्जातेरित्यादौ चातिव्याप्तिवारणाय साध्यवत्त्वस्य साध्यतावच्छेदकाव-
च्छिन्नाधिकरणत्वार्थकत्वस्यावश्यकतया सामान्यधर्मावच्छिन्नाधिकरणत्वस्या-
स्विकारेण निवेशासंभवात् ।। तत्संभवे वा गौरवस्य दुष्परिहार्यत्वादिति ध्येयम् ।।१३।।
परेतु साध्यवद्वृत्त्यभावीयत्वसाध्यतावच्छेदकतास्वानवच्छिन्नत्वोभयाभाववत्प्रति-
योगिताकोयः प्रतियोगिव्याधिकरणहेतुसमानाधिकरणाभावस्तत्प्रतियोगिताव ।।२३।।

२३

च्छेदकावच्छिन्नभिन्नसाध्यसामानाधिकरण्यमित्युक्तौ वह्निमान्धूमादित्या-
दौ तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिवारणासंभवादनवच्छेदकत्वानुसर-
णे साध्यतावच्छेदकतदितरेत्यादिविशेषणानर्थक्यमिति ॥ सद्धेतौ साध्यतावच्छेदक-
त्वेनास्तीत्याकारकाभावमादाय लक्षणीनेयम् ॥ व्यभिचारिणि साध्याभावमादायैवेति न-
काप्यनुपपत्तिः ॥ न च कालिकादिसम्बन्धेन धूमाभावेपि साध्यवद्वृत्तित्वस्य सत्वान्नात्यल-
क्षणाघटकत्वादतिव्याप्तिः ॥ स्वरूपसम्बन्धेन साध्यवद्वृत्तित्वस्य विवक्षणेपि पर्व-
तीवह्नै तदुत्पत्तिकालावच्छेदेन धूमाभावे साध्यवद्वृत्तित्वादतिव्याप्तिरतो निरवच्छिन्नस्वरू-
पसम्बन्धेन तद्विवक्षणीयं तदा घटत्वाभावपटत्वाभावान्यतरवान्द्रव्यत्वादित्यादौ प्रत्ये-
काभावमादायाव्याप्तिरिति वाच्यम् ॥ निरवच्छिन्नस्वरूपसमवायान्यतरसम्बन्धेन सा-
ध्यवद्वृत्तित्वस्योक्तत्वात् ॥ न च तथापि गगनाभावभिन्नमभावत्वाद् विशिष्टसत्ता-भाव

अनौरि
वान्~~गुरासादि~~त्यादौ वाति व्याप्त्यासाध्यवद्वृत्तिः तावच्छेदकीभूतानुयोगिता निरूपि
त्वि घटितोभया भावनिवेशस्यावश्यक तया संयोग सम्बन्धावच्छिन्न प्रतियोगिताक
घटाभाव घटाभावान्यतरं साध्यक स्थले पूर्वोक्तयुक्त्या ~~अति~~ व्याप्तिः ।। प्रत्येकाभावीय
संध्येरा घटकत्वादि तिवाच्यम् ।। स्वप्रतियोगि मत्तावृद्धि विरोधिता घटक सम्बन्धेनता
धीनवद्वृत्तित्वस्य विवक्षितत्वात् ।। अव्याप्यवृत्तित्व शालित्व प्रतिवन्धकतायानुते.
जकत्वे धूमवान् वन्हेरित्यादावति व्याप्तिवारणाय विशिष्टावच्छिन्नत्व मपि वृत्तितायां
देयं तथा च न कोप्यनुपपत्तिरिति दिक् ।। वन्हिमान्धूमादित्यादौ साध्यतावच्छेद
कता वन्हित्वतदुभयाभावीय प्रतियोगितायां साध्यतावच्छेदकतावच्छिन्न-
त्व विरहेण तस्य लक्षणाघटकत्वान्नतदभावीय प्रतियोगिता [illegible] वच्छेदकावच्छिन्न
भिन्नत्वस्य साध्याभावीय प्रतियोगितत्व [illegible] नवच्छेदकत्वस्य साध्यतावच्छेदके वि-
रहादव्याप्तिप्रसंगात् ।। नच साध्यतावच्छेदकतावत्वात्तिरिक्तधर्मावच्छिन्नत्व घ-

हितोभयाभाववत्त्वस्य विवक्षितत्वात् ॥ तथा च साध्यवद्वृत्त्यभावीयत्वस्य साध्यतावच्छे-
दकतात्वातिरिक्तवन्हित्वावच्छिन्नत्वस्य चोभयप्रतियोगितायां सत्वादुभयाभाव-
वत्त्वविरहात्तमादायाव्याप्तिरिति वाच्यम् ॥ प्रमेयसाध्यतावच्छेदकधर्मे साध्यताव-
च्छेदकतात्वेनोभयाभावस्याप्रसिद्ध्याऽव्याप्तिप्रसंगात् ॥ एवं कालिकसम्बन्धावच्छिन्नप्रतियो-
गिताकमहानसीयवन्ह्यभावे स्वप्रतियोगिमत्ताबुद्धिविरोधिताघटकस्वरूपसम्बन्धेन
साध्यवद्वृत्तित्वविरहेण तदीयप्रतियोगितायां विशिष्टोभयाभाववत्त्वस्याक्ष-
ततया तमादायाव्याप्तिप्रसंगात् ॥ किञ्च विशिष्टसत्ताभाववाञ्जातेरित्यादावतिव्याप्तिवार-
णाय साध्यतावच्छेदकावच्छिन्नाधिकरणानिरूपितवृत्तित्वनिवेशस्यावश्यकतया सामान्य-
धर्मावच्छिन्नाधिकरणतास्वीकारेण विवक्षणीयत्वात् ॥ तच्चिन्त्यम् ॥ ननु तथापि सा-
ध्यतावच्छेदकतात्वातिरिक्तधर्मावच्छिन्नत्वसाध्यतावच्छेदकतात्वावच्छिन्न-
प्रतियोगितापर्याप्त्यनुयोगितावच्छेदकरूपाक्रान्तोभयाभाववत्त्वस्यैव विवक्षितत्वाद्

¶॥१०॥ वन्हित्वघटितैकत्वाभावमादाय वन्हित्वासमन्वयसंभवादितिवाच्यम् ॥ प्रतियोगितायाः प्रत्येकं पर्यवसीत तया

॥२५॥ मेयसाध्यतावच्छेदकस्थले प्रमेयत्वस्यैव साध्यतावच्छेदकत्वस्वीकारात् ॥ सद्धेतौ साध्य
तावच्छेदकत्वाभावमादाय वन्हिरासमन्वय इति चेन्न ॥ अवच्छेदकतावान्यवाच्यत्वा
दिन्यादौ साध्यतानिरूपितावच्छेदकत्वेनानीतिप्रतीतिसिद्धाभावस्यैव हेतौ घट
नयानद्वेय प्रतियोगितावच्छेदकं यदवच्छेदकतात्वं तदभावाच्छिन्नभिन्नाभावस्य साध्योऽवि
हादयोऽपि ॥ साध्यतावच्छेदकतावावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छे
दकत्वरूपत्वमिति साध्यतावच्छेदकतावावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता
वच्छेदकत्वरूपमिश्रः वृत्तिलोभयाभाववत्त्वस्य प्रतियोगितायां विवक्षितत्वाद ॥ प्रथमक
ल्पवृत्तित्वं च साध्यतावच्छेदकतावावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदक
त्वस्वसम्बन्धेन ॥ द्वितीयकल्पवृत्तित्वं च स्वरूपसम्बन्धेन ॥ तथा च प्रकृतेऽवच्छेदकताव
घटितैकत्वाभावमादाय वन्हिमान्धूमादित्यादौ वन्हित्वघटितैकत्व वह्न्युभयाभावीयवन्हि ॥२५॥

25

त्वगतैकत्वावच्छिन्नप्रतियोगिताया निरुक्तोभयाभावत्वस्योक्ततया तादृशनिरुक्तपक्षाभाव
स्यैव हेतोपदत्तया. वह्नीयप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्य साध्ये विह
द्वह्निमान्धूमादित्यादौ व्याप्तिरिति वाच्यम् ।। द्वितीयकल्पे तेनत्वस्य निरुक्तपक्ष
वत्ता मात्रीयप्रतियोगिता~~[illegible]~~ सम्बन्धेन विवक्षितत्वात् ।। नाद्यः पक्षे वच्छेदकतापर्या
प्त्यनुयोगितावच्छेदकरूपाभिन्नवह्नित्वे तन्निष्ठप्रतियोगित्वस्य निरुक्तसम्ब
न्धेन सत्त्वेन निरुक्तोभयाभावत्वस्य निरुक्तोभयाभावीयप्रतियोगितायां वि
रहे उभयाभावस्य तादृशतापर्याप्त्यवच्छेदकत्वादोषः ।। न चैवं रीत्या विवक्षितो वह्नित्वजातै
कत्वाभावस्य वह्नित्वे जातैकत्वं तादृशैकत्वभिन्नप्रमेये तदुभयाभावस्य समनिय
ततया वह्नित्वजातैकत्वाभावीयप्रतियोगितायाः स्वनिरूपकाभावीयप्रतियोगि
तात्त्वसम्बन्धेन सर्वत्र सत्त्वेन तत्र निरुक्तोभयाभावत्वाविरहात् ।। तथा चाभावा
प्रसिद्ध्याऽव्याप्तिरिति वाच्यम् ।। स्वनिरूपितानुयोगितानिरूपितप्रतियोगि

॥२६॥ त्सम्बन्धेन द्वितीयरूपवृत्तित्वं विवक्षणीयम् ॥ सै प्रतियोगिता । यथा वह्नित्वग
तैकत्वाभावीयप्रतियोगितायां निरुक्तोभयाभाववत्त्वस्योक्तत्वात् । यतो द्वाभाव
न्यतरद्वीराघटद्वत्वाभावेऽसम्भवावच्छेद इति ॥ नं च । यथाद्वैद्वित्वाभाववत्त्वैद्वत्वा
भावत्व भावाभाववान्मीद्र । यद्या वह्नित्वगतैकत्वाभाववत्त्वाद्याद्यनुयोगितानिरूपितप्रति
योगित्वस्य वह्नित्वगतैकत्वाभावत्वाभावेऽपि सत्त्वेनैकत्वावच्छिन्नप्रतियोगिताया
निरुक्तोभयाभाववत्त्वस्याविरहेणासम्भवतादवस्थ्यमिति वाच्यम् ॥ स्वनिरूपितानु
योगितावच्छिन्नप्रतियोगितासम्बन्धेनाद्यप्रतियोगित्वस्य विवक्षितत्वात् ॥ नं हि घ
उभयस्वनिरूपितत्वस्वनिष्ठानुयोगितानिरूपितत्वोभयसम्बन्धेनेति न क्षय
नुपपत्तिरिति वेद्य ॥ पर्याप्तिसम्बन्धावच्छिन्नाधेयतासम्बन्धेन वह्नित्वविशि
ष्टस्य स्वरूपेण साध्यतायां वह्निमानादिहेतौ वह्नित्वगतैकत्वाभावे प्रतियोगितै
याधिकरण्यविरहेणाव्याप्तिलक्षणाघटकत्वादव्याप्तिर्वज्रायमानत्वादिति ध्येयम् ॥१३॥ ॥२६॥

26

ननु तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिवारणायाऽवच्छेदकत्वानुसरणोद्धृ। तत्रेयमाशङ्का सर्वत्रैव साध्यतानिष्ठतत्तद्व्यक्तित्वावच्छिन्नाभावमादायासंभवसंभवेऽव्याप्तिकथनमनुचितमिति चेन्न ॥ एकव्यक्तिसाध्यके तद्रूपवान् तद्रसादित्यादौ साध्यतानिष्ठतत्तद्व्यक्तित्वावच्छिन्नाभावे प्रतियोगिवैयधिकरण्यविरहेणातस्य लक्षणाघटकत्वादभावान्तरमादायैव लक्षणसमन्वयात् ॥ न च तत्रापि साध्यगगनोभयाभावस्य प्रतियोगिव्यधिकरणतया तमादायाव्याप्तिरिति वाच्यम् ॥ तदीयप्रतियोगितायाः साध्यतावच्छेदकतदितरधर्मानवच्छिन्नत्वविरहेण लक्षणाघटकत्वादिति ध्येयम् ॥ श्री$_2$ ॥ प्रत्येकं पर्याप्तिसम्बन्धेनासंतोऽवच्छेदकत्वस्येत्यादि जागदीशी ॥ तथा च महानसीयवह्न्यभावप्रतियोगितावच्छेदकत्वं यदि पर्याप्तिसम्बन्धेन वह्नित्वनिरूपितवृत्तित्वा~~भव~~भाववान् स्यात् तदा तादृशसम्बन्धेन महानसीयत्ववह्नित्वोभयनिरूपितवृत्तित्वाभाववान् स्यात् प्रथम इत्याकारकापत्तिः। तदनन्तरमापाद्याभावहेतुनाऽऽपादकाभावसिद्धिः॥ तथा यतो महानसीयवह्न्यभावप्रतियोगितावच्छेदकत्वं महानसीयत्ववह्नित्वोभयनिरूपितवृत्तित्वाभाववदतो व

न्हित्व निरूपितवृत्तित्वाभाववदिति व्याप्त्या वन्हित्व निरूपित वृत्तित्वस्य तादृशावच्छेदकत्वेऽति-
ष्टि:॥ तथा च मूलवशाद् वन्हित्वे तादृशावच्छेदकतानायात्तेति भाव: ॥श्रीश्री.॥ ननु सर्वत्रोभ-
याभाव मादायासंभवसंभवे महानसीयवन्ह्यभावमादाया व्याप्ति कथनं न सम्यगिति चेन्न ॥ तत्र
द्व्यक्तित्वावच्छिन्न प्रतियोगिक स्ववृत्ति वाच्यता सम्बन्धेन घट साध्यक सद्धेतौ साध्यतावच्छे-
दक सम्बन्धेनोभयत्वावच्छिन्नस्य केवलान्वयित्वेन प्रतियोगिवैयधिकरण्याभावाप्रसिद्ध्यो-
भयत्वावच्छिन्नाभावस्य लक्षणाघटकतया तद्व्यक्तित्वावच्छिन्नाभावस्यैव लक्षणाघट-
कतया तदीय प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्तत्र व्याप्तिविरहेणासंभ-
नवकाशात् ॥ किञ्च स्ववृत्तिभेदीय महाकालत्वावच्छिन्न प्रतियोगिता सम्बन्धेन घट साध्य-
क महाकालत्वादि हेतौ महाकालाभाव मात्रस्यैव प्रतियोगि व्यधिकरणतया तदीय प्रतियोगि-
तानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वेन व्याप्ति विरहेणासंभवाभावादिति ध्येयम् ॥श्री॥
ननु महानसीयवन्ह्यभावप्रतियोगितावच्छेदकवन्हित्वावच्छिन्नाधिकरणत्वस्य पर्वतादौ.

सत्त्वेन प्रतियोगिवैयधिकरण्यविरहेणात्स्थलईरणाघटकतया तमादायक धूमव्याप्तिर्दोषाजग
दीशेनेति चेन्न ॥ महानसीयवन्हिमान्धूमादित्यादौ पूर्वोक्तरीत्या प्रतियोगिवैयधिकरण्यवि
रहेण साध्याभावस्थलईरणाघटकत्वेऽपि अभावान्तरमादायातिव्याप्तिवारणाय प्रतियोगितव
च्छेदकावच्छिन्नाधिकरणत्वमित्यनेन प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितकप-
र्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणत्वाभाववत्त्वस्यावश्यकतया महानसी-
यवन्ह्यभावप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितकपर्याप्त्यनुयोगितावच्छेदकैय
न्महानसीयत्ववन्हित्वगतद्वित्वं तद्वृत्तिनिरूपकताकाधिकरणत्वाभावस्य पर्वतादौ सत्त्वे
न तत्स्थलईरणाघटकतयाऽव्याप्तिदानसंगतेः ॥ वच. तद्दृशानम. र्यै प्रतियोगि. व्याधिकरणा.
हेतुसमानाधिकरणाभाव. प्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छे
दकैयत्साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकरूपं तद्विशिष्टावच्छिन्नो सामाना
धिकरण्यमित्यस्यैव सम्यक्त्वे. साध्यतावच्छेदकतादितोभयानवच्छिन्नत्वेत्यादि विशेषणं

॥२८॥ व्यर्थमिति वाच्यम् ॥ जगदीशेनैकत्वादेः पर्याप्त्यनङ्गीकृतत्वाद् वन्हिमान्धूमादित्यादौ साध्य
तावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपाप्रसिद्ध्याऽव्याप्तेः ॥ द्वि.
त्व धूमावगतैकत्वादेः पर्याप्तिविरहेण धूमाभावस्यं लक्षणघटकत्वाद् उभयाभावमादायातिव्या
प्तेश्च ॥ तत्स्वीकारस्यावश्यकत्वे प्रागुक्तलक्षणस्य निर्दोषत्वात् ॥ अथासमान प्रकारकज्ञानया
प्रतिबन्धकतया हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमिति व्याप्तिज्ञानदशायां
प्रतियोग्यसमानाधिकरण हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वावच्छिन्न.
प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं साध्यतावच्छेदकतात्वानवच्छिन्न प्रतियोगिताकप.
र्याप्त्यनुयोगितावच्छेदकमित्याकारकव्याप्तिज्ञानसंभवेन तदुत्तरानुमितिप्रसङ्गात् । अतस्त
न्निवेशासंभवात् ॥ केचित्तु, अत्र विवक्षणीयस्य यादृशप्रतियोगितावच्छेदकीभूतधर्मे स्वार्थया
धिकरणीभूत यद्व्यक्त्यधिकरणतानवच्छेदकत्व सामान्यतोऽधिकरणतावच्छेदकत्वद्वयोर्व्य ॥२८॥
तिरेकस्याद् व्यक्तिभेदकूटवत्त्वार्थकस्य हेत्वधिकरणे प्रतियोगिव्यधिकरणत्वस्य महानसीय

वन्ह्यभावेप्यदृष्टत्वात् ॥ तथाच महानसीयवन्ह्यभावप्रतियोगितावच्छेदकीभूतमहानसीयत्वे स्वाश्रयाधिकरणीभूतमहानसव्यक्तिनिष्ठाधिकरणतानवच्छेदकत्वस्य सत्त्वेन तद्व्यक्तिपदेन महानसादिकमेव धर्तुं शक्यते तद्व्यक्तिभेदकूटवत्त्वस्य पर्वतादौ सत्त्वात्तथा च महानसीयवन्ह्यभावस्य लक्षणाघटकतया तमादायोभयानवच्छिन्नत्वस्य सार्थकत्वात् पर्याप्त्यनिवेशेपि न क्षतिरिति ~~वाच्यम्~~ ॥ यादृशसानन सङ्कुच्यते ॥ विशिष्टसत्तावाञ्जातेरित्यादौ विशिष्टसत्ताभावप्रतियोगितावच्छेदकसत्तात्वे स्वाश्रयाधिकरणद्रव्यगुणादिव्यक्तिनिष्ठाधिकरणतानवच्छेदकत्वघटितोभयाभावस्य सत्त्वेन तद्व्यक्तिपदेन द्रव्यगुणादेर्धर्तुं शक्यत्वेन तद्व्यक्तिभेदकूटवत्त्वस्य हेत्वधिकरणे विरहात्साध्याभावस्य लक्षणाघटकत्वेनातिव्याप्तिरितो पर्याप्तिनिवेशस्यावश्यकत्वेन पूर्वोक्तनिवेशस्य दुर्वारत्वादिति चिन्त्यम् ॥ ॥ ननु विवक्षणीयानिरवच्छिन्नावच्छेदकताकत्वस्य महानसीयवन्ह्यभावीयप्रतियोगितायां विरहेण तस्य लक्षणाघटकत्वात्कथं तमादायाव्याप्तिरिति ~~वाच्यम्~~ चेन्न ॥ निरवच्छिन्नावच्छेदकता

॥२५॥ कत्वस्य तादृशप्रतियोगितायां सत्वात् ॥ न च निरवच्छिन्नावच्छेदकतानिरूपितत्वोयस्य
सावच्छिन्नावच्छेदकतानिरूपितत्वार्थकत्वमावश्यकम् । अन्यथा महानसीयवह्नित्वजातिर्व
विशिष्टजातिमद्वह्निनोरूपीयभावमादायाऽव्याप्तेर्दुर्वारत्वात् । तथा च महानसीयवह्नित्वा
भावीयप्रतियोगितायां महानसीयत्वनिष्ठसावच्छिन्नानवच्छिन्नावच्छेदकतानिरूपितत्व
स्यसत्वेन तन्निरूपितत्वविरहेण तादृशाभावस्य लक्षणाघटकत्वात्कथमव्याप्तिरिति वाच्य
म् ॥ कालिकेन सत्तावा~~ऽमातोरित्यादौ~~ न्कालत्वादित्यादौ वत्यनाभावस्योभयप्रतियोगिकत्वेन
स्वेत्रिकालवृत्तित्वविशिष्टघटत्वाभावमात्रस्यैव लक्षणाघटकत्वं न त्वन्याभावस्य तथा च स्वभि
कालवृत्तित्वविशिष्टघटत्वादिनिष्ठप्रतियोगितायां विवक्षितनिरवच्छिन्नावच्छेदकताकत्वविरहेण
तन्निरूपकाभावस्य लक्षणाघटकत्वादव्याप्तिप्रसङ्गात् अतो निरवच्छिन्नावच्छेदकतानिरूपितैय. त
स्य साध्यतावच्छेदकनिष्ठसावच्छिन्नावच्छेदकतानिरूपितत्वार्थकत्वमावश्यकं तथा च वह्नित्व
निष्ठसावच्छिन्नावच्छेदकतानिरूपितत्वस्य. महानसीयवह्न्यभावप्रतियोगितायां सत्वेन म
हानसीयवह्न्यभावस्य लक्षणाघटकत्वान्न तमादायाव्याप्तिदानसम्भवान्न किञ्चिदनुपप- ॥२६॥

त्तिरिति ॥ केचित्तु तार्णवन्ह्यभावीयप्रतियोगितायाँ तार्णत्वनिष्ठनिरवच्छिन्नावच्छेदकत्वस्यैव
वन्हित्वनिष्ठनिरवच्छिन्नावच्छेदकत्वस्य च सत्वेन तन्निरूपकाभावस्य लक्षणाघटकतया तस्मादाय
व्याप्तिवारणायैव तार्णादितरोभयानवच्छिन्नत्वविशेषणस्य सार्थक्यात् ॥ न च तार्णत्वे वन्हित्व
व्याप्यजातिविशेषस्तथा चानुपपत्त्या प्रतीतिविरहे तादृशाभावप्रतियोगितावच्छेदकत्वेन तार्ण
२ त्वैव स्वीकारान्नाव्याप्तिशङ्कापीति वाच्यम् ॥ विषयितासम्बन्धेन वन्हिसाध्यकस्थले विषयिता
सम्बन्धावच्छिन्नप्रतियोगिताकतार्णवन्ह्यभावप्रतियोगितावच्छेदकत्वस्य केवलतार्णत्वे स्वी
कारे तार्णविषयकज्ञाने तार्णवन्हिर्नास्तीति प्रतीत्यनुपपत्तेस्तार्णत्वावच्छिन्नाधिकरणत्व
स्य तत्रावर्तित्वात्तार्णविषयकज्ञाने तार्णं नास्तीति प्रत्ययप्रसङ्गात् ॥ तार्णत्वमात्रनिष्ठावच्छे
दकताकतार्णवन्ह्यभावस्य तत्रागृहीतत्वात्तादृशप्रतियोगितावच्छेदकतानां तार्णत्ववन्हित्वो
भयस्यैव स्वीकरणीया । तथा च तादृशप्रतियोगितानिरूपकाभावमादायाव्याप्तिवारणाय तस्य सा
र्थक्यादित्याहुस्तच्चिन्त्यम् ॥ अत्रेतु गोत्वेनेदं जानामीत्याकारकानुव्यवसायानुरोधेनैकालौर
जातमिति प्रतीत्यनुरोधेन च समवायान्यसम्बन्धेनापि ज्ञातेः स्वरूपतो भानस्वीकारात्कालि.

॥३०॥ केनगुणत्वस्य साध्यतास्थले. कालिकेन गुणत्वविशिष्टस्य. समवायेन रूपत्वविशिष्टस्य गुणे रूपा
भावमादायाव्याप्तिवारणाय तत्सार्थक्यात् ॥ अत्र तादृशाभावप्रतियोगितावच्छेदकता रूपत्वमात्रे
स्वीकारे जलीयपरमाणुगततद्रूपस्या[illegible]य. तथा. जलीयपरमाण्वादौ. रूपंनास्तीति प्रत्ययप्रसङ्गात् ।
रूपत्वनिष्ठावच्छेदकताकतादृशविशिष्टाभावस्य तत्राद्दीतत्वादिति. भावनीयम्. ॥ ॥ अथाद्धि.
साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वे. । नतावत् साध्यतावच्छेदकतदितरोभयनिष्ठावच्छे
दकत्वानिरूपितत्वंम् ॥ तथासति. महानसीयवन्ह्यभावीयप्रतियोगितानिरूपितैका वन्हित्वनिष्ठ
ष्ठावच्छेदकता निरवच्छिन्नैका महानसीयत्वनिष्ठा सावच्छिन्नावच्छेदकतेति. द्वयवच्छेदक
तानं साध्यतावच्छेदकतदितरोभयनिष्ठैक्यसंभवप्रसङ्गात् ॥ नच जातिमान्नास्तीति प्रतीति
साक्षिकाभावीयप्रतियोगितायां निरूपितजातित्वावच्छिन्नावच्छेदकतायामेव तन्नियतिसिद्धि. ॥३०॥
तिवाच्यम् ॥ तादृशावच्छेदकत्वानिरूपितत्वस्य. महानसीयवन्ह्यभावीयप्रतियोगितायां स
त्वेनाव्याप्तितादवस्थ्यात् ॥ एवमवच्छेदकभेदेनावच्छेदकत्वस्य नानात्वे त्वप्रसिद्धितादवस्थ्यात् ॥

यदि च न सिंहाकारकावच्छेदकतास्वीकारान्महानसीयवह्न्यभावीयप्रतियोगितानिरूपिताव
ह्नित्वनिष्ठा निरवच्छिन्ना महानसीयत्वनिष्ठा सावच्छिन्नैकैवावच्छेदकता तत्र चोभयनिष्ठत्वस्य
प्रसिद्धत्वान्न काप्यनुपपत्तिरिति चेत्तदा तदस्वीकारपक्षे निरुक्तदोषोद्धारस्याशक्यत्वादिति।।
अत्रोच्यते। साध्यतावच्छेदकनिष्ठावच्छेदकता निरूपिता सती तदितरनिष्ठावच्छेदकतानिरूपिता
या प्रतियोगिता सा तदन्यत्वस्य तादृशोभयानवच्छिन्नत्व पदेन विवक्षितत्वान्न दोष इति ।।
न च सामान्यात् उभयानवच्छिन्नत्वं प्रतियोगितायां निवेशनीयम् तावतैव महानसीयव
ह्न्यभावमादाय नाव्याप्तिरिति वाच्यम्। ।।उभयानवच्छिन्नत्वं यदि उभयनिष्ठावच्छेदकता
निरूपितत्वं तदा पूर्वोक्तरीत्याऽवच्छेदकत्वस्य नानात्वेन न काप्यवच्छेदकतोभयनिष्ठेत्यसंभ
वात् तदवस्थ्यात् ।। यदि च स्वावच्छिन्नत्व स्वेतरधर्मावच्छिन्नत्वोभयसम्बन्धेन धर्मविशिष्टा
न्यत्वमेवास्त्विति उच्यते तदा महानसीयवह्न्यभावीयप्रतियोगितायाः प्रत्येकेन धर्मविशिष्ट
त्वस्य सत्त्वेन साध्याभावस्य लक्षणाघटकतयाऽभावान्तरमादायातिव्याप्तेः।। न च महा

॥३१॥ नसीयाभावस्य लक्षणघटकतया तदीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके वि
रहादिति वाच्यम् ॥ महानसीयवह्निभिन्नवह्निमान् धूमादित्यादौ प्रत्येकाभावस्य प्र
तियोगिवैयधिकरण्यविरहेण लक्षणघटकत्वात् साध्याभावीयप्रतियोगितायां धर्मविशिष्टा
न्याय विरहात् तथाच घटाभावादिकमादाय अतिव्याप्तेरिति ध्येयम् ॥ ॥ येन रूपेण सा
ध्यतावच्छेदकता तेन रूपेण तदनवच्छिन्नत्यादि जागदीशी ॥ अत्रेयमाशङ्का । साध्यताव
च्छेदकनिष्ठावच्छेदकतासमानाधिकरणभेदप्रतियोगित्वस्य तादृशपदेन विवक्षणीय
त्वात् तथाच तादृशेतरत्वस्य घटत्वादौ सौलभ्यात् तादृशरूपत्वप्रयासो व्यर्थ इति चेन्न ॥
महानसीयवह्निमान्धूमादित्यादौ साध्यतावच्छेदकतायाः वह्नित्वे महानसीयत्वे च सत्वे
न तत्समानाधिकरणभेदप्रतियोगित्वस्य प्रत्येकेन महानसीयत्वे वह्नित्वे च सत्वेन साध्या
भावस्य लक्षणघटकत्वादतिव्याप्तिरिति तद्रूपे दूषितमिति ॥ ॥ नच तदितिपदे
न तथाविवक्षणेपि साध्यतावच्छेदकतावच्छेदकं यत्प्रमेयत्वं तद्विशिष्टत्वस्य पदार्थे ॥३१॥

सत्त्वेन तद्विशिष्टानवच्छिन्नप्रकारत्वस्याप्रसिद्धिसत्त्वादवस्थाप्यादीति चेन्न ॥ साध्यतावच्छेदकतावच्छेदकरूपावच्छिन्नावच्छिन्नावच्छेदकत्वानिरूपितप्रकारतावच्छेदकत्वस्य तद्विशिष्टानवच्छिन्नप्रकारतावच्छेदकोयमनेन विवक्षितत्वात् ॥ घटवान्नित्याकारकज्ञानीयनिरवच्छिन्नघटत्वनिष्ठावच्छेदकताकप्रकारताया तादृशत्वेन नाप्रसिद्धिरिति ~~चेन्न~~ ॥ न वा तथापि घटाभावीयप्रतियोगितायां साध्यतावच्छेदक~~त्व~~ घटत्वात्मकप्रमेयनिष्ठावच्छेदकतानिरूपितत्वस्य तादृशेतरे यद्घटत्वादि~~क~~ तन्निष्ठावच्छेदकतानिरूपितत्वस्य सत्त्वेन तादृशत्वादितरोभयानवच्छिन्नप्रतियोगित्वाप्रसिद्धिनिबन्धनाव्याप्तिरिति वाच्यम् ॥ विशिष्य साध्यतावच्छेदकतास्थले साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वमित्यनेन साध्यतावच्छेदकीभूतधर्मावच्छिन्नावच्छेदकतानिरूपितत्वस्य विवक्षितत्वात् ॥ तथा च घटत्वादिनिष्ठावच्छेदकतायां प्रमेयत्वावच्छिन्नत्वविरहेण घटो नास्तीत्यभावीयप्रतियोगितायां तादृशोभयानवच्छिन्नत्वसत्त्वात्तदभावमादाय लक्षणसमन्वयसंभवात् ॥ न चैवमपि वह्नित्ववद्वान् धूमादित्यादौ महा

नसीयवन्ह्यभावीयप्रतियोगितायांवन्हित्वावच्छिन्नावच्छेदकतानिरूपितत्वविरहेण निरूक्तादि
तरोभयानवच्छिन्नावसत्वात्तन्निरूपकाभावमादायाव्याप्तेः ।। यदि च साध्यतावच्छेदकतावच्छेद
केतरयन्महानसीयवन्हित्वैतदवच्छिन्नावच्छेदकतानिरूपितत्वस्य तादृशप्रतियोगितायां स
त्वेन सिद्धान्तो विवक्षणीयसाध्यतावच्छेदकेतरानवच्छिन्नावच्छेदकत्वानिरूपितत्वविशेषण
स्य विरहेण तन्निरूपकाभावस्य तादृशघटकतोच्यते तदा तादृशवन्ह्यभावमादायाव्याप्तेर्दुर्वा
रत्वादितिवाच्यम् ।। प्रतियोगिव्यधिकरणाभावीयतादृशप्रतियोगितानिरूपितावच्छेदकत्वा
भावस्य साध्यतावच्छेदके विवक्षितत्वात् ।। तथा च महानसीयप्रतियोगितानिरूपितस्वावच्छि
न्नावच्छिन्नावच्छेदकता न वन्हित्वे किंतु महानसीयत्वादावेवेति तादृशावच्छेदकत्वाभावस्य साध्यताव
च्छेदके सत्वान्नाव्याप्तिरिति ।। अथैवमपि रूपत्वन्यूनवृत्तिजातिमद्वान् रूपादित्यादौ सर्वा
सामेव रूपत्वन्यूनवृत्तिजातीनां निरवच्छिन्नावच्छेदकत्वसत्वेनाव्याप्त्यभिधानस्य सन्दर्भ
विरोधापत्तेः ।। नीलो नास्तीत्याकारकाभावीयप्रतियोगितानिरूपितस्वावच्छिन्नावच्छेदकत्व

स्याप्रसिद्ध्या तादृशाभावस्य लक्षणाघटकत्वात् ॥ एवं प्रमेयवान्घटादित्यादौ निरवच्छिन्नावच्छे-
दकताकप्रतियोगिताकाभावीयप्रतियोगितानिरूपितसावच्छिन्नावच्छेदकत्वाप्रसिद्ध्या तादृशा-
भावस्य लक्षणाघटकत्वात् ॥ लक्षणाघटकता च घटवान्नास्तीत्याकारकाभावस्यैव तदीयप्रति-
योगितायां च विवक्षणीयसाध्यतावच्छेदकतात्वावच्छिन्नावच्छेदकत्वानिरूपितत्वस्य विरह-
दभावाप्रसिद्ध्या विशिष्टसाध्यतावच्छेदकतास्थलेऽसंभवप्रसङ्गादिति ॥ अत्रोच्यते ॥ साध्य-
तावच्छेदकनिष्ठावच्छेदकतानिरूपितत्व साध्यतावच्छेदकरूपावच्छिन्नावच्छेदकत्वानिरूपि-
तप्रकारतावच्छेदकनिष्ठावच्छेदक~~ता~~ निष्ठावच्छेदकत्वानिरूपितत्वोभयाभावे. पर्यवसित-
त्वात्. ॥ तथा च साध्यतावच्छेदकपदेन यदि घटत्वरूपप्रमेयस्य धारणा तदा घटत्व. निष्ठावच्छेदक-
तानिरूपितत्व घटत्वनिष्ठावच्छेदकतानिरूपितत्व.स्य चैक्येनोभयत्वाविरहात् । अतः साध्यता-
वच्छेदकपदेन पटत्वादिरूपप्रमेयस्य धारणा तथा च पटत्वनिष्ठावच्छेदकतानिरूपितत्व तदित-
रनिष्ठावच्छेदकतानिरूपितत्वोभयाभाववत्त्वस्य घटाभावीयप्रतियोगितायां सत्वात्तमादायल

हासमन्वयादिति ॥ नच जातिमान् भावत्वादित्यादौ साध्यतावच्छेदकघटत्वनिष्ठावच्छेदक-
तानिरूपितत्वस्य तादृशाविशिष्टानवच्छिन्नाया घटत्वानियाकारकज्ञानीयप्रकारतावच्छेद-
कघटत्वनिष्ठावच्छेदकतानिरूपितत्वस्य चोभयोर्जातिमदभावीयप्रतियोगितायां सत्त्वेनो-
भयाभाववत्त्वविरहादभावात्तमादायातिव्याप्तिरिति ॥ यदि च जातिमदभावीयप्रतियोगि-
तानिरूपितजातित्वावच्छिन्ना घटत्वपटत्वादिनिष्ठा एकैवावच्छेदकता तथा च पटत्वनिष्ठा-
वच्छेदकतानिरूपितत्वे घटत्वनिष्ठावच्छेदकतानिरूपितत्वे उभयत्वविरहादिति निष्ठावच्छे-
दकतापदेन निरवच्छिन्नावच्छेदकता धर्तव्या तन्निरूपितत्वविरहेणोभयाभाववत्त्वस्य सा-
ध्याभावीयप्रतियोगितायां सत्त्वादतिव्याप्तिशङ्कैव नासीदित्युच्यते तदाऽवच्छेदकभेदेनावच्छेद-
कताया भिन्नत्वनये जातिरेवेति वाच्यम् ॥ एतद्दोषोद्धारस्यैवं चेत्यादिनाऽग्रे वक्ष्यमाणत्वा-
दत्र कल्पे यथा दूषणं तथाऽग्रे तथेत्यादिना वक्ष्यते ॥ ॥ साध्यतावच्छेदकतावच्छे-
दकरूपानवच्छिन्नप्रकारतावच्छेदकमित्येव तदितरपदेन विवक्षिता. यत्त्वतेनैव सामञ्जस्ये

लौतद्रूपविशिष्टेयनेनेति चेन्न ।। महानसीयवन्हिमान्धूमादित्यादौ परामर्शनिरूपितत्वस्याली
कात्. साध्यतावच्छेदकतावच्छेदकं महानसीयवन्हित्वावच्छिन्न प्रकारतायाः सत्वेन तादितपदेन सा
ध्यतावच्छेदकस्यापि धर्तुं शक्यत्वादिति. व्याप्तेरतस्तन्निवेशः ।। ।।
ननु साध्यतावच्छेदकतावच्छेदकविशिष्टानवच्छिन्नप्रकारताश्रयस्यैवेतरपदेन विवक्षणे दोषाभावात्
अवच्छेदकानुधावनैय्यर्थमिति चेन्न महानसीयवान् धूमादित्यादौ. महानसीयभिन्नवन्हिमान्धूमा.
दित्यादौ. साध्याभावीयप्रतियोगितायां तादृशविशिष्टानवच्छिन्न. प्रकारताश्रयत्वस्य. साध्यतावच्छे
दके सत्वेपि. न साध्यतावच्छेदकवन्हित्वनिष्ठावच्छेदकतानिरूपितत्वस्य. तादितार्यन्महानसीयत्वादि
तन्निष्ठावच्छेदकतानिरूपितत्वस्य च द्वयोः सत्वेन निरूकोभयाभाववत्वाविरहाद्भानारमादायाति
व्याप्तेः ।। न च तन्निवेशेपि. साध्यतावच्छेदकमहानसीयत्वनिष्ठावच्छेदकतानिरूपितत्वतद्रूपविशिष्ट
नवच्छिन्नायावन्हिमानित्याकारकज्ञानीयप्रकारतातदवच्छेदकवन्हित्वनिष्ठावच्छेदकतानिरूपितत्वो.
भयोः साध्याभावीयप्रतियोगितायां सत्वेन निरूकोभयाभाववत्वविरहादतिव्याप्तिरिति वाच्यम् ।।

॥३४॥ अवच्छेदकपदेन पर्याप्ति निवेशनं सूचितं। तथाहि तादृशविशेष्यतानवच्छिन्नप्रकारतावच्छेदकतात्वाव
च्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति त्यवच्छेदकतानिरूपितत्वं तादृशनिष्ठावच्छेदकत्वा
तानिरूपितत्वस्यार्थः॥ रूपवृत्तित्वञ्चावच्छेदकताख्यस्वानिरूपित~~त्व~~ प्रतियोगिता~~न~~ निरूपितावच्छे
दकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। तथा च ~~महानसीय~~ साध्यतावच्छेदक
महानसीयत्वत्वावच्छिन्नावच्छेदकतानिरूपितया वन्हित्वसामान्यावच्छिन्नप्रकारतावच्छेदक
तात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकं वन्हित्वगतैकत्वर्पवृत्त्यवच्छेदकता वन्हिसामान्याभावी
यप्रतियोगितानिरूपितैव न तु महानसीयवन्ह्यभावीयप्रतियोगितानिरूपिता वन्हित्वनिष्ठावच्छे
दकतातस्या निरूपकसम्बन्धेन रूपवृत्तित्वविरहात्। तादृशरूपवृत्त्यवच्छेदकतानिरूपितत्वस्य.
साध्याभावीयप्रतियोगितायां विरहेण। निरुक्तोभयाभाववत्त्वस्य हेतुत्वान्न कोऽपि दोषः॥ एवं
जातिमद्धानभाववानित्यादौ तादृशविशेष्यतानवच्छिन्ना या घटवानित्याकारकज्ञानीयप्रकार ॥३४॥
तावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकं यद् घटत्वगतैकत्वं तद्वृत्त्य.

वच्छेदकता घटसामान्याभावीयप्रतियोगितानिरूपिताघटत्वनिष्ठावच्छेदकतानिरूपितत्व
स्यजातिमान्नास्तीत्यभावीयप्रतियोगितायां विरहेणोभयाभाववत्त्वस्य.असत्त्वान्न दोष इत्या
हुः॥ अथैवमपि वन्हित्ववद्वान्धूमादित्यादौ. महानसीयवन्हित्ववान्नास्तीत्यभावस्य. नाशोवन्हि
त्ववान्नास्तीत्यभावस्य वालहृदीसाघटकतया. तस्मादेवाव्याप्तिप्रसङ्गात्॥ तदीयप्रतियोगितायाः
साध्यतावच्छेदक.निष्ठावच्छेदकतानिरूपितत्व.सत्त्वेपि.तादृशविशिष्टानवच्छिन्नाया महानसी
यवन्हित्याकारकज्ञानीयप्रकारतावच्छेदकतात्वावच्छिन्न. पर्याप्त्यनु. योगितावच्छेदकं यन्महा
नसीयवन्हित्वतदवृत्तित्वस्य महानसीयो नास्तीत्यभावीयप्रतियोगितावच्छेदकतया. सैवेति.तादृ
शावच्छेदकता. निरूपितत्वस्यापि विरहेणोभयाभाववत्त्वस्योद्धृतत्वादिति चेदत्रोच्यते॥ साध्यता
वच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकता.वच्छेदकताविशिष्टावच्छेदकतानि
रूपितत्व. साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभावस्य. निष्कृष्टार्थत्वात्॥
वैशिष्ट्यञ्चोभयत्र. स्वसामानाधिकरण्य. स्वसाजात्योभयसम्बन्धेन। साजात्यञ्च स्ववृत्ति.

॥३५॥ निरवच्छिन्नत्व सावच्छिन्नत्वान्यतद्रूपेण ॥ तथा च प्रमेयवद्वान्धूमादित्यादौ. साध्यतावच्छे
दकताविशिष्टा सावच्छिन्ना घटत्वादिनिष्ठावच्छेदकतानिरूपितत्वस्य घटवानित्याकार
कज्ञानीय निरवच्छिन्न घटत्वनिष्ठावच्छेदकताकप्रकारतायां सत्त्वेन नक्षत्यनुपपत्तिरिति ॥ प्रथ
मदिशि वैशिष्ट्य घटकतया. स्वसाजात्यस्यानिवेशे प्रमेय~~त्व~~वद्वान्धूमादित्यादौ निखिलावच्छेदक
तायां साध्यतानिरूपितप्रमेयनिष्ठावच्छेदकतावैशिष्ट्यस्य. सामानाधिकरण्यसम्बन्धेन साध्य
तावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारत्वाप्रसिद्ध्याऽव्याप्तिप्रसङ्गादतस्तन्निवेशः ॥
स्वसामानाधिकरण्यानिवेशे. वन्हिमान्धूमादित्यादौ. साजात्यसम्बन्धेन साध्यतावच्छेदकता
विशिष्टत्वस्य तार्णत्वनिष्ठावच्छेदकतायां सत्त्वेन तार्णवन्ह्यभावीयप्रतियोगितायां विवक्षित
साध्यतावच्छेदकतादितरो. अया.नवच्छिन्नत्वसत्त्वात्तमादायाव्याप्तिप्रसङ्गादतस्तन्निवेशः ॥ सा.
जात्यघटकसावच्छिन्नत्वानिवेशे. प्रमेयवद्वान्धूमादित्यादौ साध्यतावच्छेदकताविशिष्टाव
च्छेदकत्वाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात् ॥ निरवच्छिन्नत्वानिवेशे. वन्हिमान्धूमादित्यादौ. साध्य ॥३५॥
तावच्छेदकतायां सावच्छिन्नत्वविरहेण साध्यतावच्छेदकताविशिष्टावच्छेदकत्वाप्रसिद्ध्या.

अव्याप्तिरतस्तन्निवेशः॥ द्वितीयवैशिष्ट्यघटक स्वसामानाधिकरण्य.मात्रनिवेशे.महानसीय
वन्हिमान्धूमादित्यादौ. साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपित.प्रकारतान्तर्गत वन्हि
त्ववद्भानीयाकारकज्ञानीयसावच्छिन्नावच्छेदकताकप्रकारतायाश्च शक्यतया निरूपि
तावच्छेदकताविशिष्टस्य सामानाधिकरण्य.सम्बन्धेन निरवच्छिन्नवन्हित्वनिष्ठावच्छे
दकतायांसत्त्वात्तथात्वं. तादृशवन्हित्वनिष्ठ निरवच्छिन्नावच्छेदकतानिरूपितत्व साध्यतावच्छे
दकमहानसीयत्वनिष्ठावच्छेदकतानिरूपितत्वोभयोः साध्याभावीयप्रतियोगितायांसत्त्वेनोभ
याभाववत्त्वविरहात्साध्याभावस्थलदशायां घटकत्वेनातिव्याप्तिरतस्तन्निवेशः॥ स्वसामान्यमा
त्रनिवेशे तादृशसावच्छिन्नवन्हित्वनिष्ठावच्छेदकता वैशिष्ट्यस्य महानसीयत्वनिष्ठावच्छेदकतायां
सत्त्वेन तादृशमहानसीयत्वनिष्ठावच्छेदकतानिरूपितत्व साध्यतावच्छेदकवन्हित्वनिष्ठावच्छेदक
तानिरूपितत्वोभयोः सत्त्वेनोभयाभाववत्त्व.विरहेणातिव्याप्तिरतः स्वसामानाधिकरण्यनिवेशः॥
सामान्यघटकनिरवच्छिन्नत्वस्याप्येवं फलं.द्रष्टव्यम्॥ एतच्च.यथाश्रुतग्रन्थानुरोधेन.॥ वस्तु

गत्तु साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्व. साध्यतावच्छेदकताविशिष्टान्यावच्छेदकता
॥३६॥ निरूपितत्वोभयाभाववत्त्वमेव तादृशोभयानवच्छिन्नत्वमित्यस्य पर्यवसितार्थः ॥ वैशिष्ट्यञ्च.
स्वसामानाधिकरण्य.स्वसाजात्योभयसम्बन्धेन । संसर्गान्तरञ्च पूर्ववत् सम्बन्धव्यावृत्तिः पूर्व.
वद्बोध्या ॥ ॥ अथात्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवन्ह्यभावादिकमादाय
व्याप्तिवारणार्थं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणं. आवश्यकम् ॥ यतः समवायसम्ब
न्धावच्छिन्नवन्ह्यभावीयप्रतियोगितायां. साध्यतावच्छेदकवन्हित्वनिष्ठावच्छेदकतानिरू
पितत्व साध्यतावच्छेदकताविशिष्टान्य~~सम्बन्धावच्छिन्न~~ समवायनिष्ठावच्छेदकतानिरूपितत्वो.
भयोः सत्वेनोभयानवच्छिन्नत्व. विरहेण तादृशाभावस्य लक्षणाघटकत्वादिति चेन्न. ॥ धूम.
वान्वन्हेरित्यादौ. संयोगेन धूमाभावप्रतियोगितायां धूमत्वनिष्ठावच्छेदकतानिरूपितत्वस्य सा
ध्यतावच्छेदकताविशिष्टान्यसंयोगनिष्ठावच्छेदकतानिरूपितत्वस्य च सत्वेन. साध्याभावस्य
लक्षणाघटकत्वादतिव्याप्तिरतो विशिष्टान्यावच्छेदकतायां किञ्चित्सम्बन्धावच्छिन्नत्व ॥३६॥

36

निवेश

स्यावश्यकतया समवायेन वह्न्यभावमादाय व्याप्तिवारणाय प्रतियोगितायां साध्यतावच्छे
दकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकत्वादिति ।। नवीनोक्तातिव्याप्तिवारणाय धं धर्मसं
सर्गसाधारणसाध्यतावच्छेदकताविशिष्टान्यत्वस्यैव कथ्यतया संयोगनिष्ठावच्छेदकतायां
साध्यतावच्छेदकताविशिष्टान्यत्वविरहेण तिव्याप्तिरिति वाच्यम् ।। तथा सति समवाय
निष्ठावच्छेदकतायामपि परम्परया साध्यतानिरूपितत्वसत्वेन संसर्गसाधारणावच्छेद
कताविशिष्टान्यत्वस्य समवायनिष्ठावच्छेदकतायां विरहात् समवायेन वह्न्यभाव
स्थले हेतावदृष्टतया तमादायाव्याप्तिवारणाय तत्सार्थक्यात् ।। न चावच्छेदकतायां
साध्यतानिरूपितत्वस्य साक्षान्निवेशे समवायनिष्ठावच्छेदकतायां तद्विरहेण सा
ध्यतावच्छेदकताविशिष्टान्यत्वसत्त्वादिति वाच्यम् ।। संयोगिनः द्रालित्वेन साध्यतायां
स्पन्दत्वादिहेतौ संयोगिनः संयोगेनाभावमादाय व्याप्तिवारणायैव साध्यतावच्छेद

ना

धर्म

॥६१॥ कसम्बन्धावच्छिन्नत्वेनैव साध्यसाधर्म्यात् ॥ तादृशप्रतियोगितायां साध्यतावच्छेदकतावि-
शिष्टान्यावच्छेदकतानिरूपितत्वाविरहेणोभयानवच्छिन्नत्वस्याक्षतत्वान्नोक्ताव्याप्त्यनुप-
पत्तिरिति ॥ ननु महानसीयत्वावच्छिन्नवन्हिमान् धूमादित्यादौ साध्यतानिरूपितत्वस्य
परंपरया महानसीयत्वनिष्ठावच्छेदकतायां सत्त्वेन तत्र साध्यतावच्छेदकताविशिष्टा-
न्यत्वाविरहात् ॥ तथा च महानसीयवन्ह्यभावीयप्रतियोगितायां निरुक्तोभयानवच्छि-
न्नत्वसत्त्वेन तदभावमादायाव्याप्तिरिति चेन्न ॥ साध्यतानिरूपितत्वस्य साक्षान्निवे-
शात् ॥ तथा च साध्यतानिरूपितसाक्षादवच्छेदकतावन्हित्वनिष्ठा तद्विशिष्टान्यत्वस्य
महानसीयत्वनिष्ठावच्छेदकतायां सत्त्वेन तादृशविशिष्टान्यावच्छेदकतानिरूपितत्वसा-
ध्यतानिरूपितवन्हित्वनिष्ठावच्छेदकतानिरूपितत्वोभयोर्महानसीयवन्ह्यभावीयप्रति-
योगितायां सत्त्वात् उभयाभाववत्त्वाविरहान्न तमादायाव्याप्तिरिति ॥ न चैवम् ॥६१॥

हानसीयवन्हि इति चेद्विशिष्टजातिमद्वान्धूमाद। जातिमद्भिन्नाभाववत्वादित्यादौ वा
घ्याभावीयप्रतियोगितायाः साध्यतानिरूपितसाहैतादवच्छेदकताविशिष्टान्याया. जाति
त्वनिष्ठावच्छेदकता. परं घटयानन्निरूपितत्वस्य साध्यतावच्छेदकजाति निष्ठावच्छेदकता
निरूपितत्वस्य. सत्वेन. निरुक्तोभयाभाववत्वविरहात्साध्याभावस्य तादृशगोघटद्वयावति
व्याप्तिरिति वाच्यम् ॥ विशिष्टान्यावच्छेदकतानिरूपितत्वस्यापि साध्यतावच्छेदकानिवेशादित्या
प्ति. विरहादिति ध्येयम् ॥ ~~[illegible]~~ ॥ ॥ ॥ ॥
अथ महानसीयवन्हिमा~~न्धूमाद~~ नाऽज्ञानित्वादित्यादौ. प्रत्येकमहानसीयाभावस्य वन्ह्यभावस्य
नद्वैशाघटकतया. तदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वेनाव्याप्तिः। एवं प्रतियोगि
तासम्बन्धेन महानसीयवन्हिमान् महानसीयवन्ह्यभाववत्वादित्यादावव्याप्तिरिति चेन्न ॥ साध्य
तावच्छेदकतात्वावच्छिन्न. प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं य ~~[illegible]~~ द्यादि.

॥३८॥ चिद्धेत्वधिकरणानिरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं रूपं तद्वृत्ती-
त्वमपि निरुक्त तत्तदितरोभयानवच्छिन्नप्रतियोगितायां विवक्षणीयं। रूपवृत्तित्वञ्च स्वाव-
च्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन। स्वं प्रतियोगिता। तथा च ता-
दृशानवच्छेदकत्वस्य हेत्वधिकरणानिरूपितमहानसीयवन्हित्वावच्छिन्नवृत्तितानिरूपित तद-
वच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वस्य च प्रत्येकं वन्हित्वगगनैकत्वे महानसी-
यत्वत्व महानसीयत्वैकत्वद्वित्वे सत्वेन तद्वृत्तित्वप्रत्येकेन. वन्ह्यभावादि प्रतियोगितायां वि-
रहात्तमादायाव्याप्तिरिति॥ अत्र साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेद-
कत्वस्यानिवेशे विषयितया. वन्हिसाध्यक वन्हिविषयकज्ञान महानसीयवन्हिविषयकज्ञाना-
न्यतरत्वहेतौ. व्यभिचारीति. व्यभिचारनिरूपकाधिकरणानिरूपितवृत्तितावच्छेदकताप-
र्याप्त्यनुयोगितावच्छेदकत्वस्य वन्हित्वगगनैकत्वे सत्वेन तद्वृत्तित्वस्य महानसीयवन्ही ॥३८॥

भावीयप्रतियोगितायां विरहेणासाध्याभावस्य तद्धर्माघटकत्वाद् घटाभा[illegible] वादिकमा
दायातिव्याप्तिरतस्तन्निवेशः ॥ हेत्वधिकरणे यत्किञ्चित्त्वानुपादानेन तादात्म्येन प्रमेयसा
ध्यकवाच्यत्वादिहेतौ. हेत्वधिकरणे तादात्म्यसम्बन्धेनानिखिलपदार्थसत्त्वेन तादृशवृत्ति
तावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपावृत्तिप्रतियोगित्वाप्रसिद्ध्याऽव्या
प्तिरतस्तन्निवेशः ॥ तद्व्यक्तिनिरूपितवृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगिता
वच्छेदकतादृशरूपवै[illegible]नीतीयाकारकयत्किञ्चिदभावस्य घटाभावीयप्रतियोगि
तायां सत्त्वेन तमादाय लक्षणासमन्वयादिति ॥ नचोभयप्रतियोगिकतादात्म्यस्याप्रसी
काराद्धेत्वधिकरणावृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वस्य घटत्वप
त्वजातिद्वित्वे विरहेणोभयाभावस्य तद्धर्माघटकतया तमादाय तद्धर्मासमन्वयसम्भवाद् यत्किञ्चि.
त्वनिवेशनैरर्थक्यमिति वाच्यम् ॥ प्रमेयवत्तादात्म्येन साध्यतास्थले तादृशप्रतियोगिता

॥३५॥ याँ निरूपकतादात्म्योभयानवच्छिन्नत्वस्य. साध्यतावच्छेदकतावच्छेदकेतरावच्छिन्नावच्छेदकत्वा.
निरूपितत्वस्य. वह्निरहेतौ तन्निरूपकाभावस्यापि. तद्धेतौ घटकत्वमिति तत्राव्याप्तिरित्यादा.
वश्यकत्वादिति. किंचोभयप्रतियोगिकतादात्म्यस्यापि. शब्दशक्तिप्रकाशिकायां. जगदीशेन.
स्वीकारात्पूर्वोक्तस्थलेऽव्याप्ति. वारणाय तत्सार्थक्यादिति. ॥अथ वह्निमान्धूमादित्यादौ. पर्व.
तादि निरूपित. घटकालीन. वह्नित्वावच्छिन्न वृत्तिता निरूपितावच्छेदकतापर्याप्त्यनुयोगिता
वच्छेदकत्वस्य. घटत्वगतैकत्वेऽपि. सत्त्वादेवंरीत्या पटत्वगतैकत्वेऽपि. सत्त्वात्तादृशरूपावृत्ति
प्रतियोगित्वस्याप्रसिद्धेरिति चेन्न. ॥एतादृशवृत्तितानिरूपितत्वस्य. साध्याद्येव निवेशा.
न्नानुपपत्तेः ॥ नच. तथापि. पर्वतादिनिरूपितप्रमेयत्वावच्छिन्नावच्छेदकताद्वृत्तिता
निरूपितत्वस्य. निर्वह्निप्रमेयनिष्ठावच्छेदकता. यां सत्त्वेन. तादृशवृत्तितावच्छेदकतापर्या.
प्त्यनुयोगितावच्छेदकत्वस्य. घटत्वादिगतैकत्वे. सत्त्वादप्रसि. द्धितादवस्थ्यमिति वा. ॥३५॥

ख च्यम्.।। एकधर्मावच्छिन्न.निरूपकत्वस्यैक धर्मावच्छिन्नाधेयतावच्छेदकत्वादीनामैक्य.
मिति शब्दशक्तिप्रकाशिकायां. जगदीशेन लिखितत्वात्तथा च पर्वतादिनिरूपितवृत्ति.
तावच्छेदकत्वं. न घटत्वात्मक प्रमेयत्वे.पितु वह्नित्वात्मक प्रमेयत्वेवेति. घटाभाववति.
तादृशाघटकत्वादिति.।। यद्वा हेत्वधिकरणे. यत्किंचिद्व्यक्तिनिरूपितवृत्तिता
विशिष्टं यत्साध्यतावच्छेदकतात्वावच्छिन्न.पर्याप्त्यनुयोगितावच्छेदकरूपं तद्रूपा.
वृत्ति.त्वस्य प्रतियोगितायां विवक्षितत्वात्।। वृत्तीनां वैशिष्ट्यं च. तद्रूपे.स्वनिरूपिता
वच्छेदकताविशिष्टप्रतियोगितास्वनिरूपक.पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धे.
न.। स्ववृत्तित्व.। प्रतियोगितायामवच्छेदकतावैशिष्ट्यं च स्वतादात्म्य.स्वनिरूपि.
तत्वान्यतर.सम्बन्धेन स्वविशिष्टावच्छेदकतात्वावच्छिन्नत्व सम्बन्धेन। स्वमवच्छेद.
कता।। तथा च प्रकृते स्व पदेन.प्रमेयत्वावच्छिन्नघटत्वनिष्ठावच्छेदकतात्वस्य.धर्तव्यतया.

कान्यतरसम्बन्धेन. तद्विशिष्टावच्छेदकतात्वावच्छिन्नत्वसम्बन्धेनाद्विशिष्टत्वस्यप्रमेय
त्वघटत्वानिष्ठावच्छेदकतायाँ सत्त्वात्तन्निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वस्य. प्रमेय
त्वघटत्वगते. त्विसत्वेनतादृशरूपावृत्तित्वस्य घटाभावीयप्रतियोगितायामक्षतमीय
दोषात् ॥ नच वन्हिमान् ज्ञानत्वादित्यादौ साध्यतावच्छेदकतात्वावच्छिन्न. पर्याप्त्यनु.
योगितानवच्छेदकतादृशरूपाप्रसिद्ध्याऽव्याप्तिरिति ~~वेत्व~~ वाच्यम् ॥ ~~स्वपूर्वा~~ स्वविशिष्ट
रूपवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यत्वाभाववत्त्वस्य प्रतियोगितायामेवे
शनीयत्वात् । स्ववैशिष्ट्यञ्च स्वनिरूपितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानव
च्छेदकत्वस्वकालीनयत्किञ्चिद्धेत्वधिकरणनिरूपितवृत्तिताविशिष्टत्वोभयसम्बन्धेन।
वृत्तितावैशिष्ट्यञ्च पूर्ववत्सम्बन्धेन बोध्यम् ॥ तथा च वन्हिमान् ज्ञानत्वादित्यादौ. ताद
शसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यत्वाभावस्य केवलान्वयि~~त्वस्य~~त्वया. तद्वत्त्वस्य.

घटाभावीयप्रतियोगितायां सत्त्वान्न दोषः ॥ न च विपरीत~~याप्यव्यक्तिव्यापक~~वह्नित्ववद्वा
नास्यात्वादित्यादौ तादृशसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यत्वाभावस्य वह्नित्वा
ष्वयितयाऽवच्छेदकत्वस्य निरवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगितायां सत्त्वान्नानि
रूपकाभावस्य लक्षणाघटकत्वान्न मादृशामव्याप्तिरिति वाच्यम् ॥ एतद्दोषस्याग्रे विवरि
ष्यमाणविशेषणस्य प्रतियोगितायां स्वातन्त्र्येण प्रवेशपरत्वादेव वारणसंभवात् ॥ अथ महानसी
यवह्निमान् ज्ञानत्वादित्यादौ प्रत्येकाभावमादायाव्याप्तिवारणेपि विपरीतवह्निमहानसी
याभावमादायाव्याप्तिवारणं दुःशक्यमेव । यतो वह्नित्वमहानसीयत्वगतद्वित्वे साध्यतावच्छेद
न कतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य सत्त्वेपि यत्किञ्चिद्धर्मावधि
करणावृत्तितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्वस्य विरहात् तादृशरूपावृत्तित्वस्य
विपरीताभावीयप्रतियोगितायां सत्त्वेन तन्निरूपकाभावस्य लक्षणाघटकत्वादिति चेन्न ॥

यत्किञ्चिद्वृत्त्यधिकरणावृत्तितावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं यद्रूपं.
तद्रूपप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं यत्साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्-
च्छेदकं तद्रूपं. तद्रूपावृत्तित्वस्य विवक्षितत्वात् ॥ तथा च व्यासज्यवृत्तिधर्मप्रतियोगिकपर्याप्त्य-
नुयोगितावच्छेदकत्वस्य समनियतव्यासज्यवृत्तिधर्मः सर्वत्वादिसिद्ध्यततया. ह्यवधिकरणा-
वृत्तितावच्छेदकता.प्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं. यन्महानसीयत्ववह्नित्वगतद्वि-
त्वं. तत्प्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वस्य तादृशानवच्छेदकत्वस्य च. वह्नित्वमहा-
नसीयत्वगतद्वित्वादौ. सत्त्वेन तदवृत्तित्वस्य विपरीताभावीयप्रतियोगितायां. विरहात्तन्निरू-
पकाभावीयत्वहीरणाघटकत्वेनादोषात् ॥ किञ्च स्वसामानाधिकरण्य-स्वसाजात्य-स्वनि-
रूपितसाध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वरूपवृत्तित्वैतत्त्रित-
यसम्बन्धेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपिताव साध्यतावच्छेदकनि-

ष्ठावच्छेदकतानिरूपितत्वोभया~~सम्बन्धेन~~ भाववत्त्वमेव साध्यतावच्छेदकतादितरोभयानवच्छि-
न्नत्वमित्यस्यार्थः। तथा च विपरीतताभावीयप्रतियोगितायाः साध्यतावच्छेदकवन्हित्वनिष्ठा-
वच्छेदकतानिरूपितत्वस्य स्वनिरूपितसाध्यतावच्छेदकतात्वावच्छिन्न. पर्याप्त्यनुयोगिता-
वच्छेदकरूपवृत्तित्वस्य. विपरीतताभावीयप्रतियोगितानिरूपितमहानसीयत्वनिष्ठावच्छे-
दकतायाः विरहेणाविशिष्टान्यः स्वस्य सत्त्वात्तन्निरूपिकतात्वस्य सत्त्वेन निरूपकोभयाभा-
ववत्त्वरूपतत्तादितरोभयानवच्छिन्नत्वविरहेणानिरूपकाभावस्थलहृदाघटकत्वादिति.
ध्येयम्॥ ॥केचित्तु. साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितास्पतिताद्विशिष्टान्या-
वच्छेदकतानिरूपिताया प्रतियोगितादन्यात्वमेव तत्तादितरोभयानवच्छिन्नत्वस्यार्थः। वैशि-
ष्ट्यञ्चोभयत्र स्वसामानाधिकरण्यावच्छेदकतासम्बन्धावच्छिन्न. प्रतियोगिताकस्वाभाव.
वद्धर्मानवच्छिन्नत्वोभयसम्बन्धेन ग्राह्यम्॥ तथा च वन्हिमान्धूमादित्यादौ. घटाभावमा.

दाय प्रमेयवद्धान्धूमादित्यादौ. वघटत्ववान्नास्तीत्याकारकाभावमादायलक्ष्यासम्भवयो
र्नकोऽपिदोषः॥ सम्बन्धघटकस्वसामानाधिकरण्यमात्रोक्तौ. प्रमेयवद्धान्धूमादित्यादौ.
सामानाधिकरण्यसम्बन्धेन साध्यतायानिखिलावच्छेदकतायांसत्त्वेन. तद्विशिष्टान्यत्वस्या
प्रसिद्ध्याऽव्याप्तिरतस्तन्निवेशः॥ तथाचस्वावच्छिन्नघटत्वादिनिष्ठावच्छेदकतायाः तादृशवि
शिष्टान्यत्वस्यप्रसिद्धत्वान्नदोषः॥ विषयितयाघटत्ववत्तज्ज्ञानवत्त्वादित्यादौ नीलघटाभाव
मादायाव्याप्तिवारणायस्वसामानाधिकरण्यनिवेशः॥ नचमहानसीयवह्निमत्तज्ज्ञानवत्त्वादित्या
दौनीलघटपीतघटोभयसाध्यकस्थले प्रत्येकाभावं विपरीताभावञ्चादायाव्याप्तिरितिवाच्यम्॥
साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकत्वरूपवृत्त्यर्थं च साध्यतावच्छेद
कताविशिष्टावच्छेदकतानिरूपितायाप्रतियोगिता तदन्यत्वस्यविवक्षितत्वात्॥ तथाचविप
रीताभावीयप्रतियोगितायाः तादृशरूपवृत्तित्वस्य. साध्यतावच्छेदकताविशिष्टावच्छेदकता
निरूपितत्वस्य. च सत्त्वेन तदन्यत्वस्य च सत्त्वेन तदन्यत्वविरहात्तमादायनाव्याप्तिरिति॥

न च रूपत्वन्यूनवृत्तिजातिमद्वान् रूपादित्यादौ नीलाभावीयप्रतियोगितायां तदन्यत्वविरहेण, तमादायाव्याप्तिविरहेण दानाऽसङ्गतिरिति वाच्यम् ॥ अवच्छेदकतासम्बन्धेन स्वाभाववद्धर्मा. नवच्छिन्नत्वसम्बन्धेन. स्ववृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन. वैशिष्ट्यस्याविवक्षितत्वात् । तथा च स्ववृत्तित्वविरहेण साध्यतावच्छेदकताविशिष्टत्वस्य. नीलत्वादिनिष्ठावच्छेदकतायां विरहेण. नीलाभावस्य लक्षणाघटकतयाऽव्याप्तिदानसङ्गतेः ॥ न च तथापि वह्नित्ववद्वान् तज्ज्ञानत्वादित्यादौ. निरवच्छिन्नवह्नित्वनिष्ठावच्छेदकतायां तादृशविशिष्टत्वस्य. विरहेण तन्निरूपकाभावस्य लक्षणाघटकतयाऽव्याप्तिरिति वाच्यम् ॥ स्वनिरूपितावच्छेदकताविशिष्टान्यत्वस्व. निरूपितसाध्यतावच्छेदकताव्यापकत्वोभयसम्बन्धेन. तथा च वह्नित्वनिष्ठ त्वावच्छिन्नावच्छेदकतायां साध्यताविशिष्टत्वस्य निरूपकोभयसम्बन्धेन निरवच्छिन्नवह्नित्वनिष्ठावच्छेदकतायां सत्त्वेन. तदनिरूपितत्वस्य वह्निर्नास्तीयभावीयप्रतियोगितायां विरहादिति तादृशाभावस्य लक्षणाघटकत्वेनाव्याप्तिविरहादित्याहुः ॥ ॥ ॥ ॥ ॥ ॥

॥४३॥ परेतु साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्तिःप्रत्यनुयोगितावच्छेदकत्वरूपविशिष्टं यद्रूपं तद्रूपावच्छिन्ना
नुयोगिताकपर्याप्तिकावच्छेदकत्वानिरूपितत्वे साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वपदेन
विवक्षणीयम्॥ वैशिष्ट्यञ्च. स्वसामानाधिकरण्यस्वाभाववद्वृत्तित्वोभयसम्बन्धेन. वन्हिमा
न्धूमादित्यादौ.वन्हित्वगतैकत्वविशिष्टत्वस्य महानसीयत्ववन्हित्वगतद्वित्वे. सत्त्वेन तादृश
रूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकत्वानिरूपितत्वस्य महानसीय.वन्ह्याभावीयप्रति
योगितायां विरहेणा तमादायाव्याप्तिरित्याहुः॥नव्य॥ प्रमेयत्वनिष्ठावच्छेदकतात्वावच्छिन्नप्र.
तियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य लाघवात्प्रमेयत्वे स्वीकर्तुनये प्रमेयव
द्वान्धूमादित्यादौ प्रमेयत्वाभावस्याप्रसिद्ध्यानिरूपकोभयसम्बन्धेन तादृशरूपविशिष्टत्वाप्र.
सिद्ध्याऽव्याप्तिप्रसङ्गात्॥ एवंवन्हिमान्ज्ञानत्वादित्यादौ. प्रत्येकाभावे विपरीताभाव
वृत्यादावव्याप्तेश्चेति.॥ महानसीयवन्हित्वविशिष्टजाति. मान्वात्कीयादि ग्रन्थाऽसङ्ग. ॥४३॥
तेश्च.॥ ॥नव्यास्तु स्ववच्छेदकता.विशिष्टान्यत्वं.साध्यतावच्छेदकतादितरोभयावच्

च्छिन्नत्वस्य पर्यवसितार्थः ॥ वैशिष्ट्यञ्च स्वनिरूपितत्व स्वाभिन्नो या प्रकृतानुमिति विधेयताव-
च्छेदकतात्वावच्छिन्न पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताक पर्याप्ति निरूपि
त प्रतियोगितावदवच्छेदकतात्वावच्छेदकता निरूपितत्वोभयसम्बन्धेन स्वमवच्छेदकता।
तथाच महानसीयत्व निष्ठावच्छेदकता विशिष्टात्वस्य वह्नित्वनिष्ठावच्छेदकता विशिष्टत्व
स्य च महानसीयवह्न्यभावीयप्रतियोगितायां सत्त्वेन विशिष्टान्यत्वविरहान्न निरूपकाभा
वमादाय नाव्याप्तिरिति ॥ विषयितादिसम्बन्धेन साध्यतायां पूर्वोक्ताव्याप्तिवारणानु पू
र्ववाचानानीयानुमितिध्येयम् ॥ ॥ यत्तु साध्यतावच्छेदकभिन्नो यः साध्यनिष्ठो धर्म इ
त्यादिजागदीशी ॥ ननु प्रथमदोषंपरित्यज्य दोषान्तरानुधावनं किं बीजमिति चेन्न ॥ प्रथ
मदोषस्येष्टापत्तिकत्वाद्दोषान्तरापत्त्या सेष्टापत्तिलाघवमूलिकेति नानुपपत्तिरिति ॥ नचैवा
दृशप्रतियोगितात्वस्यैव पर्यवसितत्वे प्रमेयसाध्यकस्थलेऽव्याप्तिशङ्कैव नोदेति । तद्यथा साध्य
तावच्छेदकातिरिक्तसाध्यवृत्तिधर्मानवच्छिन्ना या विषयित्वसम्बन्धावच्छिन्न प्रमेयत्वनि
ष्ठावच्छेदकताकप्रतियोगिता तन्निरूपकाभावस्य प्रमेयत्ववज्ज्ञानाभावस्य लब्धेरगाधाट

रत्वद्रूप

॥४४॥ कतया तदीयप्रतियोगिताशून्यत्वस्य वाच्यत्वगगनाभावादिरूपसाध्यकप्रमेये सत्त्वेन
तत्सामानाधिकरण्यस्य हेतौ सत्त्वादिति वाच्यम्॥ न च साध्यतावच्छेदकताघटकं सम्बन्धाव
च्छिन्नत्वस्यावच्छेदकतायां विरहेण तादृशाभावस्य लक्षणाघटकत्वा ~~दिति~~ दशायामपि संभवादि
ति वाच्यम्॥ रूपवान् पृथिवीत्वादित्यादौ रूपवज्ज्ञानाभावीयप्रतियोगिताशून्यत्वस्य रूपादौ
सत्त्वादव्याप्तिविरहात् एवावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यानि
वेशात् उक्ताभावस्य लक्षणाघटकतयाऽव्याप्तिविरहात्॥ अथ प्रत्येकेन गगनं वह्न्यनुयोगि
कसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्य लक्षणाघ
टकतया तदीयप्रतियोगिताशून्यत्वस्य वह्नौ विरहेणाव्याप्तिरिति साध्यतावच्छेदकताघ
टकसम्बन्धावच्छिन्नत्वं निवेशनीयम्। एवं विषयितासमवायान्यतरसम्बन्धेन रूपत्ववि
शिष्टस्य समवायेन साध्यतायां तदात्मघटान्यत्वादित्यादिहेतुकस्थले शुद्धसमवायसम्बन्धाव
च्छिन्नरूपत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्य शुद्धविषयितासम्बन्धावच्छिन्न ॥४४॥
रूपत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्य लक्षणाघटकतया तन्निरूपितप्रतियोगि

५५

ताशून्यत्वस्य स्वरूपज्ञानात्[illegible] साध्यादावसत्त्वेनाव्याप्तिरित्यत: साध्यतावच्छेदकताघटकत
सम्बन्धावच्छिन्नत्वनिवेशस्तथा च प्रमेयवान् वाच्यत्वादित्यादौ विषयित्वसम्बन्धावच्छिन्न
प्रमेयत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावस्य लक्षणघटकतया तत्राव्याप्तिदानसंग
तेरिति विभावनीयम् ॥ ॥ केचित्तु तादात्म्येन जातिमत: साध्यतायां गुणत्वादि
हेतौ द्रव्यत्वादिजातौ साध्यतावच्छेदकातिरिक्तत्वविरहेण स्वरूपत्वावच्छिन्नाभावस्य ल
क्षणघटकतया तदीयप्रतियोगिताशून्यत्वस्य साध्यादौ विरहेणाव्याप्तिवारणाय न
वच्छेदकत्वानुसरणस्यावश्यकत्वेन पूर्वोक्तदोषासंभवा[illegible]मिति ॥ न चा
नवच्छेदकत्वानुसरणे विजातिमत: साध्यतायां सद्घटो नास्तीत्याकारकाभावस्यापि लक्षण
घटकतया तदीयप्रतियोगितावच्छेदकत्वस्य सत्त्वादौ सत्त्वेन तदनवच्छेदकत्वस्य साध्यतावच्छे
दकविरहादव्याप्तिसावकाशैवेति वाच्यम् ॥ साध्यतावच्छेदकातिरिक्तो य तेनं साध्यतावच्छेद
कतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकातिरिक्तो यः साध्यतावच्छेदक

१स्वपा

॥४५॥ वृत्तित्वरूपेतद्वृत्तित्वस्य प्रतियोगितायां विवक्षितत्वात् ॥ अथ वृत्तित्व घटक वृत्तित्वं च. स्वाव
च्छेदकतात्वावच्छिन्न. पर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन ॥ तथा च तादृशस्वरूपातिरि
क्तया सत्ता घटत्व गगनादिभिन्नतद्वृत्तित्वस्य तादृशाभावीय प्रतियोगितायां विरहेण तदभाव
स्य लक्षणाघटकत्वात् ॥ न च तत्र घटत्वावच्छिन्नाभावीय प्रतियोगितायां ~~विरहेण~~ तादृशस्व
रूपातिरिक्तैः घटत्वगगनैकत्वांद्वृत्तित्वस्य सत्त्वेन तादृशस्वरूपावृत्तित्वविरहात्तादृशस्वरूपावृत्तिप्रतियो
गिकाभावस्य प्रसिद्ध्याऽव्याप्तिरिति वाच्यम् ॥ गगनत्वाभावस्य लक्षणाघटकतया तादृशाभा
वस्य प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् लक्षणसमन्वयसम्भवादित्याहुः ॥
॥ ॥ ननु साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मस्य नवृत्तित्वं. साध्यतावच्छेदकता
घटकसम्बन्धेन विवक्षणीयम् ॥ तथा च तद्व्यक्तित्वादौ साध्यतावच्छेदकताघटकसमवाय.
सम्बन्धावच्छिन्नवृत्तिताविरहेण साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्म. पदेन तद्व्य
क्तित्वादेर्धारणासम्भवेन तदवच्छिन्नाभावस्य लक्षणाघटकतया तदीयप्रतियोगिताशून्यत्वं. ॥४५॥

१:स्यवन्हाव

सत्त्वेन वन्हिमान्धूमादित्यादौ व्याप्तिवारणायानवच्छेदकत्वानुसरणस्यावश्यकत्वम् ॥ ए-
वं प्रमेयवान् वाच्यत्वादित्यादौ साध्यतावच्छेदकताघटकस्वरूपसम्बन्धेन घटत्वादेरवृत्ति-
तया. घटत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मानवच्छिन्न-
त्वसत्त्वेनाऽभावस्य लक्षणाघटकत्वाद्व्याप्तितादवस्थ्यमिति ॥ न च साध्यतावच्छेदकता-
घटकसम्ब~~न्धेन~~न्धातिरिक्तसम्बन्धावच्छिन्नत्वं साध्यतावच्छेदकाभावनिष्ठत्वोभया-
भाववत्त्वस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन विवक्षितत्वात् ॥ तथा च
२५ घटत्वनिष्ठावच्छेदकतायां प्रमेयनिष्ठत्वविरहेणोभयाभाववत्त्वस्याक्षततया तन्निरू-
पितप्रतियोगिताकाभावस्य लक्षणाघटकत्वान्नाव्याप्तिरिति वाच्यम् ॥ कालिकस्व-
रूपान्यतरसम्बन्धेन. प्रमेयत्वस्य साध्यतावच्छेदकतास्थले तादृशान्यतरसम्बन्धे-
न वस्तुमात्रस्यैव साध्यवृत्तितया साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मानव-
च्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तेर्दुर्वारत्वादिति ध्येयम् ॥ ॥ ॥

ननु साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मावच्छिन्नत्वे गगनत्वानवच्छिन्नत्वोभयाभावव
त्त्वस्य धर्मानवच्छिन्नत्वेऽपि तेन विवक्षितत्वात् । तथा च गगनाभावमादायैव प्रमेयसाध्यकेऽदु
रासम्भवयात् कथं तत्कल्पः परित्यक्त इति ॥ नन्वेवं वह्निगगनोभयाभावीयप्रतियोगितायां ग
गनत्वानवच्छिन्नत्वविरहेऽप्युक्तोभयाभाववत्त्वस्याक्षततया तदनवच्छेदकत्वस्य वह्निरूपे वि
रहादव्याप्तिरिति वाच्यम् ॥ गगनत्वानवच्छिन्नत्वेत्यनेन गगनत्वेतरधर्मावच्छेद्यत्व
स्यैव विवक्षितत्वात् । तथा चोक्ताभावीयप्रतियोगितायां गगनत्वेतरवह्नित्वावच्छिन्नत्व
सत्त्वेनोभयाभाववत्त्वविरहान्न तमादायाव्याप्तिरिति ॥ ननु तादात्म्येन प्रमेयवान् गग
नत्वादित्यादौ निरुक्तोभयाभाववति गगनत्वावच्छिन्नप्रतियोगितैव तन्निरूपका
भावस्य प्रतियोगिव्यधिकरणत्वाभावात् तथा चाभावाप्रसिद्ध्याऽव्याप्तिरिति चेन्न ॥ गग
नत्वातिरिक्तधर्मावच्छिन्नत्वेत्यनेनावृत्तिमात्रवृत्तिधर्मातिरिक्तधर्मावच्छेद्यत्वस्य वि
वक्षितत्वात् ॥ तथा चावृत्तिमात्रवृत्तिधर्मान्तर्गतं यन्महाकाशत्वादिकं तदतिरिक्तधर्मा

वच्छिन्नत्वस्य विरहे गगनिरूकोभयाभाववत्त्वस्य महाकालाभावप्रतियोगितायाः सत्त्वा
त्वान्निरूपकाभावस्य प्रतियोगिव्यधिकरणत्वात्तयोः तस्मादाद्यलक्षणासमन्वय इत्यदोषात्
॥ न च गगनमहाकालान्यतरस्य साध्यतायां गगनमहाकालान्यतरत्वहेतौ गग
नाभावस्य महाकालाभावस्य च लक्षणाघटकतया तदीयप्रतियोगिता शून्यत्वस्य
साध्ये विरहादव्याप्तिरिति वाच्यम् ॥ अनवच्छेदकत्वानुसरणेनैव तत्राव्याप्तिवारणा
त् ॥ गगनाभावप्रतियोगितानवच्छेदकत्वस्य गगनमहाकालान्यतरत्वरूपसाध्य
स तावच्छेदके त्वात् ॥ न च प्रमेयाभाववान् वाच्यत्वादित्यादौ साध्यतावच्छेदकजाती
काप्रसिद्ध्योऽव्याप्तिरिति वाच्यम् ॥ साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगिताव
च्छेदकभिन्ने यत्साध्यवृत्तिरूपं तद्वृत्तित्वावृत्तिमत्त्ववृत्तिधर्मातिरिक्तधर्मावच्छिन्नत्वोभया
भाववत्त्वस्य विवक्षितत्वात् ॥ तथा च गगनाभावमादायलक्षणासमन्वय इति ॥ ननु
तथापि तादात्म्येन गगनत्ववान् शब्दादित्यादौ गगनमहाकालोभयाभावीयप्रतियो

॥४७॥ गितायां मद्वृत्तिमात्रवृत्तिधर्मातिरिक्तधर्मावच्छेद्यत्वविरहेणोभयाभावसत्त्वान्निरुक्त पदे
भावीयप्रतियोगितानवच्छेदकत्वस्य गगने विरहादव्याप्तिः ॥ एवं गगनत्व तज्ज्ञानत्वादिना
दौरूप्यवद् गगनाभावस्थलीयधराग्रकतया. तदीयप्रतियोगितायाः नवच्छेदकत्वस्य.
साध्यतावच्छेदके विरहादव्याप्तिरिति चेन्न ॥ गगनत्व गौतिकत्वातिरिक्त महाकालत्वग
तैकत्वातिरिक्तं यत्साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं भिन्नं यत्साध्यवृत्तिद
पौतवद्वृत्ति-प्रतियोगितकाभावप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् ॥ तादृशोभ
याभावीय प्रतियोगितायां गगनत्व महाकालत्वोभय भयत्वैः गगन. भिन्नवृत्तित्वस्यै
[illegible] ॥ सत्त्वेन तादृशोभयपर्याप्तित्वविरहात् ॥ एवं तादृशोभयपातिरिक्तं यद्धर्मं गग
नत्वगतद्वित्वं तदवच्छिन्नस्य ध्रुवद् गगनत्वावच्छिन्नप्रतियोगितायां विरहात्तादृ
शाभावमादायाव्याप्त्यभावात् ॥ अथ गगनविषयकं सत् महाकाल विषयकं सत्प्रमेय
विषयकं यद् गगनत्वमहाकालत्वप्रमेयत्वैकैकैत्याकारकं समूहालम्बनज्ञानत्वं ॥४७॥

हेतुकप्रमेयसाध्यकस्थले गगनाभावे महाकालाभावे च प्रतियोगिवैयधिकरण्य.विरहा
द्घटाद्यभावे च तादृशरूपावृत्तिप्रतियोगितावच्छेदकत्वविरहे सति तादृशरूपावृत्ति.प्रतियो-
गितावच्छेदकप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्तिरिति ॥ एवं च साध्यतावच्छेदक-
तापर्याप्तप्रतियोगितावच्छेदकरूपाभिन्नं यद्धेत्वधिकरणावृत्तित्वरूपं तदवृत्ति.प्रतियोगि-
ताकत्वं विवक्षणादेव घटत्वाभावादिकमादाय लक्षणसमन्वय इत्युच्यते तदा प्रमेयं वह्नि-
मत्त्वादिना यत्र नित्यज्ञानान्यत्वविशिष्टघटत्वगगनसमुदायत्वस्य तादृशरूपाभि-
न्नद्रूपान्तर्गततया[illegible]दवृत्तित्वस्य.नित्यज्ञानान्यत्व.विशिष्टघटाभावीयप्रतियोगि-
तायां सत्त्वेऽपि विरहाऽभावाप्रसिद्ध्याऽव्याप्तेः ॥ न च हेत्वनधिकरणावृत्तित्वे पर्याप्त्य.
हेत्वधिकरणावृ.त्तितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वस्य विवक्षि-
तत्वात् ॥ नित्यज्ञानान्यत्वविशिष्टत्वगग[illegible]समुदायत्वे.तादृशाभिन्न[illegible]त्व.स-
त्त्वेऽपि हेत्वधिकरणावृत्तितावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वविर

-॥४८॥ हेरातादृशसमुदायत्वस्यतादृशरूपानागतत्वानियज्ञानान्यत्व विशिष्टप्रताभावस्यल
हेराग्घटकतयानिमादायाव्याप्तिवारसांसंभवतीतिवाच्यम् ।। वन्हिजलोभयस्य. पर्वतादौ.
वसत्वेन वन्हि । जलत्वोभयत्वेनैदगतत्विस्य साध्यतावच्छेदकतापर्याप्त्यनुयोगिता
नवच्छेदकत्वेऽपि. हेत्वधिकरणपर्वतादि निरूपितवृत्तितावच्छेदकतापर्याप्त्यनुयोगिता.
वच्छेदकत्वविरहे रानादृशरूपानागतत्वाभावात् ।। अथ च वन्हिमान्धूमादित्यादौ वन्हिज
लोभयाभावीयप्रतियोगितायां तादृशरूपावृत्तित्वस्य सत्वेन नातिरूपकाभावं प्रति
योगितावच्छेदकत्वस्य. वन्हित्वे सत्वेनाव्याप्तेः ।। एवं हेत्वधिकरणावृत्तित्वस्य. साध्यता
वच्छेदकसम्बन्धेन विवक्षणीयतया वन्हित्वावच्छिन्नप्रतियोगिकसंयोगेन वन्हिसाध्य.
कस्थले साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकरूपाभिन्नतादृशरूपस्याप्र
सिद्ध्याऽव्याप्रेश्च ।। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोपादानेन साध्यतावच्छेदकस.
म्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यनिष्ठत्वोभयाभाववत्वस्य विवक्षितत्वेन ॥४८॥

48

त्रैव महानसीयवन्ह्यभावमादायाव्याप्तेर्दुर्वारत्वात् ॥ केचित्तु उक्तधर्मस्याभावप्रतियो-
गितानवच्छेदकत्वे कंबुग्रीवादिमान् द्रव्यत्वादिनाद्यौ धूमत्वप्रकारकप्रमाविशेष्यतानु-
वन्हेरित्यादौ उक्तत्वावृत्तिप्रतियोगिकत्वाविरहेण घटाभावस्य धूमाभावस्य च लक्षे-
णाघटकत्वान्घटाभावादिकमादायातिप्रसङ्ग इत्याहुस्तच्चिन्त्यमिति ध्येयम् ॥ ॥
तद्धर्मावच्छिन्नलिंगकतद्धर्मावच्छिन्नविधेयताशाल्यनुमितिजनकतावच्छेदिकाव्या-
प्तिः इतरभिन्नो, तद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकतद्धर्माव-
च्छिन्नसामानाधिकरण्यस्य पर्याप्तिमत्त्वादितीतरभेदानुमाने भागासिद्ध्यादिदोषवा-
रणाय तद्धर्माश्रयालिंगकत्वमुपेक्ष्य तद्धर्मावच्छिन्नलिंगकत्वनिवेशः । तथा च धूमत्वा-
गग श्रयनिष्ठद्रव्यत्वावच्छिन्नलिंगकवन्हित्वावच्छिन्नविधेयताशाल्यनुमितौ विषयताविधया
म जनकतावच्छेदके द्रव्यत्वावच्छिन्नधूमसमानाधिकरणाभावप्रतियोगितानवच्छे-
दकवन्हित्वावच्छिन्नसामानाधिकरण्यस्य पर्याप्तौ सत्त्वेन तस्याः पर्याप्तावच्छेदका-

॥४९॥ कालान्येन तत्त्वातादात्म्यसम्बन्धेन धूमत्वावच्छिन्नसामानाधिकरण्याभावप्रतियोगिता
नवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यरूपहेतोस्तत्रासत्त्वेन स्वरूपासिद्धि
प्रसङ्गादतस्तद्धर्मावच्छिन्नत्वनिवेशः॥ एवं विधेयतायां तद्धर्मावच्छिन्नत्वानिवेशे धू
मत्वावच्छिन्नलिङ्गक वह्नित्वा~~वच्छिन्न~~ [illegible] निष्ठतत्तद्व्यक्तित्वावच्छिन्नविधेयता
कानुमितिजनकतावच्छेदकत्वस्य धूमत्वावच्छिन्नसमानाधिकरण्याभावप्रतियोगि
तानवच्छेदक~~निष्ठ~~ तत्तद्व्यक्तित्वावच्छिन्नसामानाधिकरण्यरूपव्याप्तावपि तन्ना
तत्र वह्नित्वावच्छिन्ननिरूपितधूमत्वावच्छिन्ननिष्ठतादृशव्याप्तेस्तादात्म्येन सम्बन्धेना
सत्त्वात्स्वरूपासिद्धिप्रसङ्गादतस्तन्निवेश इत्यभिप्रायेणाह ॥ द्रव्यत्वादिरूपेणेत्या
दि। इतः परं क्रमेणानास्ति किंत्वन्यदेव पूर्वं पद्यौ वर्तिनो
॥ श्रीः ॥ न च शुद्धसाध्यतावच्छेदकस्थलेऽवच्छेदकत्वं निरवच्छिन्नमित्यादिजागदीशी. ॥४९॥
॥ ननु साध्यतावच्छेदकवह्नित्वतदितरद्रव्यत्वोभयनिष्ठजातित्वावच्छिन्नावच्छेदकत्वं.

स्य महानसीयवन्हिवृत्तित्वविशिष्टजातिमान्नास्तीति प्रतीतिसिद्धाभावीय.प्रतियोगिता
यां सत्त्वेन साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वविरहात्कथं तमादाय व्याप्तिरिति चेन्न।।
वन्हित्वप्रतियोगिकसमवायसम्बन्धावच्छिन्नाया महानसीयवृत्तिता तद्विशिष्टजातिमान्ना
स्तीतिप्रतीतिसिद्धाभावीयप्रतियोगितावच्छेदकत्वस्य वन्हित्वमात्रे सत्त्वेन. साध्यतावच्छेदक
तदितरोभयानवच्छिन्नत्वस्य. तदीयप्रतियोगितायां सत्त्वेन तमादाय व्याप्तिसंभवात् ।। किंच.
तादृशाभावीयप्रतियोगितानिरूपितैकावच्छेदकतावन्हित्वे. सत्त्वेनास्तीति परिष्कारा
साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वसाध्यतावच्छेदकताविशिष्टान्यावच्छेदक.
तानिरूपितत्वोभयस्य तादृशप्रतियोगितायां. विरहेण तादृशाभावस्य लक्षणाघटकत्वा
दिति यथाश्रुतमेव सम्यगिति ।। नच. तथापि. साध्यतावच्छेदकनिष्ठावच्छेदकतानिरू
पितत्वस्य साध्यतावच्छेदकताविशिष्टान्यजातित्वनिष्ठावच्छेदकतानिरूपितत्वस्य.
चद्वयो. ~~[illegible]~~ तादृशप्रतियोगितायां सत्त्वेन निरुक्तोभयाभावविरहात्कथं तमा

।।५०।। दृशाभावस्य लक्षणाघटकत्वमिति वाच्यम् पूर्वोक्तरीत्या साध्यतावच्छेदकताविशिष्टान्यताव
च्छेदकतानिरूपितत्वस्य साक्षान्निवेशस्यावश्यकत्वात्तन्निवेशे तत्रोभयाभावस्याक्षतत्वा
त् ।। न च महानसीयवह्निवृत्तिविशिष्टजातिमान्नास्तीत्यत्र वह्नित्वस्य स्वरूपतोभा
नाप्रसिद्धेर्वह्नित्वनिष्ठ~~अवच्छेदकतायाः~~ निरवच्छिन्नावच्छेदकताकत्वस्य साध्यतावच्छेदक
ताविशिष्टान्यजातित्वावच्छिन्नावच्छेदकताकत्वस्य च निरुक्तोभयाभावीयप्रतियोगि
तायां सत्त्वेन निरुक्तादितरोभयाभावाच्छिन्नत्वविरहात्कथं तस्य लक्षणाघटकत्व
मिति वाच्यम् ।। प्रमेयकालीनघटवान्नित्यप्रागभावादित्यादौ नित्यप्रागभावान्यत्वविशि
ष्टपटाभावस्यैव लक्षणाघटकत्वं तदीयप्रतियोगितायां च साध्यतावच्छेदकभेदत्वावि
ष्टावच्छेदकतानिरूपितत्वं तद्विशिष्टान्यपटत्वनिष्ठावच्छेदकतानिरूपितत्वोभयस्य स
त्त्वेन तन्निरूपकाभावस्य लक्षणाघटकत्वेन व्याप्तिभिया साध्यतावच्छेदकनिष्ठाव
च्छेदकतानिरूपितत्वस्य साक्षान्निवेशस्यावश्यकत्वान्न किञ्चिदनुपपन्नमिति ।। ।।५०।।

50

४२ साध्याद

घादिव साध्यतानिरूपित साध्यादवच्छेदकतावद्धर्मनिरूपितत्वस्यैव साध्यतावच्छेदकनि
ष्ठावच्छेदकतानिरूपितत्वेन विवक्षणीयम्। अन्यथा साध्यतावच्छेदकभेदत्वनिष्ठावच्छे
दकतानिरूपितत्वस्य तद्विशिष्टान्यपदत्वनिष्ठावच्छेदकतानिरूपितत्वस्य च निरुक्तप्र
तियोगितायाः सत्त्वेनाव्याप्तितादवस्थ्यात् ॥ तथा च प्रकृते परंपरया वन्हिनिष्ठावच्छेद
दकतानिरूपितत्वस्य साध्यतावच्छेदकता विशिष्टान्यजातित्वावच्छिन्नावच्छेदकतानि
रूपितत्वस्य महानसीयवन्हिवृत्तित्वविशिष्टजातिमान्नास्तीयभावीयप्रतियोगि
तायाः सत्त्वेन तादृशाभावस्य लक्षणाघटकत्वे दुर्वारमित्युच्यते. तदा महानसीयवन्हि
पदं तत्तद्व्यक्तिपरं. तथा च तत्तद्व्यक्तिवृत्तित्वविशिष्टजातिमान्नास्तीयभावप्रति
मादायाव्याप्तिसीद्धारणाय तस्य सार्थक्यसंभवात् ॥ ॥ अथ महानसीयव
न्हिवृत्तित्वविशिष्टजातिमान्नास्तीयभावीयप्रतियोगितावच्छेदकजातिनिष्ठावच्छेद
कताकनिरूपकताधिकरणत्वस्य पर्वतादौ सत्त्वेन तादृशाभावस्य प्रतियोगिव्याधिकरण

त्वाभावात्कथं तमादाय व्याप्तिरिति ॥ नच विशिष्टसत्तावाञ्जातेरित्यादौ पूर्वोक्तरीत्या तं
॥५१॥ द्रव्याभावस्य लक्षणघटकत्वादभावाभावमादायाव्याप्तिवारणाय तादृशप्रतियोगि
तावच्छेदकतात्वावच्छिन्नप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयो
गिताकपर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणत्वाभाववद्धेत्वधिकरणं
तादृशप्रतियोगितानवच्छेदकेत्यादिक्रमेण विवक्षणीयस्यावधिकतया तादृशाभा
वे प्रतियोगिवैयधिकरण्यस्योक्तत्वात्तादृशाभावमादायाव्याप्तिदानसंभवादिति वा
च्यम् ॥ एकत्वादेः पर्याप्त्यनङ्गीकारमताभिप्रायकोऽयं ग्रन्थ इत्यवधेयं वक्तव्याः ॥ तथा च
धूमाभावस्य लक्षणघटकत्वात् घटपटोभयाभावादिकमादायाव्याप्तेः । अन्यथा तत्त्वेहि
राभिप्रायकत्वे तादृशप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताव ॥५१॥
च्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितानवच्छेदकसाध्यतावच्छेदकतात्वावच्छिन्न

51

पर्याप्त्यनुयोगितावच्छेदकरूपविशिष्टावच्छिन्नसामानाधिकरण्यमित्युक्तावेव सर्वसा
मञ्जस्येऽनै निरवच्छिन्नत्वं साध्यतावच्छेदकतादितोभयानवच्छिन्नत्वं. साध्यतावच्छेदकता
वच्छेदकतादितोभयानवच्छिन्नत्वं. चेति चेन्न ।। जगदीशनयेऽसमानप्रकारकज्ञानस्याप्र
तिबन्धकत्वया प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक
मिति व्यभिचारज्ञानस्येवेपि तादृशाभाव प्रतियोगितावच्छेदकतात्वावच्छिन्न प्रतियोगि
ताकपर्याप्त्यनुयोगिता[illegible]नवच्छेदकं साध्यतेत्यादि. अवच्छेदकमिति व्याप्तिज्ञानसत्त्वे
वा निरुक्तव्यभिचारज्ञानदशायामपि निरुक्तव्याप्तिज्ञानादनुमितिः स्यादत उक्तप्रद
र्शिततादृशतादृशविशेषणानुसरणादिति. ।। भट्टाचार्येण तादृशव्यभिचारज्ञा
नस्य तादृशव्याप्तिज्ञानप्रतिबन्धकत्वं. स्वीकृत्य. तथा निवेशितं. ।। तन्मतेऽसमानप्रकारक
ज्ञानस्यापि प्रतिबन्धकत्वमिति. विभावनीयम् ।। ।। ।। ।।

॥५२॥ केचित्तु प्रतियोगितायां विशिष्टसाध्यतावच्छेदकसम्बन्धावच्छिन्ननिरूपकताकाधिकरणतावत्त-
मेव प्रतियोगिवैयधिकरण्येस्यार्थः ॥ वैशिष्ट्यञ्च स्वसामानाधिकरण्य स्वानवच्छेदकानवच्छिन्न
त्वस्वव्याप्यत्व स्ववृत्तित्वैतत्त्रयसम्बन्धेन । स्वं प्रतियोगिता । वृत्तित्वञ्च स्वानवच्छेदकानव
च्छिन्नत्वसम्बन्धेन स्वे निरूपकेस्ति । तथा च महानसीय वन्हित्वविशिष्टजातिमान्नास्तीति
प्रतीतिसिद्धाभावीयप्रतियोगिताविशिष्टनिरूपकता तादृशजात्यवच्छिन्नैव न तु केवलजात्य
वच्छिन्ना तत्र स्वव्याप्यत्वविरहात् ॥ इति तादृशनिरूपकताकाधिकरणत्वाभावस्य हेत्वधिक
रणे सत्त्वात् तादृशाभावस्य लक्षणघटकत्वा[illegible]वैमेकत्वादेः पर्याप्त्य स्वीकारे विरुद्धति. विरहा
दित्याहुः ॥ तच्चिन्त्यम् ॥ समवायेन स्वरूपतो धूमत्वविशिष्टस्य जातित्वावच्छिन्नधूमनि
ष्ठावच्छेदकताक. निरूपकतायामेव धूमनिष्ठानिरवच्छिन्नावच्छेदकताकनिरूपकतायामपि
सत्त्वात् । तादृश. निरूपकताकाधिकरणत्वाभावस्य हेत्वधिकरणे विरहेण साध्याभावस्य. ॥५२॥

न्हेरागघटकत्वादतिव्याप्त्यापत्तेरिति ॥ ॥ परेतु प्रतियोगितावैशिष्ट्यञ्च स्वनि
रूपकतायां स्वनिरूपकतावच्छेदकतात्वव्यापकत्वसम्बन्धेन। स्वं प्रतियोगिता। व्यापक
ताच स्वनिरूपितावच्छेदकतात्वसम्बन्धेन। स्वं निरूपकता। अवच्छेदकतात्वञ्च स्वसामा
नाधिकरण्यस्यावच्छेदकसम्बन्धावच्छिन्नत्वस्यावच्छेदकतावच्छिन्नत्वस्य स्ववृत्तित्वैतच्च
तुष्टय सम्बन्धेन। स्वनिरूपितावच्छेदकतात्व सम्बन्धेन। अवच्छेदकतात्वञ्च पूर्वो
क्तसम्बन्धेन ॥ तथाच महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्यभावीयप्रति
योगिताविशिष्टतादृशजात्यवच्छिन्ननिरूपकतानिरूपिताधिकरणत्वाभावस्य हेत्व
धिकरणे सत्त्वान्न क्वाप्यनुपपत्तिरिति ॥ अत्र स्वसामानाधिकरण्यानिवेशे धूमवान्
वह्नेरित्यादौ धूमाभावीयप्रतियोगिताविशिष्टस्य निरवच्छिन्नद्रव्यत्वनिष्ठावच्छेदक
ताकनिरूपकतायाः सत्त्वेन तादृशनिरूपकताकाधिकरणत्वाभावस्य हेत्वधिकरणे
विरहादतिव्याप्तिः प्रसङ्गादत्र सन्निवेशः ॥ स्वावच्छेदकसम्बन्धावच्छिन्नत्वाति

॥५३॥ वैशिका लिङ्गसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकता इ निरूपकतायां तत्प्रतियोगिताविशिष्टत्वस्य सत्त्वेन शङ्कातादवस्थ्यात्तन्निवेशः ॥ स्वानवच्छेदकानवच्छिन्नत्वानिवेशे विषयितासम्बन्धेन धूमसाध्यक धूमत्वात्मक जातिविशिष्टविषयकज्ञान धूमविषयकज्ञानान्यतरत्व हेतुकि साध्याभावीयप्रतियोगितानिरूपितावच्छेदकतायां मवच्छेदकतावत्वस्य निरुक्तत्रितयसम्बन्धेन सत्त्वेन तादृशप्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्वाभावस्य हेत्वधिकरणे विरहात्साध्याभावस्य लक्षणाघटकत्वादतिव्याप्तिरतस्तन्निवेशः। स्ववृत्तित्वस्य कृतं पूर्वोक्तस्थले वैपरीत्येन बोध्यम् ॥ ॥ ॥ अथात्र विषयितासम्बन्धेन वह्निमान् वह्निविषयकज्ञान महानसीयवह्निविषयकज्ञानान्यतरत्वादित्यादौ वह्न्यभावीयप्रतियोगिताविशिष्टत्वस्य महानसीयवह्नित्वावच्छिन्ननिरूपकतायामपि सत्त्वेन तादृशनिरूपकताकाधिकरणत्वाभावस्य हेत्वधिकरणे विरहात्साध्याभावस्य लक्षणाघटकत्वादतिव्याप्तिरिति चेन्न ॥ प्रतियोगितावैशिष्ट्यञ्च स्ववृत्तित्व. स्वनि. ॥५३॥

53

रूपकतावच्छेदकताव्यापकत्वोभयसम्बन्धेनवृत्तित्वञ्च स्वनिरूपकत्वव्यापकतास
म्बन्धेन । व्यापकता च स्वनिरूपिकतावच्छेदकतावत्तासम्बन्धेन । स्वप्रतियोगिता । अव
च्छेदकतावत्ता च पूर्वोक्तचतुष्टयसम्बन्धेन ॥ तथा च महानसीयवह्नित्वावच्छिन्ननि
रूपकता[illegible]वच्छेदकत्वाधिकरणे महानसीयत्वनिष्ठावच्छेदकतायां वह्न्यभावी
यप्रतियोगितानिरूपितवह्नित्वनिष्ठावच्छेदकतावत्त्वस्य विरहेऽपि उभयसम्बन्धघट
कस्ववृत्तित्वविरहेण वह्न्यभावीयप्रतियोगिताविशिष्टत्वं महानसीयवह्नित्वाव
च्छिन्ननिरूपकतायामित्यदोषः ॥ स्ववृत्तित्वघटकस्वनिरूपितावच्छेदकतावत्त्वं निया
मकचतुष्टयसम्बन्धघटकस्वसामानाधिकरण्यांशे निवेशे विषयितया वह्निमा[illegible]स्याव
ह्निविषयकज्ञानवह्निविषयकज्ञानान्यतरत्वादित्यादौ वह्न्यभावीयप्रतियोगितानिरू
पितवह्नित्वनिष्ठावच्छेदकतावत्त्वस्य निरुक्तविषयितासम्बन्धेन तादृशवह्नित्वावच्छिन्न
निरूपकतावच्छेदकतायां वह्नित्वनिष्ठावच्छेदकतायाञ्च सत्त्वेन निरुक्तोभयसम्ब

॥५४॥ ण्धेन वह्न्यभावीयप्रतियोगिताविशिष्टत्वस्यातारों वह्नित्वावच्छिन्नस्यैव [illegible] नि
रूपकतायां सत्त्वात्तादृशनिरूपकताकाधिकरणत्वाभावस्याव्यभिचारिनिरूपका
धिकरणे विरहेण साध्याभाववद्घटितापघटकत्वादव्याप्तिरात्तन्निवेशः॥ तन्निवे
शे च वह्नित्वनिष्ठावच्छेदकतासामानाधिकरण्यं नास्ति त्वनिष्ठावच्छेदकतायां वि
रहेण स्ववृत्तित्वविरहादनेन तादृशप्रतियोगिताविशिष्टत्वे तादृशनि[illegible]ताया
मिति न दोषः॥ स्वावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे समवायेन धूमत्वविशिष्ट
स्य विषयितासम्बन्धेन साध्यतायां समवायेन धूमत्वविशिष्टस्य कालिकेन धूमत्व
विशिष्टविषयकज्ञाने समवायेन धूम~~त्वभाव~~त्वविशिष्टविषयकज्ञानाव्यापकत्वादि
त्यादौ धूमाभावीयप्रतियोगितानिरूपितसमवायसम्बन्धावच्छिन्नधूमत्वनि
ष्ठावच्छेदकतावत्त्वस्य कालिकसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकतायां स- ॥५४॥

मवायसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकतायां सत्त्वेन साध्याभावीयप्रतियो
गिताविशिष्टत्वस्य निरूपकसम्बन्धद्वयावच्छिन्नावच्छेदकताद्वयनिरूपितनिरू
पकतायां सत्त्वात्तादृशनिरूपकताकाधिकरणत्वाभावस्यैव मिथो निरूपकाधि
करणतो विरहेण साध्याभाववत्स्थलदीधितेरापरकत्वादिति व्याप्तिरीतिरालि वेद्यः ॥ ग
थार्थ कालिकसम्बन्धावच्छिन्नावच्छेदकतायां स्वावच्छेदकसम्बन्धावच्छिन्नत्व
विरहेण निरूपकतावच्छेदकाविषयकत्वस्य प्रतियोगितावच्छेदकतायां विर
हादिति स्ववृत्तित्वविरहेण निरूपकोभयसम्बन्धेन प्रतियोगिताविशिष्टत्वस्य
तादृशनिरूपकतायां विरहेणादोषात् ॥ स्वानवच्छेदकानवच्छिन्नत्वादिवेशे
विषयिता या धूमवा~~[illegible]~~ धूमविषयकज्ञानस्वरूपतो धूमत्वविशिष्टसम्ब
दस्वरूपतो धूमत्वविशिष्टविषयकज्ञानान्यतरत्वादित्यादौ स्वावच्छिन्नधूम

॥५५॥ निष्ठावच्छेदकतानिरूपितैव निरवच्छिन्न धूमत्त्व निष्ठावच्छेदकतानिरूपितायां निरूप
कतातन्निरूपितायां साध्याभावीय प्रतियोगितानिरूपितनिरवच्छिन्न धूमत्त्वनिष्ठाव
च्छेदकतावत्त्वस्य सत्त्वेन साध्याभावीयप्रतियोगिताविशिष्टत्वस्य तादृशनिरूपकता
यां सत्त्वात्तादृशनिरूपकताकाधिकरणत्वाभावस्य व्याप्तिता निरूपकाधिकरणे
विरहेण साध्याभाववस्यलक्षणाघटकत्वादतिव्याप्तिरतस्तन्निवेशः ॥ तथा च तादृ
शनिरूपकतानिरूपितरूपावच्छिन्न. धूमत्त्वनिष्ठावच्छेदकतायां स्वानवच्छेदकताव
च्छिन्नत्व विरहेण प्रतियोगितावच्छेदकावत्त्वस्य. विरहादिति. साध्याभावीयप्र
तियोगिताविशिष्टत्वस्य. निरूपकतायां विरहेणादोषात् ॥ स्ववृत्तित्वस्य फलं. प्रेत
वैपरीत्येन बोध्यम् ॥ ॥ अथ तार्णवन्हिमांस्तार्णाविषयकज्ञानवन्हितार्णवि
षयकज्ञानान्यतरत्वादित्यादौ. साध्याभावीयप्रतियोगिताविशिष्टत्वस्य. साध्य ॥५५॥

55

तावच्छेदकावच्छिन्नो निरूपकतायां विषयिता धर्मावच्छिन्ननिरूपकतायां. वस्तुत्वेन
तादृशनिरूपकताद्यधिकरणत्वाभाववस्य हेत्वधिकरणे विरहात् साध्याभाववत्त्व
लक्षणा घटत्वेन घटाद्यभावमादायातिव्याप्तिरिति चेन्न, व्यासज्यवृत्तिधर्मस्य
पर्याप्तेः सर्वानुभवसिद्धतया व्यासज्यवृत्तिसाध्यतावच्छेदकतास्थले प्रतियोगि
तावच्छेदकताभावावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिता
कपर्याप्तिकावच्छेदकतासिद्धनिरूपकताकाधिकरणत्वाभाववत्त्वमेव प्रतियोगि
वैयधिकरण्यपदार्थः । तथा च न कोऽप्यनुपपत्तिरिति ॥ न चैवं वादेः पर्याप्त्य
सौकर्याद्व्यासज्यवृत्तिसाध्यतावच्छेदकस्थलीयलक्षणस्य धूमवान्वह्ने
रित्यादावतिव्याप्तिरिति वाच्यम् ॥ तादृशप्रतियोगिव्यधिकरणहेतुसमानाधिकर
णाभावप्रतियोगितानवच्छेदकं यत्साध्यतानिरूपितव्यासज्यवृत्तिधर्मावच्छेदकतावत्ता

॥५६॥ ध्यतावच्छेदकैतदवच्छिन्नसामानाधिकरण्यस्योक्तत्वात् ॥ तथा च धूमत्वनिष्ठावच्छेदक
तायां व्यासज्यवृत्तित्वविरहेणातिव्याप्त्यभावात् ॥ एवं च व्यासज्यवृत्तिसाध्यतावच्छे
दकतास्थलीयलक्षणेऽव्यासज्यवृत्तितावच्छेदकतावत्त्वं साध्यतावच्छेदके विशेषणीय
म् ॥ तेन नाद्यलक्षणस्य व्यासज्यवृत्तिसाध्यतावच्छेदकस्थले नातिव्याप्तिशङ्का ॥ अथ
भिन्नलक्षणघटकेऽव्यासज्यवृत्तिसाध्यतावच्छेदकतास्थलीयलक्षणे प्रतियोगिवै
यधिकरण्यं यथाश्रुतमेव सम्यगिति । वह्निमान् धूमादित्यादौ महानसीयवह्निवृत्ति
त्वविशिष्टजातिमान्नास्तीत्यभावीयप्रतियोगितावच्छेदकवह्नित्वादिरूपजात्यव
च्छिन्नतद्रूपकताकाधिकरणत्वस्य हेत्वधिकरणे सत्त्वेन तादृशाभावे प्रतियोगिवै
यधिकरण्यविरहात् ॥ तथा च तत्स्थलक्षणघटकन्वाहिदृशरूपमादाय लक्षणस
मन्वयसंभवात्कथं निरवच्छिन्नत्व विशेषणीयम् ॥ न च प्रतियोगिवैयधिकरण्य ॥५६॥

स्य यथाश्रुतार्थकत्वेन वन्हिमान् महानसीयवन्हिविषयकज्ञानवन्हिविषयकज्ञाना-
न्यतरत्वादिनादौ वन्ह्यभावप्रतियोगितावच्छेदकवन्हित्वनिष्ठावच्छेदकताक महानसी-
यवन्हित्वावच्छिन्ननिरूपकताकाधिकरणत्वस्य हेत्वधिकरणीभूतमहानसीयव-
न्हिविषयकज्ञाने सत्त्वेन प्रतियोगिवैयधिकरण्यविरहाद्वन्ह्यभावस्य च तादृशरणाघट-
कत्वादभावानारमादायातिव्याप्तिरिति वाच्यम् ॥ स्वनिरूपितप्रतियोगितावच्छेदक-
निष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितनिरूपकताकाधिकरणत्वाभाववत्त्व-
स्य प्रतियोगिवैयधिकरण्येऽयमेन विवक्षणीयत्वात् ॥ तथा च वन्हित्वनिष्ठावच्छेदकताभि-
न्नाया महानसीयत्वनिष्ठावच्छेदकतातदनिरूपितत्वस्य तादृशनिरूपकतायां वि-
रहेण वन्हित्वावच्छिन्ननिरूपकतायाः सत्त्वेन च तादृशनिरूपकताकाधिकरणत्वा-
भाववत्त्वस्य व्यभिचारनिरूपकाधिकरणे सत्त्वाद्वन्ह्यभावस्य तादृशरणाघटकत्वेनाति-
व्याप्तिविरहात् ॥ न च वन्हिसिंहाकारावच्छेदकतास्वीकारे महानसीयवन्हित्वावच्छिन्नति

॥५१॥ रूपकतानिरूपितैवावच्छेदकता वन्हित्वे महानसीयत्वे च वन्हित्वनिष्ठावच्छेदकता
भिन्नत्वस्य महानसीयत्वनिष्ठावच्छेदकतायां विरहेण महानसीयवन्हित्वावच्छिन्ननि.
रूपकतायासाद्दश्यत्वानुपादश. निरूपकताधिकरणत्वाभावस्य हेत्वधिकरणे वि.
रहेण वन्ह्यभावस्थलीयघटकत्वादतिव्याप्तिसाद्दवस्थ्यैवेति वाच्यम्॥ प्रतियोगिताव
च्छेदकधर्मभिन्नधर्मानवच्छिन्ननिरूपकताधिकरणत्वाभावस्य विवक्षितत्वाद्व
न्हित्वेतरै[illegible]स्य महानसीयत्वे निराबाधतया वन्हित्वेतरधर्मानवच्छिन्नत्वस्य महान
सीयवन्हित्वावच्छिन्ननिरूपकतायां विरहाद्वन्ह्यभावस्थलीयघटकत्वं तु घटभि
त्तिचेन्नाव्याप्यवृत्तिसाध्यतावच्छेदकतास्थले पर्याप्तिनिवेशस्यावश्यक[illegible]याता
र्वन्हिमान्धूमादित्यादौ महानसीयवन्हिवृत्तित्वविशिष्टजातिमान्नवासीति प्रतीति ॥५१॥
सिद्धाभावस्थलीयघटकतायाः तमादायापि वारणाय निवेशि[illegible]णत्वविशेषणस्य.
सार्थकत्वसंभवादित्यलं पल्लवितेन॥ इति गौतमीकी. टीका समाप्तं. लिखितं चंदे.

पुस्तकं भट्टराईपुवाहेन मुकुन्दनाथशर्म्मणा. मिति. वैक्रमीयसम्वत् १९५९ आषाढ वदि
पञ्चम्याः॥ श्री ॥ श्रीश्री॥ श्रीश्रीश्री॥ श्रीश्रीश्री॥ श्रीश्रीश्री॥ श्रीश्रीश्री॥ श्रीश्री॥ श्रीश्री॥

पं, ५६।५५॥६८५।

सिद्धान्त लघीय

गोलेकी टीक